R S V L
00989
178/XXIII
989

RC

989

Registered No. M 2300.

Book XXIII ॥ श्रीः ॥ Nos. 1 & 2

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

| | | | |
|---|---|---|---|
| पु. २३] कलि | ५०५० विरोधि | कन्या<br>तुला | साधारण सं १<br>शास्त्रानुबन्ध सं १<br>आहत्य ,, २ |

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

September & October 1949.

A22

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava, Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः- कुवलयानन्दः । २९३—३००

1 मेनका ।
2 सुभाषितनीवी ।
3 संस्कृतप्रतिष्ठा ।
4 स्यमन्तकोपाख्यानम् ।
5 वाणिज्यम् ।
6 यथाभिमतम् । [नाटकम्]
7 सञ्जल्पः ।
8 प्रकृतिभेदः ।
9 पुस्तकपरामर्शः ।
10 प्रतिबोधनम् ।

SRI VENKATESWARA ... SANSKRIT VIDYAPEETHA TIRUPATI LIBRARY

तज्जनितेन हर्षेण वस्तुतः मे मनो विजृम्भते । स्त्रियः प्रतिपूर्वं भवतां योऽभिप्राय आसीत् तस्य वैपरीत्येन यदिदानीं भवन्तो भापन्ते तेन मयाऽनुभूयमानस्य आनन्दस्य अवधिरेव नास्ति। मया इयता कालेन कृतः प्रयासो न व्यर्थः। मेनकास्थाने स्थित्वा अहं हार्दं कृतज्ञतावादं भवत्सु समर्पयामि। यदि तथा भवन्तो विवाहमनपेक्षितं मन्यन्ते तथा खलु भवन्तः सोदर्योः सकाशे निवेदयितुमर्हन्ति। इदं प्रति क्लिश्यमानाः कुतो भवन्त आत्मानमायासयन्ति।' इत्यतीव सान्त्वेन आन्तरेणानुरागेण च यथा तस्य खेदो न भवेत् तथा जगाद।

वराहस्वामी— तथा उक्त्वा यदि सुखं विवाहो निरोद्धुं शक्यते किमहं इयद्दूरं व्यथेय ? एते अन्यदपि किमपि कार्यं कृतवन्तः। न परमेते स्वयमेव कन्यामन्विष्य विवाहं निश्चित्य दिनमपि निर्दिशन्ति स्म। कन्यागृहिणां सकाशात् वरदक्षिणेति अयुतं रूप्याणि गृहीत्वा तैः किल इमं प्रासादमपि मूल्येन परिक्रीणते स्म। यद्येते सम्प्रति विवाहं नेच्छन्ति तर्हि गृहीतं धनं प्रत्यर्पणीयम्। तावद्धनमस्मासु न वर्तते।

तदाकर्णितवती हूणकन्या उपर्युपरि अभिवृद्धविस्मया 'असन्निहितेषु भवत्सु भवदनुमतिं विनैव एते यदेवं महान्ति कार्याणि अकुरुतां तदाश्चर्यं मे भवति। श्वेता वयं वधूवरयोः परस्परदर्शनजनितानुरागयोः सम्मतौ सत्यामेव विवाहाय प्रयतेमहि। भवन्तः कन्यां न दृष्टवन्तोऽपि। भवत्सोदर्यावपि तां दृष्टवत्यौ न वा। जातु अयुतस्य रूप्याणामागमायैव इदं कुरुत इव। तथा चेत् अयुतं रूप्याणि भवन्तः परिणयन्तीति भवति। न तु तां कन्यां परिणयन्तीति। अनयोर्वचनं नूनं भवन्तोऽनुसरिष्यन्तीति कृत्वैव एवं कृतवत्याविव' इत्युवाच।

वराहस्वामी— आम्। तथैव मत्वा कृतवत्यौ। वस्तुतस्ते मम हितकामनयैव एवं कृतवत्यौ। तत्र न सन्देहः। तयोरिच्छामनुसृत्य अहमद्यावधि सर्वं कार्यमकार्षम्। अस्मिन्नेकस्मिन् विषये परं मम भावोऽन्यादृशो भवति। विवाहान्तरकरण एव मे नाभिलाषः। अपि च इयच्छीघ्रं विवाहवार्ताश्रवणमपि सङ्कोचाय भवति। प्रथमभार्या

यत्र गता तन्न ज्ञायते। पञ्चदशभ्यो दिनेभ्योऽर्वागेव विवाहं कृतवन्त इति पौराः किं न हसेयुः?

धात्री— आम्। तात्त्विको विषयः। किञ्च भवत्प्रथमपत्नी यं कमपि कलङ्कं विना झटिति यदि समागच्छेत् तस्या निराकरणं किं धर्मो भवेत्? अथ वा द्वे भार्ये कृत्वा यमबाधां अनुभवितुं किं भवतां शक्यम्।

वराहस्वामी— इयत्सु दिनेषु गतेषु सा किन्नु पुनरागमिष्यति? गता सा गतैव। मम पत्नी काचिदासीदित्येतत् स्वप्नवृत्तं खलु सम्पन्नम्। सा प्रत्यागमिष्यतीति संशयेन नाहं विवाहं प्रतिषेधामि। तथा सा प्रत्यागमिष्यतीति च न मे भाति।

धात्री— अनन्तरक्षणे किं भविष्यतीति किं वयं जानीमः। सर्वसाक्षी ईश्वरो यदि सङ्कल्पयेत् अण्डमेव खल्विदं क्षणकालमात्रेण विपरिवर्तेत। भवत्पत्नीप्रत्यावर्तनं नु अद्भुतं कार्यम्? सा यदि पतिव्रताया गर्भे सम्भूता, स्वयं चोत्तमा, भवन्तश्च गुणाढ्याः; द्वावपि युवां क्षणेन सङ्गमयेत्। न मे कदाचिदपि मनुष्यसाहाय्ये विश्वासः। अस्मदविज्ञातं सर्वमीश्वरो वर्तयतीत्येव मे प्रत्ययः।

एवं तयोः सम्भाषणे वर्तमाने तदाश्रितस्य गृहस्य कवाटं झटिति उद्घाट्यते स्म। प्रथमं श्यामार्य आगच्छत्। पश्चात् वरदाचार्यः अन्ये च त्रयो मनुष्या आगच्छन्। अन्ते पेरुन्देव्यम्बा द्वारदारुणि सलज्जं जिह्माङ्गं च स्थित्वा 'अये वराहस्वामिन्, सम्बन्धिन आगमन्। त्वां द्रष्टुमागताः' इत्यवदत्। श्वेता कन्या ससम्भ्रममुत्थाय दूरे छन्ना अवर्तत। वराहस्वामिसविधं गतः श्यामार्यः, 'वराहस्वामिन्, अयमेव ते श्वशुरः। अन्ये अस्य बन्धवः। निश्चयताम्बूलहेतोरागताः' इत्यब्रवीत्। तदाकर्णितवतो वराहस्वामिनो मनसि निशितशरप्रवेश इव आसीत्। नेत्रे निमील्य मोहितः उपधाने साचीबभूव। श्यामार्यः पुनः सकृत् द्विः आह्वयत्। स न भाषते स्म। 'साधु। बालः परिश्रान्तः निद्रातीव। कियन्नाडिकापगमे आगच्छेम' इत्युक्त्वा श्यामार्यः इतरानादाय बहि-

रगच्छत्। सा श्वेतधात्री पुनरपि वराहस्वामिखट्वासमीपमेत्य तस्य मोहं शमयामास। स नेत्रे उन्मील्य 'कच्चिद् गतास्ते' इत्यपृच्छत्। 'गताः' इति धात्री उवाच।

वराहस्वामी भृशं विषण्णः 'अनन्तरक्षणे किं नाम भविष्यतीति हि त्वं सन्देहमकार्षीः। अद्य किं वृत्तमिति कच्चिद्‌द्राक्षीः। अनयोः संविधानानुसारेणैव कार्यं चलति। अयं विवाहः कथं प्रतिबद्धव्य इति न जानामि। मम वाचमशृण्वत्यौ आग्रहिण्यौ भविष्यतः। इतिकर्तव्यता न ज्ञायते।' इत्यवदत्।

तदाकर्ण्य सा कन्या किञ्चिच्चिन्तामग्ना 'एषामागमनादेव विवाहो निर्वृत्तो भवेदिति को निश्चयः। न किमेतदस्ति यत् यत् हस्तं प्राप्नोति न तदास्यं प्राप्नोतीति? ईश्वर एव सहाय इति तस्मिन् पूर्णं विश्वासं कृत्वा साधुना मार्गेण यदि यत्नं कुर्याम स सर्वथाऽस्मान् रक्षेत्। न भवद्भिरियता विश्वासहीनैर्भाव्यम्। धीरा भवत। अस्मिन्विषये ममैका आलोचना भवति। तथा चेत् कुर्याम, शोभनं भवेदिति भाति। अस्मद्भिषग्हूण्याः भवत्सु आन्तरं प्रेम अभिमानश्चास्ति। तां सद्य आनाय्य विषयमावेद्य तत्साहाय्यं चेदन्विच्छेम सा किमप्युचितं तन्त्रं कृत्वा कल्याणमवस्थापयिष्यति।' भवत्कुटुम्बविषयाः सर्वे तस्या विदिताः। न तस्यां भवद्भिर्भाषणीयम्। अहमेव भाषित्वा कार्यं निर्वर्तयामि। तया इदं कार्यं साधयितुं शक्यमिति पूर्णो मे विश्वासः।' इत्यकथयत्।

वराहस्वामी— सा समीचीनैव आलोचना। किन्तु कः सम्प्रति तत्र गत्वा तामानेष्यति?

धात्री— अयं हि दूरध्वनिः (Telephone) वर्तते। तद्‌द्वारा तमाहूय अहमद्यैव भाषिष्ये।

तस्या आनन्दवल्ल्याः समयोचितां तीक्ष्णां बुद्धिं प्रति प्रहृष्टः सः तथैव कर्तुमन्वमन्यत। सा सद्य उत्थाय गत्वा दूरध्वनिद्वारा भिषजा हूण्या सम्भाष्य आगच्छत्। तदानीं ताभ्यामधिष्ठितस्य गृहस्य कवाटमपावृतम्। 'अग्रज, अग्रज' इति मृदु आह्वयन्ती कोमला अन्तः प्राविशत्।

तस्या वामहस्ते एको लेखः अवर्तत ; दक्षिणहस्ते मषीपुटी लेखनी च। वराहस्वामी तां दृष्ट्वा 'का वार्ता' इत्यपृच्छत्। कोमला 'अयं लेखस्तव आगतः। पुस्तकितः (registored) किलायम्। लेखवाहः तव हस्ताक्षरमपेक्षते' इति लेखं तस्मै प्रासारयत्। तदाकर्ण्य वराहस्वामी कस्य सकाशात् स्वस्य पुस्तकितो लेख आगतः स्यादिति विचिन्त्य मनाक् सम्भ्रान्त आसीत्। विवरं किमपि नाज्ञायत । तमादाय सुखविलासमपश्यत्। सः कस्माचित् पालकस्थानकादागत इत्यज्ञायत। वराहस्वामिनो विस्मयः सीमातिलङ्घी बभूव। किंविषयः स लेख इति ज्ञातुं सः अतीव कुतूहली बभूव। 'प्रतिग्रहे' हस्ताक्षरं दत्त्वा तं कोमलायै प्रत्यर्प्य तां प्रति प्रेष्य अनन्तरं लेखस्य आवरणं भित्त्वा अन्तःस्थितं वाचिकं त्वरया बहिराददे। श्वेतकन्या च वर्धमानेन विस्मयेन सम्भ्रमेण च लेखं तस्य मुखं च पर्यायेण अवदधती तस्य सविधे विनीता अतिष्ठत्। तस्य आवरणस्यान्तः सुबहूनि काकदानि तन्तुप्रोतानि निक्षिप्तान्यवर्तन्त। तानि वराहस्वामी व्यग्र आदाय व्याकोच्य सर्वोपरि स्थितं काकदमद्राक्षीत्। तस्य शिरसि वं लिखितमभवत्—

'तिरुवल्लिक्केणि 'ऐस् हौस्' पालकस्थानकप्रत्यवेक्षकेण समयसञ्जीव्यार्येण वागाजीवाय वराहस्वाम्यार्यमिश्राय लिखितो लेखः'

इति। स्वस्यैव आगतः स लेख इति निश्चितवान् वराहस्वामी अभ्यधिकीभूतेन विस्मयेन, उपरि किं लिखितमिति ज्ञातुं जातकुतूहलः पठितुमारभत—

## वाचिकम्।

आर्याः,

घनचितं प्रेषितानां एषां काकदानां दर्शनसमनन्तरं नूनं भवन्तः सम्भ्रान्ता विस्मिताश्च भवेयुः । यतोऽयं भवत्कुटुम्बसम्बन्धी मुख्यो विषयः ततः अत्र अश्रद्धामकुर्वन्तः कृत्स्नं वाचयित्वा मह्यं प्रत्युत्तरं लेखिष्यन्तीति प्रत्येमि। निर्देक्ष्यमाणान् विषयान् यदहं ज्ञातवानस्मि तद्दैवकृत्यमित्येव भाति । एषां विषयाणां ज्ञापने भवन्तः महान्ति श्रेयांसि प्राप्स्यन्तीति मत्यैव इदं भवद्भ्यः प्रेषयामि।

ह्युच्यते । एवं बन्धे ब्रह्मास्त्रबन्धे गाढं राक्षसैः प्रहरणे च तेषामन्योन्येन संपीडनं एकेनान्यस्य प्रहरणं तदुपरि प्रक्षेपणरूपं न जहति । एवं उष्णे अग्निदाहे सत्यपि शीतलतां 'शीतो भव हनूमतः' इति सीताप्रसाद-लभ्यां उपेत्य स्वयं शीतलदेहो भूत्वापि शिशिरे शीतलतरे अशोकवनिका-दौ प्राप्ते उष्णतां दाहकतां भजन्ति । हनूमद्विषये शीतलीभूतोऽप्यग्निरति-शीतलमशोकवनं ददाहेति विरोधप्रतीतिरत्र बोध्या। यद्वा शिशिरे प्राप्ते-ऽपि 'शिशिरस्येव सम्पातो लाङ्गूलाग्रे प्रतिष्ठितः' इत्युक्ततुहिनाविर्भावेऽपि उष्णतां शत्रुविषये ऊष्मलतां भजन्ति । यथोच्यते– 'तं दृष्ट्वा वानरश्रेष्ठं हनूमन्तं महाकपिम् । कालाग्निरिति सञ्चिन्त्य सर्वभूतानि तत्रसुः ॥' इति । एवं काठिन्यवन्तश्च । 'क इत्थमुपसर्पति स्थिरकठोरवीरव्रणः कपिः कद-लिकावनं कनकशैलशृङ्गाकृतिः ।' इति । खलाः आकाश एव लीयमाना इति च । युद्धादिसमय इति भावः ।

एवमद्वैतमतसिद्धजीवन्मुक्तपरतयापि कश्चिदर्थः । मुक्ताः जीवन्मुक्ताः ते च सदेहताकाल एव निवृत्ताविद्यातत्कार्याः । निवृत्तमपि तत्कार्यं बाधि-तानुवृत्त्या देहानुवृत्तिपर्यन्तमनुवर्तत इति तेषां सम्प्रदायः । निवर्तक-तत्त्वज्ञानमात्रं जीवन्मुक्तिकाल एव निष्पन्नमिति । तदेवाह हारेति । हरतीति हारः सर्वजगद्धरणदीक्षितं ब्रह्मज्ञानं तेन निषेविता अपि तद्वृत्त्यै तादृशान्तःकरणवृत्त्यै अन्तरं अवकाशं न दिशन्ति । बन्धनिवृत्तिसाधनमपि ब्रह्मज्ञानमस्ततो विनाशयन्त्येव ब्रह्माभिन्नत्वात् । यद्वा तद्वृत्त्यै तादृशतत्त्व-ज्ञानावच्छेदकान्तःकरणपरिणामरूपवृत्त्यै अन्तरं न ददति । अन्तः-करणवृत्त्यवच्छिन्नचैतन्यस्यैव ज्ञानरूपतया तादृशचैतन्यमात्रपरिशेषेऽपि प्रळये तदवच्छेदकवृत्तिनाशाभ्युपगमात् । बन्धे सति जीवन्मुक्तिदशायां बन्धेऽनुवृत्तेऽपि गाढविमर्दनेऽपि संस्कारादिरूपसर्वकार्यनिवृत्तिरूपविदेह-कैवल्यदशायामपि अन्योन्यसंपीडन तत्त्वज्ञानेन अविद्यानिवृत्तिः तया तत्कार्यसकलजगन्निवृत्तिः तया च तत्वज्ञाननिवृत्तिः अविद्यानिवृत्त्यादीनां निवृत्तिश्च इत्यादिप्रक्रियया परस्परोपमर्दं न जहति । बन्धदशायां स्थूलजग-न्निवृत्तिः संस्कारादिरूपेण तु जगदनुवर्तते । अनन्तरं तु संस्कारादिरूपस्यापि

निवृत्तिरिति तैरुच्यमानत्वादिति भावः । एवं 'मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ । समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥' इति गीतानुशासनात् जीवन्मुक्तानां शीतोष्णादिव्यथाविधूननावगमात् उष्णकाले शीतलदेहत्वं औष्ण्यासम्बद्धत्वरूपं शीतकाले तदसम्बन्धरूपमौष्ण्यञ्च भजन्तीत्यर्थः । काठिन्यवन्तः मनोदार्ढ्यवन्तश्च, खे ब्रह्मणि लीनाश्च । यद्वा देहादिविशिष्टाः जीवन्मुक्ताः देहेन्द्रियान्तःकरणादिमिथ्यावस्तुपरम्परोपहितत्वात् स्वयमपि मिथ्याभूताः यथा गन्धर्वनगरगोपुरकलशोपरिस्थितेन वन्ध्यासुतेनेत्यादिचूर्णिकोक्तास्सर्वेऽपि मिथ्यात्वदार्ढ्याय परस्परसम्बद्धतया उपवर्ण्यन्ते तद्वत् । तथा काम एव विदेहतया असङ्गतः । तस्यान्तःपुरं तु सुतराम् । तत्र चेटिकाश्च सुतमाम् । तासां कुचतटी तत्र काठिन्यञ्चेत्यादिकमसम्बद्धपरम्परा मिथ्याभूतेति तत्तुल्या एवेत्यर्थः । अत्र च 'प्रज्ञाचक्षुरवेक्ष्यमाणबधिरश्राव्याः किलाकीर्तयः । गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरात् मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि' ॥ इतिवत् मिथ्याध्यवसितिरलङ्कार उपमालङ्कारेण सङ्कीर्यत इति विवेकः ।

एवमत्र सरोभूतवेतालरूपप्राथमिकमुनित्रयपरतयापि बोधः । मुक्तानां आहारः मुक्ताहारो भगवान् । 'एतदेवामृतं दृष्ट्वा तृप्यन्ति' इत्यादिश्रुत्या मुक्तभोग्यत्वावसायात् । तेन निषेविता अपि स्वसमीपे संश्लिष्टा अपि तस्य वृत्त्यै स्थित्यै स्वेन सह एकविंतर्दिकायामवस्थानाय अवकाशं न ददति । पूर्वमुनयो हि गोपपुरे कुत्रचित् गृहदेहल्यां स्थित्वा भगवद्योगपराः स्वमध्य आगत्य संश्लिष्टेन भगवता सह विमर्दनं प्राप्य सन्तमसबहुले तत्र परस्परमुखावगमविधुराः स्वभक्तिस्नेहादिकृत कञ्चन मानसदीपमुद्दीप्य स्वमध्ये श्रीमन्तं भगवन्तं साक्षादकार्षुरिति सम्प्रदायविदः । तदेवाह— बन्ध इति । बन्धे परस्परसंश्लेषे गाढविमर्दनेऽपि दृढतरविघट्टनेऽपि अन्योन्यसंपीडनं परस्परदेहपीडाकरणं न जहति सर्वेषामपि तदानीं पीडाजननात् । उष्णे उष्णरूपे कस्मिंश्चित् दीपे आरोपिते सति शीतलता-

मुपेत्य भगवत्साक्षात्कारेण तत्कटाक्षपातलाभात् 'अभिवर्षति हर्षमार्द्रभावं तनुते ते वरदैष दृष्टिपातः ।' इत्युक्तार्द्रतारूपशीतमनस्कतां प्राप्य शिशिरे प्राप्ते' एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीतमिव ह्रदम् ।' इत्युक्तातिशीतलतरब्रह्मसंश्लेषे सति उष्णतां सर्वविधमनस्सन्तापं भजन्ति विभजन्ति । भागविभागशब्दौ समानार्थकावेवानेकत्र प्रयुक्तौ । अतो भजधातोर्विभागार्थकत्वमप्यविवादमेवेति बोध्यम् । यद्वा शिशिरे प्राप्ते 'कासारपूर्वकविमुख्यविमर्दजन्मा पण्णातटेक्षुसुभगस्य रसो बहुस्ते । स्वच्छन्दविक्रमसमुन्नमितादमुष्मात् स्रोतस्त्रयं यदभवत् तव पादपद्मात् । वेतालभूतसरसामपदिश्य वाचं प्रायेण तत्प्रसवभूमिमवाप भूयः ॥' इत्युक्तक्रमेण भगवत्संमर्दजनितेक्षुरसप्रवाहरूपे तत्पादोदकत्रिपथगाप्रवाहरूपे दिव्यप्रबन्धे वा प्रथमद्वितीयतृतीयशतकरूपे प्रसृते सतीत्यर्थो बोध्यः । तदेवं खलानामतिधूर्तस्वभावानामत्यन्तपरित्यागस्य विपुलतरं निरूपणात् तद्गुणतत्सङ्गाद्यसंक्रमेण जागरूकैर्वर्तितव्यं विवेकिभिरित्युपदेशोऽत्र फलित इति मन्तव्यमिति दिक् ।

इति खलपद्धतिः ।

---

श्रीमन्निगमान्तमहादेशिकचरणैरनुगृहीता सुभाषितनीवी द्वादशपद्धत्यात्मा । अनिपुणः दृप्तः खलः दुर्वृत्तः असेव्यः महापुरुषः समचित्तः सदाश्रितः नीतिमान् वदान्यः सुकविः परीक्षितः इतीमे द्वादश क्रमेण पद्धतीनां विषयाः । एकैकस्यां पद्धतौ द्वादश पद्यानि येषु आदिमानि दश अनुष्टुब्रूपाणि अन्त्ये द्वे भिन्नवृत्ते । आहत्य चतुश्चत्वारिंशच्छतं पद्यानि । एषु एकैकमपि सूत्ररूपम् । अतिगम्भीरं अप्राज्ञदुरवगाहार्थम् । आपाततः कश्चिदर्थः प्रतीयते । तदैव नायमेकोऽर्थोऽत्र विवक्षितः, अपि तु अस्ति बह्वर्थान्तरमिति प्रतीतिः स्वयमुदेति । ततः किञ्चिद् विमर्शे अपरः कश्चिदर्थः प्रतीयते । ततोऽपि परस्तान्निमज्जने पुनरन्योऽर्थः नूनं स्फुरेत् । परन्तु तदुपलम्भे बहूनामालस्यं स्वभावतो भवेत् । यदिदं अति-

विपुलं अद्यावधि प्रकाशितं व्याख्यानं तस्य कर्ता श्रीकाञ्चीपुराभिजनः सर्वविद्याधुरीणः सुव्युत्पन्नमतिः रसिकाग्रणीः कीर्तिशेषः 'पट्टप्पा' इति स्वजनैः सुहृद्भिश्च आख्यातः श्रीनिवासताताचार्यः न परं उक्तविधालस्य रहितः अपि तु अस्यागाधस्य सुभाषितसमुद्रस्य तलस्पर्शे जातपरमोत्साहः स्वकीयं सर्वं वैदुष्यं सहृदयतां रासिक्यं ग्रन्थकरणनैपुण्यं च प्रदर्शयन् इतरेषु सम्भावयितुमप्यशक्यया कयाचन प्राक्रियया इदं व्याख्यानं लेखितुमारभत । क्वचित् विंशतिपर्यन्तानप्यर्थान् वदति, यद्दर्शिनः विद्वत्परिश्रमज्ञाः सुधियः नासिकाग्रे अङ्गुलिं निक्षिपन्ति । इदमपूर्णं व्याख्यानमिति तु विषीदामः । पद्धतित्रयस्यैव तदुपलब्धम् । यावदुपलब्धञ्च मुद्रितम् ।

[सं]

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २३] कलि ५०५० विरोधि { कन्या तुला } { साधारण सं १ शास्त्रानुवन्ध सं २ } आहत्य सं २

## संस्कृतप्रतिष्ठा ॥

कलाशालासु संस्कृताध्यापकपदलाभमेकं उद्दिश्य कतिपये सम्प्रति संस्कृतमधीयते । देशभाषेति राष्ट्रभाषेति लोकभाषेति तस्यां तस्यां भाषायां आदरं वहन्तः संस्कृतस्य तात्त्विकं गौरवं उपयोगं च ज्ञातुमलब्धावसराः राज्याधिकारे स्थिताः पुरुषाः आङ्गलकलाशालासु माणवानां संस्कृताध्ययने उत्साहः प्रवृत्तिर्वा यथा न जायेत तथा पाठव्यवस्थाविपर्यासं कर्तुमारभन्ते । संस्कृतविद्यार्थिनां विरहे अल्पत्वे वा आङ्गलकलाशालाप्रवर्तकाः संस्कृताध्यापकं निष्कासयन्ति । तत्स्थानमेव लोपयन्ति । एवं स्थानात् प्रच्याविता बहव इदानीं संस्कृतपण्डिताः श्रूयन्ते । एवं स्थितस्य एकस्य जीवनमार्गस्योपरोधात् संस्कृतकलाशालासु शिरोमणिप्रभृतिपरीक्षाहेतोरधीयानानां विद्यार्थिनां सङ्ख्या क्रमेण अपचीयते । एको द्वौ वा कक्ष्यासु विद्यार्थिनौ । अत्यन्तरिक्ता अपि काश्चन कक्ष्याः । एवं राज्याधिकारे स्थितानां एकद्वानामभिप्राये संस्कृतस्य जीवितमिदानीं लम्बते । यद्यपि विद्यामन्त्री कश्चित् संस्कृतप्रियः तदभिवर्धने तत्परः स्यात् तेनापि संस्कृतस्यापेक्षितावधि अभिवर्धने प्रतिष्ठापने च कियदुपकर्तुं शक्यम् । परीक्षासु विजयं प्राप्य कलाशालासु कतिपयग्रन्थभागपाठनमात्रेण कालं यापयद्भिः संस्कृतविद्भिः कया विधया संस्कृतविद्या वर्धयितुं प्रचारयितुं च शक्यते ? संस्कृतप्रणयिभिः सर्वैः इदं अतिगाढं पर्यालोचनीयम् । विशिष्य विद्वद्भिः । संस्कृतश्रद्धालवोऽपि अविद्वांसः संस्कृतेनाद्य लोकस्य क उपयोग इति स्फुटं ज्ञातुं जनान् बोधयितुं च न शक्नुवन्ति । तेषां साहाय्यं सम्पाद्य पण्डिता यदि सोत्साहं प्रवर्तेरन् नूनमुद्देश्यसिद्धिः स्यात् ।

अद्य यद्यपि वयमगत्या पराधीनेषु स्थानेषु स्थिता देहयात्रां वर्तयामः तथापि इयं दशा यथा अस्मद्वराणां नानुवर्तेत, यथा ते अस्मत्पूर्वपुरुषा इव स्वतन्त्रा एव सन्तः आत्मनो लोकस्य च उपकुर्वन्तो भवेयुः तथा काचन स्थितिः सम्पादनीया । इदम्परा संस्कृतपरिषत् काचन प्रतिष्ठापनीया । ये बुद्धिमन्तो बालाः तान् अन्विष्योपलभ्य प्रोत्साह्य अद्यतनलोकस्थित्युपयोगितया संविहिते संस्कृतविद्यामार्गे प्रवर्त्य पाण्डित्ये पूर्णे, वाग्मित्वे सम्पन्ने, जनानां तत्त्वबोधनाय तत्र तत्र वासयितुं यत्नः कार्यः । संस्कृतपण्डितपदे स्थितं एकैकमपि मनस्विनमिदानीं सानुरोधं सनिर्बन्धं च वयमुपसर्तुमिच्छामः । संस्कृतमुपजीवन्तो वयं तस्य क्षेमाय शक्त्या यत् किमपि कर्तुमर्हामः । देहयात्रां लोकयात्रां च केवलां कोऽद्य न करोति । तन्मात्रे यदि संस्कृतविद्याफलपर्यवसानं तर्हि तस्या अत्यन्तमुपेक्षणे अत्यन्तपरित्यागे का हानिः । जीवनं हि प्रेष्यभावेन, भारवहनेन, भाषान्तराध्यापनेन वा भविष्यत्येव । भाषान्तराणि शतमप्यधीत्य यन्न साध्यं तत् संस्कृतविद्याप्रचारसाध्यं परमं फलमस्ति । इदमस्मत्सुहृदः सर्वे विज्ञातुं बुद्धौ धारयितुं चार्हन्ति । ततस्तदनुगुणं प्रवर्तितुं च । एकस्याः संस्कृतविद्यायाः यथावत् प्रचारविरहादेव लोके विद्यमानं सर्वं सङ्कटमापतितम् । संस्कृताध्यायिष्वपि संस्कृतं भाषान्तरवत् जीवनोपायतया केवलं वर्तते, न तु उद्दिष्टपरमफलसाधनतया । तस्मादालस्यं, औदासीन्यं, केनापि कारणेन यदि वैमनस्यं किमप्यस्ति तदपि परित्यज्य "संस्कृतस्य कृते तद्द्वारा लोकस्य कृते किमपि कर्तव्यम् किमपि करिष्यामि" इति दृढः सङ्कल्पः क्रियताम् । ततः सुहृद्भिरालोच्यताम् । तेषां साहाय्यं यावच्छक्ति सम्पाद्य, जनानां जीवनं आचारं विद्यां अन्योन्यं प्रति वृत्तिं च प्रति धर्मशास्त्रेषु विधानेन काव्यनाटकादिषु कथामार्गेण च यदुक्तं तत् यथावत् परिशील्य, स्वानुष्ठानेन परेषां विश्वासमुत्पाद्य, लोकस्य तत्र विश्वासः तदनुसारिणी प्रवृत्तिश्च यथा जायेत तथा लघुलघु सम्मेलनप्रवर्तनप्रवचनादि क्रियताम् । यदि विशिष्य किमपि ज्ञातव्यं भवेत् विचार्यं वा भायात् तस्य निवेदने यथाऽस्मद्बुद्धिबलं तत्र वयं उचितमावेद्य सहकर्तुं सज्जाः स्मः । यथाकथंचित् काञ्चन प्रवृत्तिं संस्कृतप्रियैः क्रियमाणां द्रष्टुं वयमतीवोत्कण्ठिताः ।

स्वस्ति संस्कृताय ।

# स्यमन्तकोपाख्यानम् ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

—:o:—

सत्राजितनामधेयः कश्चिद्राजा सदा परमः सूर्यभक्त आसीत् । भक्त्या तुष्टो दिवाकरः तस्मै स्यमन्तकनामानं मणिं प्राददात् । स तं मणिं कण्ठे बिभ्राणो रविरिव भ्राजमानो द्वारकां प्राविशत् । तमवलोक्य जनाः सूर्योऽयमिति शङ्कितास्सन्तोऽक्षैर्दीव्यते भगवते एष सविता त्वां दिदृक्षुरायातीति शशंसुः । श्रीकृष्णो बालानां वचनं निशम्य प्रहस्य तान् प्रति 'आगच्छन् असौ न भास्करः, अपि तु सत्राजितो मणिना विद्योतमान आयाति' इत्याह स्म । भाग्यवान् सत्राजितः स्वगृहं प्रविश्य देवसदने विप्रैर्मणिं न्यवेशयत् । स मणिः प्रतिदिनं अष्टौ स्वर्णभारान् असृजत् । यस्मिंराज्ये स मणिरभ्यर्चितस्स्यात् तत्र कदाचिदपि दुर्भिक्षम्, अकालमृत्युः, अमङ्गळं, दुःखहेतव आधिव्याधिचोराश्च नाभवन् । सत्राजितश्शौरिणा यदुराजोग्रसेनार्थं मणिं याचितोऽप्यर्थकामुको याच्ञावैफल्यमविचारयन्नेव तस्मै नैव विततार । एकदा तद्भ्राता प्रसेनः तं मणिं कण्ठे प्रतिमुच्य, हयमारुह्य मृगयार्थं वने व्यचरत् । तदा कश्चित् केसरी साश्वं प्रसेनं हत्वा मणिमाच्छिद्य गिरिं विशन् मणिमिच्छता जाम्बवता न्यहन्यत । तेन स मणिर्बिले स्वकुमारस्य क्रीडनकश्चक्रे । सत्राजितस्स्वभ्रातरं मणिं चापश्यन् परितप्य, 'स कृष्णेन प्रायो मारितस्स्यात्' इत्यकथयत् । जनाः एतद्वचश्श्रुत्वा कर्णे कर्णे अजपन् । क्रमेण भगवानपि तद्वचनमाकर्ण्य आत्मनो दुर्यशोलेपं प्रमार्ष्टुं जनैस्सह प्रसेनपदवीमन्वगच्छत् । जना वने सिंहेन प्रसेनमश्वं च हतं, तं चाद्रौ जाम्बवता प्रमापितं चावागच्छन् । भगवान् भीमम् अन्धेन तमसा वृतम् ऋक्षराजबिलं बहिर्जनानवस्थाप्य एक एव प्रविवेश । स तत्र मणिश्रेष्ठं बालक्रीडनकं कृतं वीक्ष्य हर्तुं निश्चितमतिः अर्भकसमीपेऽवतस्थे । धात्री तमदृष्टपूर्वं नरमवेत्य भीता चुक्रोश । तदाकर्ण्य बलिनां वरो जाम्बवान् क्रुद्धस्तमभ्यद्रवत् । स तं प्राकृतं पुरुषं मत्वा आत्मनः स्वामिनापि तेन भगवता सह युयुधे । विजिगीषतोस्तयोरायुधाश्मद्रुमैर्भुजैश्च आमिषार्थे श्येनयोरिव भयङ्करं युद्धमभवत् । तयोर्वज्रनिर्घातनिष्ठुरैरितरेतरमुष्टिभिरविश्रममहर्निशम् अष्टाविंशतिर्दिनान्यायोधनं समवर्तत । जाम्बवान् श्रीकृष्णमुष्टिनिर्घातविश्लथाङ्गोरुसन्धिबन्धनः क्षीणबलः स्विन्नगात्रः 'कदापि मद्बलविनाशो न

दृष्टः । अहो अधुना मृतप्रायोऽभवम् ।' इत्येवमतीव विस्मितः तमेवमवदत्—'त्वां निखिलजगदेककारणं चेतनाचेतनशरीरकं विष्णुं जाने । यस्य ईषदुद्दीपितरोषकटाक्षमोक्षैः क्षुभितनक्रतिमिङ्गिलः समुद्रो वर्त्मादिशत् । येन स्वयशसे सेतुर्निरमीयत । येन लङ्काऽदह्यत, यस्येषुभिश्छिन्नानि दशकण्ठशिरांसि भुवि पेतुः, स त्वमिति मन्ये' इति । भगवान् कृपावान् इत्थं विदितवेद्यं भक्तं तं क्षेमङ्करेण पाणिनाऽभिमृश्य तं प्रति अनेन मणिना प्रसक्तमात्मनो मिथ्यापवादमपनेतुं वयं बिलमागता इति मेघगम्भीरया गिराऽब्रवीत् । एवमुक्तो जाम्बवान् अनुपजातरजस्कां स्वदुहितरं जाम्बवतीं मणिना सह उपायनार्थं मुदा श्रीकृष्णायोपजहार । ततोऽन्यैर्मणिश्रेष्ठैश्च पूजितो भक्तवत्सलो भगवान् तस्मै पुनरावृत्तिवर्जितां परां मुक्तिं विश्राणयामास । द्वार्स्थां जना बिलं प्रविष्टस्य शौरेर्निर्गममविलोक्य द्वादशाहानि प्रतीक्ष्य दुःखितास्सन्तो द्वारकां ययुः । देवक्यादयो बन्धवो द्वारकावासिनो जनाश्च श्रीकृष्णं बिलादनिर्गतं निशम्य शोचन्तः सत्राजितं शपन्तश्च श्रीकृष्णोपलब्धये दुर्गामभजन् ।

तदनु श्रीकृष्णं द्रक्ष्यथेति तदाशीर्वादात तेषां पुरतः समणिस्सदारो हरिः तान् हर्षयन् प्रादुर्बभूव । सर्वे जना मृतं बन्धुं पुनरागतमिव पत्न्या सहितं मणिग्रीवं हृषीकेशमुपलभ्य जातमहोत्सवा आसन् । भगवान् सत्राजितं समाहूय सभायां राज्ञ उग्रसेनस्य सन्निधौ मणिलाभप्रकारमाख्याय तस्मै सत्राजिताय मणिमर्पयामास । ततः सोऽतिव्रीडितो रत्नं गृहीत्वा अवाङ्मुखः याच्ञाभङ्गकरणमिथ्यापवादापादनादिरूपेण स्वेन पाप्मनाऽनुतप्यमानः स्वभवनं जगाम । स तमेवापराधमनुध्यायन् बलवता भगवता विरोधेनाकुलश्चेत्थं चिन्तयामास । निजमागः कथमपनयेयम् । कथं वाऽच्युतः प्रसीदेत् । कस्मिन् कर्मणि कृते भद्रं स्यात् । कथं वा मां जनो न शपेत् । दूरविचारानभिज्ञं मन्दमतिं वित्तैकासक्तं मां धिगिति । एवं विचार्य, स्त्रीरत्नं दुहितरं रत्नं च कृष्णाय दास्यामि, यदि न दास्यामि कृष्णस्य चित्तसमाधिर्न भवेदिति निश्चित्य शुभलक्षणां स्वसुतां सत्यभामां मणिं च उद्धृत्यादाय कृष्णायोपजहार । भगवान् कृतवर्मशतधन्वादिभिर्बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां तां सत्यभामां यथाविध्युपयेमे । भगवान् सत्राजितं प्रतीत्थमकथयत । हे नृप, वयं मणिं न प्रतीच्छामः । सूर्यभक्तस्य तवैव मणिरास्ताम् । वयं तु दुर्भिक्षादिशान्तिरूपफलमात्रं वा त्वमपुत्रः त्वदीयं धनमस्माकमेवेत्यन्ततो मणिं वा लप्स्यामह इति ।

भगवान्, पाण्डवाः कुन्ती च बिलद्वारेण जतुगृहान्निर्गता इति जानन्नपि प्राकृतलोक इव कुन्त्यासमेतान् पाण्डवान् जतुगृहे दग्धानाकर्ण्य कुलोचितसंव्यवहारार्थं रामेण सहितः कुरून् प्राप्य आत्मतुल्यदुःखान् भीष्मकृपविदुरगान्धारीद्रोणान् समागम्य दुःखं प्राप्तमित्येवं तान् सान्त्वयामास । तदा अक्रूरकृतवर्माणौ भगवानधुनाऽत्र नास्ते अयमेवावसर इति मत्वा शतधन्वानं प्रति, सत्राजितस्य मणिः कस्मात् त्वया न गृह्यते योऽस्मभ्यं सत्यभामां दास्यामीति प्रतिज्ञाय अस्माननादृत्य कृष्णायादात्; स स्वभ्रातरं मृतं प्रसेनं कुतो नान्वियात् इत्यभणताम् । एवं ताभ्यां भेदितमतिः पापश्शतधन्वा मणिलोभात् शयानं सत्राजितं सौनिकवत् मारयित्वा अनाथवत् तन्नारीणां आक्रोशन्तीनां रुदन्तीनां च सतीनामेव मणिमादायायात् । सत्यभामा पितरं हतं वीक्ष्य शोकाक्रान्ता तात तातेति विलप्य मृतं तं तैलद्रोण्यां निधाय हास्तिनपुरमासाद्य स्वपितृमरणमजानत इव स्थिताय श्रीकृष्णाय शतधन्वकृतं पितुर्वधमाचष्ट । तन्निशम्य ईश्वरौ रामकृष्णौ नरचेष्टामभिनयन्तौ अश्रुपूर्णनेत्रौ अस्माकं परमं दुःखं प्राप्तम् इत्येवं विलेपतुः । ततो भगवान् अग्रजसत्यभामाभ्यां साकं द्वारकामागत्य शतधन्वानं हन्तुं मणिं हर्तुं च उदयुङ्क्त । शतधन्वाऽपि श्रीकृष्णस्योद्योगं श्रुत्वा स्वप्राणरिरक्षिषया कृतवर्माणमक्रूरं च साहाय्यार्थमयाचत । स ईश्वरयो रामकृष्णयोः प्रभावातिशयं जानानाभ्यां ताभ्यां प्रत्याख्यातो मणिमक्रूरे न्यस्य शतयोजनैर्गन्तव्यं देशं प्राप । रामजनार्दनौ गरुडध्वजं रथमारुह्य महावेगैर्वाहैः सत्राजितस्य घातकं शतधन्वानमन्वसरताम् । स मिथिलाया उपवने शतयोजनदेशात्परं गन्तुमशक्त्या पतितं हयं विसृज्य सन्त्रस्तः पद्भ्यामधावत् । श्रीकृष्णोऽपि रुषा तमन्वद्रवत् । पदातिश्श्रीकृष्णः तीक्ष्णधारेण चक्रेण पदातेर्धावतस्तस्य शिर उत्कृत्य अक्रूरे मणिरस्तीति सर्वज्ञतया विदित्वापि रामवञ्चनार्थं तस्यान्तरीयोत्तरीययोर्मणिं विचित्य अलब्धमणी रामान्तिकमधिगत्य वृथा हतश्शतधन्वा तत्र मणिर्न विद्यत इति बभाषे ।

ततः सर्वज्ञेन एवं चेष्टितं मद्वञ्चनायेति मत्वा गूढमन्यू रामः श्रीकृष्णं प्रति, स मणिश्शतधन्वना कस्मिंश्चित्पुरुषे न्यस्तः, तमन्वेष्टुं द्वारकां व्रज, अहं मम प्रियतमं वैदेहं द्रष्टुमिच्छामीति गदित्वा मिथिलां विवेश । जनको रामं वीक्ष्य प्रीतमानसः सहसोत्थाय अर्हण्यं तम् अर्हणैर्विधिवदर्हयामास । रामो मिथिलायां कतिचिद्वत्सरानुवास । तदा

प्रीतियुक्तेन जनकेन मानितस्सुयोधनो रामात् गदाधारणविद्यामगृह्णात्। केशवो द्वारकामेत्य शतधन्वनो निधनं मणेरप्राप्तिं च प्रियाया प्रियं कुर्वन्निव अभ्यधत्त। भगवान् हतस्य श्वशुरस्य सत्राजितस्य परलोकप्राप्तिहेतुमुत्तरक्रियां सुहृद्भिरस्माकं कारयामास। मणिहरणार्थं शतधन्वनः प्रवर्तकौ भयकृतवेपथू अक्रूरकृतवर्माणौ श्रीकृष्णेनानुमतोपेक्षितौ द्वारकायाः सकाशात् प्रोपतुः। श्रीकृष्ण आत्मनि मणिं तिरोधापितवानिति सत्यभामारामादीनामविश्वासं परिहर्तुं वाराणस्यां वसन्तमक्रूरं दूतैस्समानयत्। केचन ऋषय एवमुदैरयन्–अक्रूरे प्रोषिते द्वारकौकसामशुभं तापत्रयमासीत्, अतोऽक्रूरमानिनायेति। नैतद्युक्तम्। तापत्रयनिवर्तकानां मुनीनामाश्रयभूतस्य श्रीकृष्णस्य द्वारकायां निवासे सति दुःखसम्भावनापि न घटते हि। अन्ये ऋषय इत्थमलपन्– पुरा किल काशीप्रदेशेषु पर्जन्येऽवर्षति काशीशः तत्रागताय श्वफल्काय स्वसुतां गान्दिनीं व्यसरत्, ततः स पर्जन्यः काशीदेशेष्ववर्षत्, श्वफल्कस्य सुतः पितृतुल्यप्रभावोऽक्रूरो यत्र यत्र वसति तत्र तत्र पर्जन्यो वर्षति, तत्रोपतापा अपमृत्युहेतवश्च न भवन्तीति वृद्धानां वचनमाकर्ण्य अक्रूरमानयदिति। एतदपि न सम्यक् यतोऽक्रूरावस्थानमात्रं तत्र वृष्टौ उपतापाद्यभावे च न कारणं किन्तु मण्यवस्थानमपि। अतः स स्वस्मिन् अविश्वासस्य परिहारार्थमेव तमानिनाय। आनीतं तं पूजयित्वा, महाभागवतस्यास्य मया दत्तेऽपि मणौ अपेक्षा नास्त्येव, तस्मादाहूतो मणिना सहैवागत इति जानन् एवमुवाच–'हे दानपते, श्रीमान् स्यमन्तको मणिः शतधन्वना त्वयि न्यस्तः, अधुनाऽऽस्ते च. अस्माकं शतधन्वनो वधात्प्रागेव त्वयि मणेस्सद्भावो विदितः, सत्राजितोऽपुत्रः, तस्य दौहित्राः तस्मै तिलोदकानि पिण्डांश्च दत्त्वा ऋणमपाकृत्य अवशिष्टं तदीयधनं गृह्णीयुः, अयमर्थः शास्त्रसम्मतः, तथापि अन्यैर्धर्तुमशक्यो मणिः शोभनाचारे त्वय्येवास्ताम्, किन्तु अग्रजादयः मणिमहं तिरोधापितवानस्मीत्याशङ्कन्ते, अतो मणिं दर्शयस्व, बन्धूनां चित्तसमाधिमावह, यतः ते स्वर्णवेदयोऽविच्छिन्ना मखा अद्य प्रवर्तन्ते अतः त्वय्यस्त्येवेत्यनुमिनोमि' इति। अक्रूर एवं सामोक्तिभिर्हृदि स्पृष्टः सूर्यसमप्रभं वाससा छन्नं मणिमादाय श्रीकृष्णाय प्रत्यपादयत्। श्रीकृष्णः स्यमन्तकं रामादिभ्यो दर्शयित्वा स्वस्य मिथ्याभिशापं प्रमृज्य स्वहस्तेनैव पुनस्तस्मै तं प्रत्यार्पयत्।

# वाणिज्यम् ॥

(Pandit K. S. Ramaswami Sastri, Baroda.)

——:o:——

2

न केवलं मनुष्याः देवा अपि कर्मविनिमयं परोपकारैकफलकं कुर्वन्तो विद्यन्ते। अल्पं हुतं हविर्नाममात्रेण जुषाणा देवा अनल्पां वृष्टिं सर्वजनोपकारिणीं पर्जन्यद्वारा विदधति। गायत्र्याऽभिमन्त्रिता अपः प्रतिगृह्णन् भगवान् भास्करः निरतिशयमौष्ण्यं प्रकाशं चानल्पं प्रजाभ्यो वितरति। तथा वायुरग्निश्च जगदुपकारमेव निर्मूल्यतया कुरुतः। भगवती वसुन्धरा तु बीजमेकमुप्तं गृहीत्वा सहस्रगुणं फलं प्रजाभ्यो वितरति। वृक्षाश्च रोपयितुरनन्तामप्रमेयां च फलवृष्टिं प्रसुवते।

न त्वेते गणयन्ति कियदेभिरर्पितम्; तदर्हं कियच्चात्मना प्रत्यर्पणीयम्; कियांश्चास्माकं लाभः संबभूवेत्यादिकम्। सेयं वाणिज्यस्य पदार्थविनिमयस्य च दैवी भावना या पुरातने काले भारतीयैर्भाविता। जनसमाजस्योपकारि च वाणिज्यमासीत्।

अस्त्यपरा भावना दानवी तस्यैव वाणिज्यस्य। इयञ्च भारतभूमौ सर्वदा गर्ह्या बभूव। दानवाश्च सर्वं जगदात्मसात्कर्तुमभिलषन्ति। दानवं वाणिज्यमपि सर्वं जगदात्मनोऽर्थेऽभिक्लृप्तमिव भक्षयितुं प्रवर्तते। न केवलं स्वीये देशे स्थितान् अपि तु देशान्तरस्थानप्यर्थान् प्रचारायानाय्य बहुमूल्यमर्जयितुमिदं प्रवर्तते। मूल्यस्याधिक्यं दिने दिने प्रवर्धमानं जनसमाजस्य सर्वतोमुखमसह्यं दुःखं अन्ते च विनाशमेवोत्पादयेत्। एतादृशेन वाणिज्येन प्रतिदिनमभिवर्धमानेन पाश्चात्यदेशाः महायुद्धेषु महालोभमूलकेषु विलुप्ता अपि भवन्ति। त्रिंशद्वर्षान्तराले द्विः घोरतरं युद्धमनिवार्यं बभूव। हन्त! दुर्वाणिज्यस्य सर्वतोमुखः प्रभावोऽयम्।

प्रजाभिरपेक्षितानर्थान् निगूह्य विनाश्यान्यत्र वा प्रेष्य अनल्पं मूल्यं गृह्णन्तो वणिजः दुष्पूरं लोभान्धकूपं पूरयितुं प्रवर्तमाना नात्मनः न परस्य न जनसमाजस्योपकुर्वते परन्तु महतीं हानिमुत्पादयन्ति।

इयञ्च दानवी भावना नासीद्भारतभूमौ। स्वं स्वं कर्म कुर्वाणा भारतीयाः—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥

इत्युपनिषदुपदेशं मानयन्त शरीरस्यानित्यतां कामनाया दुष्पूरतां सच्चरित्रस्य महत्ताञ्च साक्षात् परम्परया वा वेदेतिहासपुराणश्रवणादिना जानन्त आसन्।

पाश्चात्यवाङ्मयस्याध्ययनेन निवर्तिते संस्कृतवाङ्मयस्याध्ययने वेदाः धर्माः सद्भावनाश्च विलयं सर्वात्मना गताः। शान्तिप्रधाना अन्तर्मुखी भारतीयभावना रथ्यास्वाकृष्यमाणा कुलवधूरिव बलाद्वाणिज्यप्रवृत्तैराकृष्यमाणा विपरीतं रूपं नूतनतयाऽभजत। न केवलं जीवनोपयोगिष्वर्थेषु परन्तु विद्यास्थानेष्वप्यखिलेषु विश्वविद्यालयान्तेषु विद्या वाणिज्यवृत्त्यैव दीयते गृह्यते च। दिने दिने च विद्यादानस्य मूल्यं वर्धते। न केवलं पञ्चमवर्षात् परन्तु ततः पूर्वमपि बालका द्रव्यग्रहणेनाध्याप्यन्ते। प्रौढा अपि प्राप्तवयस्का न परित्यज्यन्ते। विद्यावाणिज्यं दिने दिने अभिवर्धमानं न कञ्चन भारतीयं परित्यजति। अहो प्रभवति सर्वात्मना तदिदं वाणिज्यम्।

---

षेक्स्पियर् कृतं

# यथाभिमतम्॥ II 5.

## प्रेक्षणकम् 5। वन एव प्रदेशान्तरम्।

अमीन्स् जाक्विस् अन्ये च प्रविशन्ति।

### गीतम्

अमीन्स्— हरितदलोद्धुरपादपमूले
योऽत्र मया सह वाञ्छति शयितुम्।
यश्च मदाञ्चितकोकिलकण्ठ-
ध्वनिरमणीयं गास्यति हर्षात्।
स इहागच्छतु स इहागच्छतु स इहागच्छतु

इह स द्रक्ष्यति
न प्रतिपक्षम्
किन्तु प्रावृट्
समयं रूक्षम् ।

जाक्विस्— भूयः भूयः, याचामि, भूयः

अमीन्स्— तत् त्वां विषण्णं करिष्यति, आर्य जाक्विस् ।

जाक्विस्— तदहमभिनन्दामि । भूयः याचामि, भूयः । गीताज्जायमानं विषादमहं आचूषेयं नकुल इव अण्डानि । भूयः याचामि, भूयः ।

अमीन्स्— कण्ठो मे विषमः । निश्चितमिदं यदहं त्वां न आनन्दयिष्यामि ।

जाक्विस्— नाहं भवन्तं मामानन्दयन्तमिच्छामि । अपि गायन्तमिच्छामि । एहि, भूयो गाय । अपरं श्लोकम् । किमिति भवन्तः तान् अभिदधति ? श्लोका इति ।

अमीन्स्— किमिति भवान् अभिधास्यति ? आर्य, जाक्विस् ।

जाक्विस्— न । न मे तेषां नामसु आदरः । तैः न मे किञ्चन कार्यमस्ति । कच्चिद् गास्यसि ?

अमीन्स्— भवदभ्यर्थनया, न तु मम प्रीतये ।

जाक्विस्— यद्येवं साधु । यदि मे लोके कश्चिदभिनन्दनीयोऽस्ति स भवानेव । अपि तु यदभिनन्दनं नाम किमपि वदन्ति तत् श्वमुखवानरयोर्द्वयोः समागम*तुल्यं भाति । किञ्च यदा कश्चिन्मां अभिनन्दति तदा 'मया किमपि दत्तम् ; तदर्थं याचकोचितान्यभिनन्दनानि करोति' इति मे मतिर्भवति । एहि, गाय । अथ न गास्यसि, नियच्छ जिह्वाम् ।

अमीन्स्— साधु । मम गीतं समापयिष्यामि । (अनुचरान् प्रति)

---

* समागमे सति श्वमुखवानरौ रुष्टौ मुखं विवृत्य दन्तान् घट्टयत इत्याहुः ।

सौम्याः, तावत् भूमिमास्तृणुत। महाराजः अस्य वृक्षस्य छायायां पानं करिष्यति– स इमानि सर्वाणि दिनानि भवन्तमन्विष्यन् आस्त।

जाक्विस्– अहं च इमानि दिनानि तं परिहरन्नभूवम्। अतिमात्रं हेतुवादनिरतः सः न मे सहवासयोग्यः। यावतो विषयान् स विचारयति तावतोऽहमपि विचारयामि। परन्तु तेषां कृतेऽहं सर्वेश्वरं कृतज्ञभावेन प्रणतोऽस्मि। न तु दृप्तो विकत्थमानोऽस्मि। एहि, कूज, एहि।

## गीतम्

आशापाशं यः प्रतिरुन्धे (सर्वे मिलित्वा)
काननभूमिषु चेच्छति वस्तुम्
निजमाहारं स्वयमन्विच्छन्
यल्लब्धं स्यात् तेन च तुष्यन्।

स इहागच्छतु स इहागच्छतु स इहागच्छतु
स इह द्रक्ष्यति
न प्रतिपक्षम्
किं तु प्रावृट्-
समयं रूक्षम्

जाक्विस्– मम प्रतिभाशक्तिं विडम्बयितुं प्रवृत्तेन मया ह्यः एकं पद्यं कृतम्। तदहं ते अस्यामेव श्रुत्यामुदाहरिष्यामि।

अमीन्स्– गास्यामि च तदहम्।

जाक्विस्– एवं तद् भवति–

भवति यदीदं यत् खरं भूतः
कोऽपि धनानि त्यजति सुखं च
दग्दमे दग्दमे दग्दमे
सोऽत्र द्रष्टा
स्ववदतिमूढान्
यद्यायास्यति
मम तु समीपम्।

अमीन्स्– किमिदं 'दग्दमे' नाम

जाक्विस्– ग्रीस् देशप्रसिद्धमाह्वानमेतत्, येन जडाः मण्डलीभवनाय

आदिश्यन्ते। अहं तावद् गमिष्यामि स्वप्तुं यदि शक्यम्। यदि तु न शक्यं ईजिप्त्-अत्र प्रथमजातान् उपालप्स्ये।*

अमीन्स्— अहं च प्रभोरन्वेषणाय गच्छामि। तस्य पानगोष्ठी सज्जीकृता। [एकैकशो निर्गच्छतः।

---

## प्रेक्षणकम् ६। वन एव प्रदेशान्तरम्।

आर्लेण्डो प्रविशति। आडम् च।

आडम्— प्रिय प्रभो, न मया इतः परं गन्तुं शक्यम्। अहो आहारविरहादहं म्रिये। अत्राहं अधः शये। खन मे गर्तम्। स्वस्ति तेऽस्तु, प्रिय प्रभो।

आर्लेण्डो— किमेतत् आडम्, नास्ति ते धैर्यम्? जीव किञ्चित्। समाश्वसिहि किञ्चित्। प्रहर्षय किञ्चिदात्मानम्। यद्यस्मिन् दुर्वने क्रूरः कोऽपि जन्तुरस्ति, तस्य वा अहमाहारीभविष्यामि तं वा तव आहारार्थं आहरिष्यामि। भयात् त्वं मृत्युं सन्निहितं पश्यसि, न दौर्बल्यातिशयात्। मदर्थे समाश्वस्तो भव, धारय च मृत्युं बाहुदूरे। अद्यैव प्रतिनिवर्तिष्ये। यद्यहं भोक्तुं ते किमपि नानयामि ततो मर्तुं ते अनुमतिं दास्यामि। यदि तु मदागमनात् पूर्वं त्वं म्रियसे त्वं मे प्रवृत्तिमुपहसितवान् भवसि। अये, साधु भाषितम्। प्रहृष्टो लक्ष्यसे। क्षणेन त्वया सह वर्तिष्ये। केवले तु अनावृते त्वं शयानोऽसि। एहि कंचित् छायायां त्वां नीत्वा शाययामि। न च त्वया मृतेन भाव्यं यद्यस्मिन् मरौ यः कोऽपि एकः प्राणी जीवेत्। प्रहृष्टो भव, सौम्य आडम्।

[निष्क्रान्तौ।

---

* अस्मिन् देशे प्रथमजाता जनाः पश्चादागतानां कृते निहता इति कथा श्रूयते। अत्र अग्रजो राजा दुरवस्थामनुभवन् शोचनीय इति व्यञ्जनमुद्दिष्टं भाति।

# सञ्जल्पः ॥

—❀—

जाना — अयि, अश्रौषीः कथाम् । कः कालः कः कालः । यद्येवं स्थितिर्वर्तेत कथं जीवितुं शक्यम् ?

दत्ता — ब्रूहि तावत् शृणुमः । किं वृत्तम् । जानीम एव कालोऽतिकुटिलः संवृत्तः । उत्तरोत्तरं कुटिलतरः कुटिलतमश्च भवति । किं कुर्याम कं ब्रूयाम । दैवेन इदं सर्वं प्रतिविधेयम् । तस्य तु चक्षुर्नास्ति ।

जाना — नन्वद्य प्रातः दशभ्यः किञ्चिदधिका घण्टाः स्युः । अन्तरवर्तिषि पाकमवद्धती ।

दत्ता — आम् तावत् । न खलु ते साह्यं कर्तुं मनुष्याः सन्ति । त्वयैव सर्वदा पक्तव्यम् । त्वयैव परिवेष्टव्यम् । त्वयैव स्थलशुद्धिः कर्तव्या । त्वयैव क्षुद्रकार्याणि सर्वाणि कर्तव्यानि । अस्मिन् काले सद्भिरपि बन्धुजनैः क उपकारः ? भिन्नभिन्नस्थलेषु विप्रकीर्णा वसन्ति । तस्मिन् तस्मिन् कुटुम्बे बहूनि सङ्कटानि । गतागतं वा किं सुकरं भवति ? कियान् कायक्लेशः ! कियानर्थव्ययः ?

जाना — अम्बा मे शालायां पत्राणि सीव्यन्ती अवर्तिष्ट ।

दत्ता — कालो हि कथमपि यापयितव्यः । वयोऽतीतम् । किमपि कर्तुं न शक्यते । एकस्मिन् स्थाने उपविष्टा सती इदं वा करोमीति तावत् तपस्विनी मन्यते । भवतु । तव च प्रतिवेलं उपदशानि भोजनपात्राणि अपेक्षितानि । क्रयणे कियन्मूल्यं देयम् ? एकैकमपि हि वस्तु अद्य बहुगुणविवृद्धमूल्यम् । तथापि दुर्लभम्...

जाना — वीथ्यां फलविक्रयणध्वनिः तस्याः कर्णे अपतत् ।

दत्ता — वृद्धा तपस्विनी । आहारे न तथा रुचिः स्यात् । यदि तदा तदा फलानि भुञ्जीत रसना च तर्पिता स्यात् आरोग्यं च सम्पद्येत । जानासि हि बहवः ऋणं कृत्वाऽपि फलानि क्रीत्वा उपयुञ्जते । जीवनावधि तावत्...

जाना — पुरुषः कश्चित् त्रीण्येव फलानि हस्ते कृत्वा फलं फलमिति शब्दायमानोऽगमत् ।

दत्ता — अन्यत् सर्वं विक्रीतवान् भवेत् । जना हि सम्प्रति क केति वस्तुभ्यः अभिसम्पतन्ति । तथा......

जाना — तेषां कृते चतुर आणकान् अपेक्षमाणः सः 'अर्धाधिकौ द्वौ

आणकौ दास्यामि । सम्मतिश्चेत् देहि । न चेत् याहि' इति ममाम्बयाऽभिहितः, तथा भवत्विति अङ्गीकरोति स्म ।

दत्ता— आतपोऽभूत् । यावल्लाभं गृहीत्वा गृहं गच्छेमेति मनितवान् भवेत् । अद्राक्षीः किल द्वित्रैर्दिनैः आतपः कियदुग्र इति । बहिरागन्तुम......

जाना— अङ्के स्थितौ द्वावाणकौ तस्मै दत्त्वा अर्धाणकाय शालाबिले अन्तः पेटिकायां चान्वेषणमकार्षीत् ।

दत्ता – आमम्ब, अल्पस्य द्रविणस्य हेतोः समयेषु महत् सङ्कटम् अनुभवितव्यं भवति । यावदपि स्थितं क्षणाद् व्ययितं भवति । इदमिति तदिति कियन्ति वस्तूनि क्रेतव्यानि भवन्ति । तस्य सर्वं......

जाना— कुत्राप्यविन्दन्ती मां प्रति शब्दमकार्षीत्–'कुत्र कन्ये वर्तते, कुत्र वर्तते । न खलु मे लभ्यते' इति ।

दत्ता— हन्त, हस्ते स्थितं कार्यं विसृज्य आगन्तव्यमभविष्यत् । तदा तदा एवं पीडिता भवामः । युगपत् बहूनि कार्याणि आपतन्ति । एकमपि न शक्यमुपे......

जाना – अतित्वरयाऽहमागत्य पेटिकायां अर्धाणकमपश्यन्ती व्याणकखण्डमेकमादाय तस्मै दत्त्वा 'विनिमय'मानय । तव देयं दास्यामीत्यवोचम् । फलपिटकं क्वापि गृहान्तरे निक्षिप्तवान् । तत्र गत्वा सद्यः प्रत्यागमिष्यतीति मे मतिरभूत् । तं गृहीत्वा द्रुतं गतः सः नैव न्यवर्तिष्ट । पार्श्वगृहेषु क्वापि नालक्षि । तावता कथं सोऽन्तर्हित इति विस्मिताऽभूवम् । ततो मामम्बा अप्राक्षीत् कियत् त्वं तस्मै अदा इति । व्याणकखण्डमिति मया प्रत्युक्ता सा 'अयि उन्मत्ते, अहं हि पूर्वमेव द्वौ आणकौ अदाम् । केवलमर्धाणकोऽवशिष्टः । तमेव त्व ददासीत्यहममंसि । द्वौ च द्वौ च चतुर आणकान् लब्धवान् सः कुतः प्रत्यागमिष्यति । किमपि प्रतीक्षसे आगमिष्यति आगमिष्यतीति' इति मामुपालब्ध । पश्यसि कथमस्तीति ।

दत्ता – तत् किमपि नाम, अम्ब । तद् द्रव्यं नास्मदीयमिति मन्तव्यम् । अन्यथा 'दैवं' चिन्तयित्वा स्वगृहान्तर्वर्तमानासु अस्मासु कथमेवमागत्य हरेत् ।

जाना— अनुपदं फलानि विक्रीणाना स्त्री काचिदागमत् । इमं विषयं ज्ञापिता सा "न स फलविक्रयी । शाकापणे फलस्वामिनि पराङ्मुखे सति फलराशौ त्रीणि चोरयित्वा आगतः, एवं युष्मानपि वञ्चयते स्म" इत्यवादीत् ।

———

# प्रकृतिभेदः (6) ॥

—:o:—

शीनिः— अयि पुष्पि, किमेतत् । पादरूप्यस्य चत्वारि फलानि क्रीतानि । तानि चत्वार्यपि अन्तः सन्ति । अपरमेकं हस्ते वहसि । कुत एतत् । किं पुनरप्येकमाणकं दत्त्वा अक्रैषीः । कुतस्ते आणकः ? किमपि दृष्टिं करोषि ? किं मातुः पेटिकाया आणकं अचूचुरः अथ वा फलविक्रयिणः पिटकात् फलम् ?

पुष्पी— उँ । अहमचूचुरम् । त्वमद्राक्षीः । अम्ब, पश्याम्ब, अहमचूचुरमिति वदति ।

शीनिः— मातरि वद, अन्यत्र वद । प्रश्नस्य तु मे उत्तरं वद । अचौर्ये, कुतस्ते द्रविणं वा फलं वा । तव मुखमेव त्वया चौर्यं कृतं वदति ।

पुष्पी— (फलं दूरं अग्रजाभिमुखं क्षिप्त्वा रुदती) इदमरे तात फलम् । गृहाण । न मे अपेक्षितम् ।

जननी— किमरे, तात, वत्सया कलहायसे ।

शीनिः— नाम्ब, अकार्यं कृत्वा मया पृष्टा रोदिति । त्वमेवैनां पृच्छ—कुतोऽस्या इदं फलमिति ।

जननी— वत्से, ब्रूहि तत्त्वम् । कुतस्ते फलम् ?

शीनिः— पश्याम्ब, दृष्टिं करोति । तत एव किं न ज्ञायते चोरितवतीति ।

जननी— वत्स, मुञ्च ताम् । गतं गच्छतु । फलं छित्त्वा अर्धं अर्धं गृह्णीतम् ।

शीनिः— नाम्ब, न चोरितं वस्तु अस्माभिरुपयोक्तव्यम् । फलकारमन्विष्य तस्मै दास्यामि ।

जननी— अरे, तथा नु ?

———

# पुस्तकपरामर्शः ॥

———0———

**A Guide to The Study of Bana's Kadambari Sangraha,** (Uttarardha by the late M. M. R. V. Krishnamachariar) containing Introduction, Character Sketches, Topical and General Essays, Translation, Notes, and Glossary by Sri. U. Venkatakrishna Rao, M. A., Madras Christian College, Tambaram. Price Rs. 2.

बी.ए. परीक्षागामिनां विद्यार्थिनाम् अत्यन्तमुपकाराय कल्पेतायं सुलिखितो ग्रन्थः। [सं]

---

**ब्रह्ममीमांसात्रिशती।** पण्डित श्री आङ्गरै रङ्गस्वामिशास्त्रिणा विरचिता। कुम्भघोण शोलैअप्पमुद्लिआर् अग्रहार (7) वासिनः तस्मादेव लभ्या। मूल्यम्–1–4–0

बुद्धिमत्सु व्युत्पन्नेषु प्रवचनकुशलेषु ग्रन्थकरणकुतूहलिषु च विपश्चिद्वरेषु अन्यतमोऽयं शास्त्रिमहाशयः। चिरकृतसूत्रभाष्यादिप्रवचनफलतया पद्यमयम् अधिकरणार्थस्मरणौपयिकमिमं ग्रन्थं कृतवान् नूनं वेदान्तविद्याप्रवृत्तानामुपकारको भवति। शास्त्रार्थविषयाण्यपि पद्यानि शैल्या ललितरमणीयानि। 'नादौ कर्मास्ति यस्मात्' इत्यस्मिन् वैषम्यनैर्घृण्याधिकरणश्लोके तृतीयपादान्ते 'सूच्यतेऽनादिताऽस्य' इति लघुरस्ति। 'किञ्च' इति चतुर्थपादारम्भात् तस्य गुरुपरकत्वं नास्ति। अनुष्टुप् उपजातिः वसन्ततिलका इत्येतद्वर्जं वृत्तेषु प्रथमतृतीयपादान्तलघोः 'पादान्तस्थं विकल्पेन' इति गुरुत्वं नाश्रीयत इति कवीनां समयः। अनुशास्ति च वामनः।

---

**मञ्जूषा।** संस्कृतभाषामयी मासपत्रिका। सम्पादकः श्री क्षितीशचन्द्रचट्टोपाध्यायः M. A. D. Litt। वार्षिकं मूल्यम् रूप्यषट्कम्। 81. Shyambazar Street, Calcutta—4. अत्र लभ्या।

KENDRIYA SANSKRIT VIDYA PEETHA, TIRUPATI. LIBRARY

## उद्यानपत्रिका।

चतुर्थवर्षस्य प्रथमां द्वितीयां च अस्याः पत्रिकायाः सञ्चिकां प्रतिगृह्य सन्तुष्टाः स्मः । अस्मद्देशस्य विभवं संस्कृतस्य वैभवं च बुद्धौ कुर्वतां बुद्धिमताम् अद्य प्रचरन्तीनां संस्कृतपत्रिकाणां सङ्ख्याऽत्यल्पेति मतिः यथा यथा अभिनवाः पत्रिकाः प्रादुर्भवन्ति तथा तथा हर्षश्च नूनं भवितुमर्हति । सम्पादकः प्राच्यप्रतीच्यविद्यापद्धत्योरुभयोरपि निपुण इति लोकचित्तरञ्जने पटुरिति प्राप्तयोः सञ्चिकयोः स्थितानां विषयाणामनुवाचनेन जानीमः । नियमावल्यां

'सनातन-भारतधर्मविरुद्धाः प्रबन्धाः कथञ्चिदपि न प्रकाश्येरन्' इति स्थितमिमं पश्यन्तो मोदामहे । अनेन विरुद्धवर्जनसङ्कल्पेन सह अनुकूलप्रबन्धप्रकाशनसङ्कल्पमपि विधीयमानं वयमिच्छामः । चिराय संस्कृतं सेवतां मञ्जूषा ।

---

**A Descriptive Catalogue of the Tamil Manuscripts** in the Government Oriental Manuscripts Library, Madras. (Volume VI - D. Nos. 2174 to 2725)

Price Rs 19—12—0

**A Trieunial Catalogue of Tamil Manuscripts** collected during the Trieuniums 1934—35 to 36—37, 37—38 to 39—40, and 40—41 to 42—43,

Price Rs. 34—14—0

Both by Syed Muhammad Fazlullah Sahib Bahadur M A., L.T., Ex-Curator and T. Chandrasekharan M.A L.T. Curator, Govt. Oriental Mss., Library, Madras.

उभयोरनयोः द्राविडलिखितग्रन्थसूच्योः बहूनां प्राचीनानामपि अश्रुतपूर्वतया अभिनवानां द्रविडभाषामयानां ग्रन्थानां सम्बन्धिनो विषया विवृताः सन्ति । वैद्यं ज्योतिषं सम्प्रदायं काव्यमार्गम् अन्यच्च प्रति परिश्रमं कर्तुं ये कुतूहलिनः उत्साहिनश्च भवेयुः तेषां दूरमुपकारिके इमे सूच्यौ। अद्यतनपुस्तकशालाध्यक्षस्य श्री चन्द्रशेखरार्यस्य स्वाधिकारनिर्वाहश्रद्धा ग्रन्थप्रकाशने संरम्भातिशयश्च पदे पदे अभिव्यज्यत इति हृष्यामः ।

[सं]

---

Registered No. M 2300.

Book XXIII || श्रीः || Nos. 3 & 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥



| | | | |
|---|---|---|---|
| पु. २३] कलि | ५०५० विरोधि | वृश्चिक / धनुः | साधारण सं २ |
| | | | शास्त्रानुबन्ध सं २ |
| | | | आहत्य ,, ४ |



# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

November & December 1949.

R S V L
00989

For the rate of subscription please see inside

// UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sastraic Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

# विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः । ३०१—३०८

1 मेनका ।
2 व्याजोक्तिरत्नावली ।
3 भारतदेशः ।
4 कालिन्द्यादिकन्याविवाहः ।
5 संस्कृतवाङ्मयम् ।
6 यथाभिमतम् ।
7 प्रकृतिभेदः ।
8 पुस्तकपरामर्शः ।

TIRUPATI.

पञ्चभ्यो दिनेभ्यः पूर्वं अहं मदीयकार्यविशेषेण तोलशिङ्गप्पेरुमाळ्-कोविल्-वीथीमगच्छम् । भवद्गृहाभ्यन्तरात् कञ्चन माहम्मदं बहिरागच्छन्तमपश्यम् । तस्य वेषः कपटवीक्षणं च मम मनसि कञ्चन संशयमजनयताम् । द्वारमागतः सः चोरवत् इतस्ततो दृष्टिं क्षिपन् स्वहस्ते स्थितं किमपि काकदं वलयित्वा कञ्चुकभस्त्रिकान्तः रहस्यं निधाय अगोपयत् । तद्दर्शनेन मम सन्देहो बलवत्तर आसीत् । कात्स्न्र्येन ब्राह्मणावासभूतायां तस्यां वीथ्यां स किमर्थं तस्य गृहस्यान्तः प्रविष्टः स्यादिति सन्देह उद्भूत् । स किं जातु भिक्षार्थी गत्वा किमपि वित्तपत्राणि (Currency notes) चोरयित्वा आगत इति सन्देहोऽजायत । तमुपगम्य "अन्तः कमन्विष्य भवानागच्छति" इत्यप्राक्षम् । सः तद्गृहवासिनः स्वस्य परिचिता इति, केनचित् कार्येण तत्सविधं गत्वा प्रतिनिवृत्त इति चाब्रवीत् । अहमनुपदं तं मया साकमादाय अन्वगच्छम् । तत्र भवत्सोदर्यौ श्यामार्यश्च अवर्तन्त । स माहम्मदः क इति तानपृच्छम् । ते स कोऽपि भिक्षुक इति स्वेषामविदित इति चावोचन् । मम सन्देहो दृढतरः संवृत्तः । सद्योऽहं तं पालकस्थानकं नीत्वा तस्य मूलप्रभृतिकमशोधयम् । स कोऽपि मान्त्रिक इत्येतत् प्रकटमभवत् । भवद्गृहेभ्यो बहिरागच्छता तेन तत्कञ्चुकभस्त्रिकायां निगूहितं काकदं किमिति तदादाय अपश्यम् । तत्र द्वौ लेखौ उपलब्धावभवताम् । तौ लेखौ नास्माभिः पठितव्याविति स प्रतिषेधमकरोत् । तेन मत्सन्देहस्य अभिवृद्धत्वात् सपदि द्वावपि लेखौ अहं पठितवान् । आः, तत्पठनसमनन्तरं मम मनसि जातमाश्चर्यं वाचां भूमिमतीतमभवत् । द्वावपि तौ लेखौ अनेन साकं भवतामवलोकनाय प्रहितवानस्मि । द्वयोर्लेखयोरेकः अङ्कप्पनायकवीथीवासिना वस्त्रवाणेजा नैनामहम्मदमरकायेन तल्लेखकाय भवत्पार्श्वगृहवासिने श्यामार्याय लिखितः । द्वितीयः श्यामार्यपेरुन्देव्यम्बाभ्यां निर्दिष्टनैनामहम्मदमरकायाय लिखितो लेखः । अनयोर्द्वयोर्लेखयोः पठनात् मेनकानाम्नीं ब्राह्मणकन्यां श्यामार्यः पेरुन्देव्यम्बेति एतौ द्वौ निर्दिष्टनैनामहम्मदमरकायाय विक्रीय तस्मात् वित्तमगृह्णीतामिति, सा कन्या तस्य

माहम्मदस्य अभिलाषं प्रति विप्रतीपा सती तद्गृहिण्याः साह्येन आत्मानं रक्षन्ती स्थलान्तरमागतेति, तां तस्य मान्त्रिकस्य साहाय्येन वश्यां कृत्वा पुनरादाय मरकायः शिङ्गपुरं प्रयातुमयततेति च ज्ञातमासीत्। सा पेरुन्देव्याः पुत्रीति श्यामार्यस्य सोदरीति च निर्देशः कृतः। तयोर्द्वयोः भिन्नकुलत्वात् ताभ्यां निर्दिष्टो बन्धुभावो मिथ्येति सद्योऽहं निरचिनवम्। तत्त्वतः सा कन्यकेति ज्ञातुं किमपि कौतुकमजायत। भवद्गृहानन्तरगृहेषु तन्त्रेण विचार्य भवतां गृहिण्या नामधेयं मेनकेति ज्ञातवान् अभवम्। तदा अन्यः कोऽपि विषयः स्मृतिमागच्छत्। कतिपयदिनेभ्यः पूर्वं तञ्जापुरमाण्डलिकात् हूणात् अस्माकं तन्त्री काचिदागच्छत्। तत्र तञ्जापुरोपमाण्डलिकः साम्बशिवार्यो नाम अनुमतिं विना इदं नगरमागत्य भवद्गृहिणीं स्वपुत्रीं आदाय अगच्छदिति, तत् किं तथ्यमिति गूढं विचार्य ज्ञापनीयमिति च विलिख्य आज्ञां दत्तवान्। तदनन्तरदिने साम्बशिवार्य एव इह आगत आसीत्। तस्मिन् तन्त्रीविषयं प्रति अस्माभिः कृतात् भाषणात् स मद्रं नागत इति, कन्यां न नीतवानिति च ज्ञातवन्त आस्म। सोऽपि विषयः अस्मत्स्मृतिमागच्छत्। आभ्यां मरकायाय विक्रीता भवत्पत्न्येवेति अनुपदमहं निरचिनवम्। ततः परं निर्दिष्टमरकायगृहमगच्छम्। स नागपट्टणं गत इति तत्र स्थितः कर्मकरोऽवदत्। तस्य मरकायस्य श्वशुरः मद्रराज्यनिर्वाहसभ्येष्वन्यतमः पेरियतम्बिमरकाय इति श्रुत्वा तत्सविधमगच्छम्। तं दृष्ट्वा तस्मिन् अनयोर्लेखयोरभिहितान् विषयान् आवेद्य तस्य गृहे किं भवत्पत्नी वर्तत इत्यपृच्छम्। सः अनयोर्लेखयोर्दृष्टा विषयाः पारमार्थिका इत्यवदत्। तस्य पुत्री मेनकानाम्नीं कन्यां निशीथे स्वप्रासादमानयदिति, सा कतिपयदिनावधिरोगार्ता शयनैकशरणा तत्र अवर्ततेति, रायपेटा-वैद्यशाला–भिषक् हूणी पदेपदे आगत्य चिकित्सामकरोदिति, हूण्या अनुमतिमनुसृत्य सा च अवगुण्ठनशीला (घोषाश्री) स्वपुत्री च समुद्रवातसेवनाय तत्तीरमगच्छतामिति, तत्र यदृच्छया कस्यचिदुपरि आरूढं मोटारशकटं दृष्ट्वा मेनका मूर्छां गतेति, तत्कारणं पृष्ट्वा ज्ञातवती हूणी भवन्त एव मोटारे पीडिता

इति मेनकामुक्तवतीति, अनन्तरवारे आगता हूणी भवत्कञ्चुकभस्त्रास्थितौ द्वौ लेखौ आनीय मेनकाया अदादिति, तत्र स्वयं नाटककारेण प्रधावितेति मिथ्या लिखितं दृष्ट्वा सद्यः भवद्गृहिणी वाचा विवरीतुमशक्यां आर्तिं शोकं च अभजतेति चावादीत। भवद्गृहिणी स्वस्य तावतोऽवमानस्य अपकीर्तेश्च आगमनानन्तर भवन्मुखदर्शनमेव न कर्तव्यमिति मत्वा 'समुद्रे पतित्वा आत्महत्यां करिष्यामि' इति विलिख्य खण्डकाकदं निधाय कस्मिंश्चिद्दिने रात्रौ तत्प्रासादात् अनन्यविदितं किल बहिर्निर्जगाम। ततः पेरियतम्बिमरकायः स्वकीयान् पुरुषान् बहून् विसृज्य समुद्रतीरप्रभृतिषु स्थलेषु किल अन्वेषणं कारयामास। न खलु सा उपलब्धा। इमान् विषयान् मयि निवेदितवान् मरकायः नाटककारलिखितौ द्वौ लेखौ अन्ते भवद्गृहिण्या विलिख्य निहितं खण्डकाकदं च मयि समर्प्य इमानि प्रति उचिता प्रवृत्तिः कार्येति भवत्पत्नी अन्वेष्टव्येति च आज्ञामदात्। भवत्पत्न्या अङ्गचिह्नानि सम्यक् ज्ञात्वा कृत्स्ने पत्तने गवेषणमकारयम्। न सा दृष्टा। खण्डकाकदे लिखितरीत्या समुद्रे पतित्वा किं मृतेति सन्देह एव मे भवति। नाटककारलिखितत्वेनोक्तौ द्वौ लेखौ भवत्पत्न्या लिखितं च खण्डकालदं अत्र संयोजितवानस्मि।

इमं विषयं विचारणाय न्यायस्थलं नेतुं यदि भवतामभिलाषोऽस्ति दयया तल्लिखत। उचितां प्रवृत्तिमहं करिष्यामि। अनेन न परं भवत्सोदर्या दण्डप्राप्तिः भवतामपि महान् अवमानो जायेत। अद्य केषाञ्चिदेव विदितमेदं नीचकार्यं पत्रिकासु क्षुण्णं पुरे पुरे प्रसरेत्। अनेन भवतामवमानप्राप्तिं विना अनुकूलं किमपि न भविष्यति। परन्तु अपराधिनो दण्डिता इति काचन तृप्तिर्भविष्यतीत्यत्र न शङ्कालेशोऽपि। नैनामहम्मदमरकाय इत्ययं अकिञ्चिज्ज्ञो बालः। दुर्मन्त्रिणः श्यामार्यस्य बोधनेन सः अस्मिन् कर्मणि अभ्यन्तरीबभूव। तथापि तस्य दण्डप्रापणं न्याय्यमेव। परं तु तस्य दण्डे भवत्सहोदर्यापि कारागृहं प्रवेष्टव्यं भवेत्। भवतां च अपख्यातिर्जायेत। इदं सर्वं विमृश्य तस्य दण्डप्रापणं भवन्तो नाभिलषेयुरिति मत्वैव भवतामभिप्रायावगमाय इदं निवे-

दितवानस्मि। भवन्त इच्छन्ति चेत् अहमेव द्राक् व्यवहारं प्रवर्तयिष्यामि।

इमान् विषयान् प्रति अहं गूढमेव विचारणमकार्षम्। तदा इतोऽपि एकद्वा विषयाः प्रकटा अभूवन्। तेषामपि परिज्ञानं भवतामावश्यकम्।

नाटककारः मायाण्डिपिळ्ळै किमस्मिन् विषये परमार्थतः सम्बन्धभागिति ज्ञातुकामोऽहं 'वीरासामिनायुडु-सङ्गमुपगम्य विचारणमकरवम्। मायाण्डिपिळ्ळै तञ्जापुरात् काञ्चन कन्यामादाय अगच्छदित्येतत् तथ्यमिति, तस्य अस्य विषयस्य च न कोऽपि सम्बन्ध इति च स्फुटमज्ञायत। स मायाण्डिपिळ्ळै कर्मकरणाय वीरासामिनायुडु-सङ्गप्रवेशसमये समयबन्धं कञ्चन लेखनपूर्वं कृतवान्। स समयबन्धः मायाण्डिपिळ्ळै-अस्य हस्तेन लिखितः पुस्तकनकार्यालये पुस्तकितोऽस्ति। तत्समयबन्धपत्रं लब्ध्वा तत्रत्यान् वर्णान् भवत्पत्नीपेटिकायां दृष्टयोर्लेखयोः स्थितान् वर्णांश्च समीक्षितवान् आसम्। उभयेऽपि भिन्नभिन्नमनुष्यलिखिता इति स्फुटं ज्ञायते। इमौ श्यामार्यसृष्टौ मिथ्यालेखाविति मतिर्मे मनसि उदियाय। कञ्चन पुरुषं प्रेष्य श्यामार्येण कञ्चन लेखं लेखयित्वा आनाययम्। तदीया लिपिश्च अन्यादृशी बभूव। तस्य गृहे किमन्ये पुमांसः सन्तीति विचार्य तस्यानुजः कश्चित् निरुद्योगो वर्तत इति तं तन्त्रेण आनाय्य पालकस्थानके लेखकपदे निवेशयिष्यामीति प्रलोभ्य प्रार्थनापत्रमेकं लेखयित्वा अगृह्णाम्। अनत्या लिपिः भवत्पत्नीपेटिकास्थितलेखलिपिश्च एकरूपे भवतः स एव अनयोर्मिथ्यालेखयोर्लेखक इत्यसन्दिग्धं ज्ञायते। तत्प्रार्थनापत्रं चानेन सह निक्षिप्तवानस्मि। इमान् विशेषान् भवन्तो ज्ञातुमर्हन्ति। एभ्यः श्यामार्यः भवत्सोदर्यौ च इमौ लेखाभासौ सज्जीकृत्य पेटिकायां निक्षिप्य भवत्पत्नीं मरकायाय व्यक्रीणीतामिति, अन्ते भवत्पत्नी अदुष्टा सती अदृश्या बभूवेति च सुनिश्चितं प्रतीयते। भवत्पत्न्या नैनामहम्मद्मरकायगृहान्मोक्षणप्रभृति अन्ते समुद्रतीरे आत्महत्योद्यमावधि वृत्तं सर्वं रायपेटा-वैद्यशालास्थायाः भिषजो हूण्याः सम्यग्विदितम्। अस्मिन्

॥ श्रीः ॥

# व्याजोक्तिरत्नावली ॥

**A gem necklace**
**of indirect observations on men and things.**

—:o:—

श्रीमन्महालिङ्गकविविरचिता ।

[By Sri. Y. MAHALINGA SASTRI, M. A., B. L.]

[ अमी किलान्यापदेशश्लोकाः विविधेषु सांसारिकव्यतिकरेषु तद् तदा प्रस्तुतं किमपि किमपि वस्तु विषयीकृत्य अप्रस्तुतवर्णनपरिपाट्या निर्माय मया पत्रसंपुटिकास्वारोपिताः चिरादेवैवमुपचीयमानाः कालिकमेवानुक्रममनुरुध्य व्याजोक्तिरत्नावल्याख्यया मुक्तकप्रबन्धरूपेण समायोजिताः दिष्ट्येदानीमुद्यानपत्रिकाप्रसादेन प्रकाशीभवितुमवकाशमलप्सत । प्रभववर्षादनर्वाचीनानां पद्यानां संख्या पञ्चविंशत्युत्तरशतम् ।]

[*These Anyapadesa verses, composed on various occasions, and having indirect references to various contacts in life, were preserved in my diaries and note-books, and when they grew considerably in numbers were collected under the name of* **Vyajokti Ratnavali,** *their chronological order not being disturbed in the arrangement. The number of verses by the end of 1927, was 125.*] (*Y. M.*)

अभ्रैः शुष्कविगर्जितैः शुचिभवैर्व्योम क्षणेनावृतं
सिक्तं नाम च भूतलं कियदहो विश्वासयोग्यं कृतम्।
पाथोभिः किमु निस्तटा ह्रदनदास्तापेन शान्तं नु वा
नीपैरुच्छ्वसितं नु किं नु शिखिभिः प्रारंभि नृत्तोत्सवः ॥१॥

The summer clouds clad in empty thunders swept over the sky all of a sudden and likely wetted the surface of the earth a little. But what have they done to deserve our confidence? Are the lakes and rivers overflowing their banks with abundance of water? Has the atmospheric heat cooled down? Have the Nipa trees put forth their blossoms? Did the peacocks begin their gaily dance? 1

पूर्वं कोकिलमञ्जुपञ्चमरवैः शीतानिलैः सूचिते
दृष्टे स्रोतसि वाहिनीषु विलसड्डिण्डीरमुग्धस्मिते।
श्राम्यन्त्येव कृषीवलाः कृषिविधेः कुल्यासु सीरेषु वा
हृष्यन्त्यम्बुविहारलालसतया चेष्टापरा बालकाः ॥ २ ॥

When the new flood of the river, smiling sweetly with foam and heralded by the melodious 'PANCHAMA' song of Kokil wafted by the cool breeze, first makes its appearance, the tillers of the soil apply themselves to work at the channels and with the ploughs with a view to cultivation, but the boys (of the neighbourhood) restless by nature, exult over the prospect of playing pranks with the current. 2

याञ्चादैन्यमपैतु चातक, सखे, मिथ्याकृताडम्बरः
पाथोदः सुखमेष यातु, कृपणः कः पोषयेदर्थिनः।
काले प्रावृषि संभृताः शतमुखं स्वेनैव धाराधरा
वृष्टिं तुष्टिकरीं पयोभरपरिश्रान्ता विधास्यन्ति ते ॥ ३ ॥

Ah ! my friend ! Chataka ! You had better not demean yourself by cringing for favour. Let this vain (summer) cloud, imposing with its false grandeur, pass along. What wretched niggard will respond to the petitions of the needy? Wait for winter when the rain clouds mustering in a hundred quarters (up in the sky) and weary with the heavy load of water shall of their own accord glut you with liberal showers. 3

वर्षन्त्यम्बुमुचो वहन्ति परितः कूलङ्कषाः सिन्धवः
पर्यन्ते सलिलाशयास्तदुदकैरित्येष दृष्टः क्रमः ।
यत्कूपादिषु नीचदेशमवनौ कच्छेषु गर्तेषु वा
प्रोद्गच्छन्त्यनिबद्धवारिसरणिष्वापस्तदेतत्कथम् ॥ ४ ॥

The rain clouds pour forth their heavy showers. Everywhere the rivers run swift chafing against the banks. From them the reservoirs take their fill. Thus far the course of transmission is obvious (to us). But by what means the waters find their way to the well, and nay, to every depression on the face of the earth, whether it be a marsh or a hollow ?—we wonder ! 4

प्रातः पान्थविलोचनोत्सवकरी पुष्पन्धयोपासिता
याऽभूद्गन्धवहेन सेवितसमुल्लासक्षणा वल्लरी ।
सेयं हन्त दिनात्यये च्युतसुमा लोकैरनालोकिता
सन्त्यक्ता भ्रमरैः समीरविधुता म्लाना कथं वर्तते ॥ ५ ॥

At dawn of day, all the wayfarers' eyes feasted upon her beauty, the bees hummed about her, the fragrance-bearing wind waited for the moment of her blossoming. But alas ! What a withered look does that same creeper bear at sunset ! Her flowers have dropped ; the bees heed her not ; the people pass on without noticing her ; the wind shakes her rudely ! 5

ग्रीष्मोत्तप्तजलं सरः परिहरन् काकेन लक्ष्यीकृतोऽ-
प्यन्तःशाद्वलगूढचारविधिना तं वञ्चयित्वाऽध्वनि ।
स्वस्थोऽस्मीति विवेश यत्पटुरवो वल्मीकरन्ध्रं जवात्
तस्मादेव विनिर्गतेन फणिना भेकस्तदा जग्रसे ॥ ६ ॥

The (illfated) frog while abandoning for good the pond drying up by the heat of summer, being descried by a crow, moved cautiously along hidden beneath the thickly growing grass and thus managed to dupe the watchful foe. But when at last reaching the mouth of an anthill he quickly jumped in exultantly croaking with the confidence that he was safe for ever, he fell a prey to a serpent emerging out of that very refuge. 6

दृष्ट्वा स्वैरचरं यमुद्भटफटाटोपं क्वचित् प्राणिनः
कम्पन्ते प्रळयं व्रजन्ति नितरां स्विद्यन्ति धावन्त्यपि ।
सोऽयं चेदहिजीविना हृतविषः काकोदरः खेलितो
रथ्यायां मनुजाः सबालवनिता द्रष्टुं मिलन्त्युत्सुकाः ॥ ७ ॥

Men tremble, swoon, perspire profusely or take to their heels at the sight of a cobra roaming about freely and displaying its frightful hood. But they gather in crowds with their women and children to see the same cobra with its fangs pulled out and exhibited by the snake-charmer in the street. 7

अत्युच्छ्रायवतो महाङ्ग, भवतो निम्बे रसाविष्कृतिं
क्षुद्राः के मधुलिण्मुखाः प्रहसितुं कुञ्जेषु याश्चाभृतः ।
धुर्याः पर्यनुयोज्यचित्रचरिता न प्रायशो देहिनां
धत्तूरप्रिय इत्यभूद्‌वमतः किं नाम गङ्गाधरः ॥ ८ ॥

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्ब्रेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २३] कलि ५०५० विरोधि { वृश्चिक धनुः { साधारण सं २ शास्त्रानुबन्ध सं २ आहत्य सं ४

# भारतदेशः ॥

(शान्तिरक्षकः ।)

—:o:—

## MAINTENANCE OF WORLD PEACE
### India's Role Stressed

MONTREAL NOV. 26.

"The help which the world needs in its effort to keep peace may come from India, Mr. Vincent Sheean well-known New York author told the Women's Canadian Club to-day.

"It seems to me India will be called upon to play an important role between Russia and the United States," he said, "since India, more than any other nation, is pledged to peace."

India was not materialistic in its essential belief of aim, purpose and end of human life, and in this it was at variance with the two major camps in the world.

"Prime Minister Nehru does not intend to put India into an alliance with either the United States or Soviet Russia," Mr. Sheean said. Pandit Nehru would stand aside from the debate of the two camps.

By its own tradition and history and by the fact that the other two groups are so inevitably and hopelessly

opposed, India finds itself in a unique position. India is a kind of frontier and heart-land," he said.

India was born not out of political revolution but out of a religious phenomenon which was the life and death of Mahatma Gandhi.

The author of "Lead kindly light," a biography of Mahatma Gandhi, Mr. Sheean said, "By his death Gandhi achieved something his continued life could not."—"

P T I-Reuter.

इयं आङ्गलमयी वार्ता हिन्दुपत्रिकातः उद्धृता । तत्र अमेरिकासु प्रसिद्धेन केनचित् ग्रन्थकारेण कचिद् भाषणावसरे अस्मद्देशं प्रति यदुक्तं तत्प्रकाश्यते। सम्प्रति लोके शान्तिरत्यल्पा वर्तते । सन्निहिते काले द्वे महायुद्धे अभवताम् । द्वितीयेन जनितं सङ्कटं अधुनाप्यस्माभिरनुभूयते । कदा तस्य निवृत्तिर्भविष्यति, न कश्चन वेद । अस्यां स्थितौ यदि पुनर्युद्धान्तरस्य प्रसक्तिर्भवेत विवेकिनामत्र व्याकुलता कथं न जायेत। रष्यादेशः तदनुसारिणश्च एकतः अमेरिकासमष्टिः तदनुसारिणश्च अपरत इति पक्षद्वयं परस्परं शङ्कया भयेन च पीडितं परस्परबलातिशयकाङ्क्षि युद्धसाधनसम्पत्तिं वर्धयद्वर्तते। अनेन भूमण्डलवर्तिनः सर्व एव जनाः अत्यन्तमातङ्किनो भवन्ति—पर्यवसानं कथं भविष्यतीति । साधवश्च केचन जगति शान्तिं प्रतिष्ठापयितुं को मार्ग इति विचारे समालोचने च प्रवृत्ताः। तेषु अयमप्येक इति भाति। अस्य इयमेका उक्तिरिह अस्माकमवधानमर्हति ।—

यतो भारतदेशः शान्तिसम्पत्तिं प्रति कृतसुदृढसङ्कल्पः ततः सः विवदमानयोः द्वयोः अमेरिका-रष्या पक्षयोः माध्यस्थ्यरूपं महत्पदमास्थातुं प्रार्थनीयो भवति। ... ... जीवितस्य यत् लक्ष्यं फलं पर्यवसानं च तद्विषयं भारतवासिनां मतं ऐहिकविषयसुखानुभवमात्रसङ्गि न भवति। अस्मिन् विषये स ताभ्यां देशाभ्यां विलक्षणः।

इति। अस्मद्देशं प्रति इदानीं महद्गौरवमन्येषाम् । शान्तिः सर्वत्र अपेक्ष्यते। तत्सम्पादनोपायस्तु क इति ते न जानन्ति। ऐहिकविषयेषु अति-

श्रद्धाम् अतिप्रवृत्तिं च कृत्वा महति सङ्कटे आपतिते इतिकर्तव्यतामूढाः परितप्यन्ते । भारतदेशवासिनो वयं विषयभोगपराङ्मुखाः आत्मविद्याकुशलाः तज्जनितसुखानुभवतृप्ताः परमशान्ता वर्तामहे। तेन इतरेषां शान्तिसम्पादने मार्गदर्शिनो भवितुमर्हाम इति तेषां प्रत्ययः। हन्त कियद् भ्रान्ता इमे तपस्विनः। अस्माकमिह का स्थितिः ? किं देशान्तरेषु दुर्लभा शान्तिरत्र वर्तते ? आधिदैविकीषु दुरवस्थासु बह्वीषु सतीषु मनुष्यैरेव कृता अनर्थाः कति कति न सन्ति ? कियन्ति चौर्याणि, कियन्तोऽपहाराः ? कियन्तो वधाः ? कियती अत्याशा ? कियान् द्वेषः ? कियन्तोऽनुचिता विपरीतफलाश्चारम्भाः ? अनादिकालप्रवृत्तधर्मव्यवस्थावासना क्रमेण अपचीयमाना इतोऽल्पेनैव कालेन अत्यन्तविनष्टा भविष्यति। राज्यभारनिर्वहणे स्थिताः द्वित्राः 'स्वार्थपरैर्न भवितव्यम्। देशक्षेमः अस्मत्प्रवृत्तीनां प्रथमलक्ष्यं भवितुमर्हति' इति तत्र तत्र भाषणे प्रसक्ते उपदिशन्ति। किमिदं देशे सर्वान् जनान् न्याय्ये मार्गे प्रतिष्ठापयितुं पर्याप्तम् ? अपथप्रवृत्तिर्मनुष्याणां स्वाभाविकी। तत्र अत्यन्तप्रावण्यहेतवश्च इदानीं भूयिष्ठाः। दरिद्राः प्रत्यहं तत्तद्वस्त्वपेक्षिणः सुबहवो जनाः। देहप्रयासेन आर्जने क्लेशो भवति। यदि श्रमं विना किमपि लब्धुं शक्यं किमिति तादृशं मार्गमुपेक्ष्य मार्गान्तरं बहुक्लिष्टं आश्रयेयुः। तेन चौर्ये प्रवर्तन्ते। प्रतारयन्ति। वणिजः अल्पस्य वस्तुनो बहुमूल्यं गृह्णन्ति। उद्योगिनः उत्कोचं गृह्णन्ति। अर्थपरतया अन्यत् यत्किमपि अत्यादरणीयमपि अनादृतं भवति। यदि कश्चन किञ्चिद् वित्तमादाय गच्छति तं नलिकया दग्ध्वा तदपहरन्ति। सर्वसाम्यख्यापनेन परस्परबहुमानो लुप्तः। स्नेहो नष्टः। नियन्त्रणविरहात् केषाञ्चित् स्वाभाविको द्वेषः अतिमात्रं प्रवृद्धः विना कारणं इतरपीडायां पर्यवस्यति। निश्शङ्कं निर्भयं बहिः सञ्चरितुं, प्रयाणं कर्तुं, न पार्यते। दुरवस्था वाचा वर्णयितुं न शक्यते। अस्याः कः परिहारः ? कथं परिहारः ? न किमपि ज्ञायते। इयति विशाले देशे किं कतिपये अस्मिन् विषये चिन्तां कुर्वन्तो वर्तन्ते ? यदि वर्तन्ते के ते ? न

तद्‌ज्ञातुं पार्यते । एकद्वानां वर्तमानानामपि अपेक्षितसौकर्यविरहात् प्रवृत्तिर्दुष्करा भवति । सर्वो देशः दह्यमानगृहावस्थो दृश्यते ।

इयं स्थितिः पूर्वमस्मद्देशे नासीत्। मनुष्यलोकत्वात् सर्वदा उच्चावच-दुःखपीडितत्वेऽपि अद्यतनं क्षोभं चिन्तयतां पूर्वः कालः अतिशान्तिभरित इति सर्वसौख्यमय इति धर्मैकप्रवणजनमानस इति परस्परस्नेहबहुमान-मेदुर इति सर्वसम्पत्समृद्ध इति प्रतिपत्तिरवश्यं जायेत। कथं तदानीं बुादृशी स्थितिरासीत् । कथमिदानीं सा न भवति ? इति मनाग् विमर्शे तद्धिमतामत्र हेतुर्न न स्फुरिष्यति। विद्याप्रचारस्य जनानां जीवितवर्त-नस्य च स कोऽपि प्रकारः पूर्वमभवत्। तस्य विपर्ययादद्य इयं सङ्कट-परम्परेति। परं तु न केचिदपि इदं चिन्तयन्ति। पश्चिमदेशेषु विल-क्षणां कामपि पद्धतिमाश्रित्य राज्यं जीवनं च प्रवर्तयन्तो जनाः उत्तरोत्तरम् अपरिहार्यानर्थपरम्पराप्राप्त्या इतिकर्तव्यतामूढाः उत्तारणाय अस्मानपे-क्षन्ते। वयं तु तामेव पद्धतिमाश्रित्य तादृशीष्वेव अनर्थपरम्परासु पतिताः आत्मानमेव परित्रातुं न शक्नुमः, का वार्ता इतरेषां परित्राणे। अस्याम् अतिसङ्कटायां दुरवस्थायां स्थिता अपि अस्मदीयाः जना नेतारश्च प्राची-नामस्मदीयां राज्यशासनस्य जीवितवर्तनस्य च पद्धतिं ईषदपि न स्मरन्ति। स्वबुद्धया तु किमपि किमपि कल्पयन्तस्ताम्यन्तीति अत्याश्चर्यम् अतिशोच-नीयं चैतत्। आत्मविद्या उपेक्षिता। आत्मगुणाः लुप्ताः। ऐहिकेषु विषयेषु अतिमात्रप्रवणाः प्रायःसर्वे जनाः । तेन पदे पदे आतङ्को वर्धते। एत-दवस्था वयमेवाद्य को रक्षिष्यतीति रक्षकान्वेषणचिन्ताव्याकुला भवितु-मर्हामः। अस्मांश्चेत् अन्ये क्षेममार्गदर्शनाय वृणते किमस्माभिर्हसितव्यम् अथवा रोदितव्यमिति न विद्मः।

---

## नरकारिः ॥

आनन्देन पयोजसंभवमुखैस्त्रैविष्टपानां गणैः
सेर्ष्यं दुर्दमशत्रुदर्पहरणोद्योगाप्तया सत्यया।
प्रेम्णा चारिनिबद्धदेव तरुणीबृन्दै–र्भिया राक्षसै-
र्दृष्टो यो नरकारिरेष जगतां जागर्तु धर्मावने ॥

कोपल्ले शिवकामेश्वररायः।

# कालिन्द्यादिकन्याविवाहः ॥

(Vidyalankara V. R. SrinivasaTatacharya Siromani)

एकदा पुरुषोत्तमः, नष्टा इति श्रुतानपि पुनर्द्रुपदगृहे सर्वैर्दृष्टान् पाण्डवानवलोकितुं सात्यकिप्रभृतिभिर्यदुभिः परिवृतस्सन् इन्द्रप्रस्थं ययौ। पार्था आगतं श्रीकृष्णं वीक्ष्य यथेन्द्रियाणि आगतं पञ्चवृत्तिप्राणम् अनूत्तिष्ठेयुः तथा युगपदुत्तस्थुः। ते मुकुन्दं परिष्वज्य तदङ्गसङ्गहतैनसः सानुरागस्मितं तद्वदनं निशाम्य मुदं प्रापुः। पुण्डरीकाक्षो ज्येष्ठयोर्युधिष्ठिरभीमयोः प्रणामं कृत्वा समवयस्कमर्जुनं परिरभ्य कनिष्ठाभ्यां नकुलसहदेवाभ्याम् अभिवन्दितो बभूव। द्रौपदी नवोढा किञ्चिद्व्रीडिता परमासनमध्यासीनमच्युतं शनैरेत्य ननाम। तथैव सात्यकिः तैः यथार्हं पूजितोऽभिवन्दितश्च निषसाद। अन्ये यदवः तैः पूजिता अनन्तं परित उपासत। गोविन्दः स्वपितृष्वसारं पृथां प्राप्य प्रणम्यातिस्नेहार्द्रदृशा तया परिरब्धः परिपृष्टवसुदेवादिबन्धुभद्रश्च सन् सस्नुषां तां कुशलमपृच्छत्। प्रेमोत्पन्नाधैर्यरुद्धकण्ठा रुदती कुन्ती भूतपूर्वान् बहून् क्लेशान् स्मरन्ती क्लेशापायायात्मानं दर्शयन्तं केशवं प्रति 'हे कृष्ण यदा बन्धून् अस्मान् स्मरता त्वया मम भ्राताऽक्रूरोऽस्मभ्यं प्रेषितः तदैव नः कुशलं समवर्तत, वयं त्वया सनाथाश्च व्यधीयन्त, यद्यपि जगतस्सुहृदोऽन्तरात्मनस्तव स्वः पर इति भ्रमो नास्ति तथापि भक्तानां हृदि स्थितस्त्वं सदा क्लेशान् नाशयसि' इत्यब्रवीत्। युधिष्ठिरेण 'हे अधीश्वर अस्माभिः कृतं पुण्यमीदृशमिति न वेद्मि, किन्तु सामान्यतो महत्सुकृतमाचरितमिति तु जानामि यस्मात् योगेश्वरैरपि द्रष्टुमशक्यो भवान् विषयासक्तचित्तैरस्माभिरदृश्यत' इति बहुमतो नारायणः तस्य तदनुजानाञ्च विज्ञापनमनुसृत्य स्वप्रेरितेन विश्वकर्मणा तेषामावासार्थं निर्मिते नानाविधशिलोपेते परमाद्भुते इन्द्रप्रस्थनाम्नि तत्र नगरे वसतां जनानामानन्दं जनयन् स्वेषां प्रियं चिकीर्षुश्च वार्षिकान्मासान् सुखं तत्र न्यवसत्। तत्र निवसन्

माधवः अग्नये खाण्डवन्नाम वनं दातुम् अर्जुनस्य सारथिस्समपद्यत दग्धखाण्डवोऽग्निस्तुष्टः फल्गुनाय धनुः अक्षयौ तूणीरौ अस्त्रधारिभिरभेद्यं कवचं रथं श्वेतान् हयांश्च प्रायच्छत्। खाण्डववनवासी मयः वह्नेस्सकाशात् मोचितो विजयाय सभामुपाहरत् यस्यां दुर्योधनस्य जले स्थलभ्रमः स्थले जलभ्रमश्चाविद्यत। कदाचित् विजयः कवची हनूमत्प्रतिकृतिध्वजं रथमारुह्य गाण्डीवं धनुः अक्षयसायकाविषुधी चादाय गोविन्देन साकं विहर्तुं गजादिमृगाकीर्णं निर्जनं वनं प्राविशत्। तत्र स शरैः व्याघ्रादीन्मृगानविध्यत्। किङ्कराः पर्वप्रयुक्तकर्मण्युपस्थिते सति तत्र कर्मार्हान् मृगान् युधिष्ठिरं निन्युः। ततः अशनायापिपासाभ्यां परिश्रान्तो बीभत्सुर्यमुनामासादयत्। तौ कृष्णौ तत्र स्नात्वा निर्मलं जलं पीत्वा सुन्दरीं चरन्तीं काञ्चित्कन्यां ददृशतुः। सुहृदा विष्णुना प्रेषितः फल्गुनः प्रमदोत्तमां तां प्रति 'हे शोभने का त्वं, कस्य सम्बन्धिन्यसि, किं कर्तुं काङ्क्षसि, अहं तु त्वां पतिमिच्छन्तीं मन्ये, सर्वं कथय' इत्यन्वयुङ्क्त। कालिन्दी गुडाकेशं प्रति 'हे वीर अहं देवस्य सवितुर्दुहिता, वरणीयं वरदं विष्णुं भर्तारं वाञ्छन्ती परमं तप आतिष्ठामि, सर्वोत्तमत्वेन श्रिया आश्रितं तमृते अन्यं धवं न वृणे, अनन्यनाथानां संश्रयो भगवान् मे मोदताम्, कालिन्दीति समाख्याताऽहं पित्रा सूर्येण निर्मिते यमुनासलिलरूपे भवने यावत् अच्युतस्य दर्शनं तावत् निवत्स्यामि' इत्युत्तरं वितताार। श्वेतवाहनो वासुदेवाय तस्या उक्तिं तथा निवेद्य तदभिप्रायं विद्वान् तदर्थं तां कन्यां रथमारोप्य धर्मराजमुपजगाम। मधुसूदनो विजयेन समनुज्ञातो युधिष्ठिरादिभिरनुमोदितः सात्यकिप्रमुखैस्सार्धं द्वारकां पुनरियाय। अथ देवकीनन्दनः सुमुहूर्ते द्वारकौकसां परममङ्गलं परमानन्दं विस्तारयन् कालिन्दीमुपयेमे।

अवन्तिराजौ विन्दानुविन्दौ दुर्योधनाधीनौ स्वभगिनीं स्वयंवरे श्रीकृष्णे रक्तां सतीं न्यषेधताम्। श्रीकृष्णः स्वतातसोदर्या राजाधिदेव्यास्तनयां मित्रविन्दाभिधानां तां राज्ञां प्रपश्यतां सतामेव प्रसह्याहरत्।

अयोध्याधिपतिरतिधार्मिको नग्नजिन्नामा नृपतिरासीत्। तस्य कान्तिमती सत्यानाम्नी नाग्नजितीति स्वपुत्रीत्वप्रकाशकनामान्तरेणान्विता च

काचन कन्याऽभवत्। नृपाः तीक्ष्णशृङ्गान् दुष्टान् सप्त वृषानजित्वा तां परिणेतुं न शेकुः। भगवान् तां वृषजितैव लभ्यां श्रुत्वा महता सैन्येन सममयोध्यामविन्दत। स कोसलपतिः तं प्रत्युत्थायासनाद्युपचारैः पूजयन् तेन प्रत्यनन्द्यत। नरेन्द्रकन्या स्वाभिमतं रमापतिरूपं वरं सम्प्राप्तं विलोक्यायमेव मम पतिर्भूयादिति यद्यहं कृतपुण्या भवेयं तदाऽयं मे कामान् निर्विघ्नान् यथार्थांश्च करोत्विति चाकामयत। नग्नजित् अर्चितं तं प्रति 'हे नारायण जगत्पते आत्मानन्देन पूर्णस्य तवातिक्षुद्रोऽहं किङ्करोऽस्मि, लोकपालैर्गिरिशेन च सहितो ब्रह्मा श्रीश्च यस्य भवतः पदपङ्कजरजश्शिरसा बिभर्ति यो भवान् स्वकृतधर्ममर्यादापरित्राणेच्छया धर्मज्ञानहानिकाले लीलाविग्रहान् गृह्णाति स भगवान् भवान् केन कैङ्कर्येण हृष्येत्' इत्यभाषत। पद्मनाभ आसनं परिगृह्य तं प्रति 'हे नरेन्द्र यद्यपि स्वधर्मनिरतस्य क्षत्रियस्य याच्ञा पण्डितैः प्रत्यादिश्यत तथापि त्वद्बन्धुभावकामनया त्वदीयां कन्यां प्रार्थये, न वयं शुल्कदा भवामः' इति मेघगम्भीरया वाचा सस्मितमवदत्। तदनु नग्नजित् यदुनन्दनं प्रत्येवमगदत्—हे नाथ त्वत्समेऽसति सति कल्याणगुणैकायतनात् अनपायिलक्ष्मीनिवासवक्षसस्त्वत्तोऽभ्यधिकः कन्याया वल्लभो वरः को विद्यते, किन्तु कन्यानुरूपवरलिप्सया पुंसां वीर्यं परीक्षितुं पूर्वं समयोऽस्माभिरतन्यत, एते सप्त बलीवर्दा अशिक्षिता अपरायत्ताश्च, एतैर्नृपात्मजास्सुबहुशः पराजिता भिन्नगात्राश्च व्यरच्यन्त, यदीमे भवता निगृह्येरन् तर्हि भवानेव मम दुहितुरभिमतो वरो भविष्यति' इति। विभुः य एतान्निगृह्णाति तस्य कन्येति कृतं तदीयं सङ्केतमाकर्ण्य उत्तरीयादिकं बध्वा बह्वीनामपि योषितां संपूर्ण एवाहं संभोगयोग्यस्स्यामिति सत्यां प्रत्यसापत्न्यप्रदर्शनार्थमात्मानं सप्तधा कृत्वा लीलयैव तान् निगृह्य भग्नदन्तान् हतबलान् तान् दामभिः संयम्य यथा बालो दामभिर्दारुमयान् वृषान् बध्वा विकर्षति तथा विचकर्ष। वृषभग्रहणात् सुतरां प्रीतो विस्मितश्च नग्नजित् श्रीकृष्णाय स्वसुतां विश्राणयामास। प्रभुः स्वानुरूपां तां पर्यणयत्। राजपत्न्यः श्रीकृष्णं स्वात्मजायाः प्रियं पतिं लब्ध्वा परममानन्दमविन्दन्। तदा शङ्खभेर्या-

नकाः गीतयुक्तवाद्यानि द्विजानामाशीर्वादाश्च नेदुः । नरा नार्यश्च प्रमुदिताः शोभनाभिर्वासस्स्रग्भिर्भूषिता आसन् । नग्नजित् धेनूनां सहस्राणि सुवर्णग्रीवाणां सुवाससां दासीनां त्रिसहस्रं नव नागसहस्राणि नागेभ्यः शतगुणान् रथान् तेभ्यश्शतगुणानश्वान् तेभ्यश्शतगुणान् भृत्यांश्चोपायनं प्रत्यपादयत् । तदा स सदारो महत्या सेनया वृतः स्नेहार्द्रहृदयश्च सन् सभार्यं श्रीकृष्णं रथमारोप्य यापयामास । भूपाः भगवतो यानं निशम्य यदुभिर्वृषैश्च भग्नवीर्या अपि नितान्तमसहमानाः कन्यकां नयन्तं श्रीकृष्णं पथि रुरुधुः । श्रीकृष्णादिबन्धुप्रीतिकृदर्जुनो धृतगाण्डीवः सिंहः क्षुद्रमृगानिव शरसमूहान् प्रयुञ्जानान् तान् कालयामास । देवकीसुतः सत्यया श्वशुरदत्तोपायनेन च साकं द्वारकामधिगत्य तया सह रेमे ।

श्रीकृष्णः सन्तर्द(न्दर्श)नादिभिर्भ्रातृभिर्दत्तां केकयस्यापत्यभूतां निजपितृष्वसुः श्रुतकीर्तेः पुत्रीं भद्रां नाम कन्यामुदवहत् ।

सः मद्राधिपतेस्तनयां शुभलक्षणैर्देदीप्यमानां लक्ष्मणां नाम कन्यां सुपर्णस्सुधामिव स्वयंवरे एक एव जहार ।

एवंविधा नरकासुरं हत्वा तत्कारागृहादानीता अन्यास्सुन्दर्यो भार्याश्च श्रीकृष्णस्य सहस्रश आसन् ।

'भैष्मी जाम्बवती भामा सत्या भद्रा च लक्ष्मणा ।
काळिन्दी मित्रविन्दा चेत्यष्टौ पट्टमहास्त्रियः ॥'

---

# संस्कृतवाङ्मयम् ॥

## [भारतीपुष्पमालिका]

(Pandit K. S. Ramaswami Sastri, Baroda.)

——:o:——

जयतु जयतु सेयं भारती भूतधात्री
जयतु जयतु वेदोऽनन्तशाखाभिरामः ।
जयतु जयतु वाणी शास्त्रकाव्यस्वरूपा
जयतु जयतु धर्मो वेदवेदान्तवेद्यः ॥ १ ॥

शास्त्रं द्विधा प्रोक्तमपौरुषेयं समाधिनिष्ठैर्मुनिभिः सुदृष्टम् ।
अन्यच्च शास्त्रं पुरुषप्रणीतं धर्मार्थकामादिपुमर्थसिद्ध्यै ॥ २ ॥

अपौरुषेयं श्रुतिसंज्ञकं तदृक्साममन्त्रैर्यजुषा च रम्यम् ।
धर्मस्य तत्त्वं विहितं हि यत्र तद्ब्राह्मणं वेदविदो वदन्ति ॥ ३ ॥

आरण्यकं नाम तृतीयभागो वेदाख्यवृक्षस्य चिरन्तनस्य ।
सत्पल्लवैः पुष्पफलैश्च यस्य सुखार्थिनो वाञ्छितमाप्नुवन्ति ॥ ४ ॥

वेदान्तनामाऽयमनन्तरूपश्चतुर्थभागो बहुतत्त्वपूर्णः ।
तुरीयमात्मानमभिव्यनक्ति सच्चित्स्वरूपं जगतो विभिन्नम् ॥

चतुर्थवेदोऽयमथर्वनामा फलार्थिभिः सन्ततसेवितात्मा ।
वेदत्रयी दैवबलाधिगत्यै चतुर्थवेदस्त्विह लोकगुप्त्यै ॥ ६ ॥

पादव्यवस्थासहिता ऋचस्ता गीत्या युताः सामपदाभिधेयाः ।
न पादबद्धं न च गीतियुक्तं तद्वेदवाक्यं हि यजुस्समाख्यम् ॥ ७ ॥

ऋचश्च सामानि तथा यजूंषि चतुर्थवेदोऽयमथर्वनामा ।
तथोपवेदा इतिहासवेदधनुष्यगान्धर्वचिकित्सकाख्याः ॥ ८ ॥

वेदोपवेदैश्च विनिर्मितो यः सर्वाधिगम्यः स हि गेयवेदः ।
यं पञ्चमं वेदमुदाजहार गानप्रियो द्रौहिणिरार्यवृत्तः ॥ ९ ॥

शिक्षादिकं यच्च षडङ्गजातं सुशिक्षितानां सुलभावगाह्यम् ।
वेदाङ्गमन्यच्च महोपकारि यायावरोऽलङ्करणाख्यमाह ॥ १० ॥

यदीयविज्ञानबलेन वेदाः सुखावबोधा विदुषां भवन्ति ।
नित्येषु शब्देषु निसर्गतो यत् रसञ्च शोभां बहुधा तनोति ॥ ११ ॥

उभौ सुपर्णौ सयुजौ सखायौ वाक्यं त्विदं रूपकबोधरम्यम् ।
एकस्तयोः पिप्पलमत्ति चान्यो न भुङ्क्त एतद्व्यतिरेकशोभि ॥ १२ ॥

स्थानप्रयत्नादिसुशिक्षणाय नामक्रियाप्रत्ययबोधनाय ।
छन्दोनिरुक्तादिनिरूपणाय कालक्रियाविस्तृतिवेदनाय ॥ १३ ॥

षडङ्गजातं परमोपकारि वेदार्थबोधाय बुधैर्व्यधायि ।
पुराणमन्वीक्षणवाक्यतन्त्रे स्मृतिस्तथा पौरुषतन्त्रजातम् ॥ १४ ॥

वेदार्थविस्तारविधानहेतोः पुराणमष्टादशधा विभक्तम्।
पुराणभेदोऽयमथेतिहासः रामायणं भारतमेकमन्यत्॥ १५॥

प्रधानमेकं पुरुषं निबध्य धर्मोपदेशेन परक्रिया सा।
नैकप्रधानं पुनरन्यदेव काव्यं पुराकल्प इति प्रसिद्धम्॥ १६॥

वेदार्थदार्ढ्याय पुनः समीक्षा वादेन जल्पेन वितण्डया वा।
आन्वीक्षिकी सा परिरक्षणं यत् भदन्तनैयायिकसांख्यसङ्घात्॥

सहस्रवाक्यानि विवेचयन्ती वेदेभ्य आदाय विचारणाय।
वेदान्तवाक्येष्वविरोधभावं सम्पादयन्ती च तथाऽपरा सा॥ १८॥

मीमांसमाना श्रुतिवाक्यजातं न्यायैर्द्विधा धर्मपरात्मसिद्ध्यै।
पूर्वोत्तरा चेति विभक्तरूपा त्रैगुण्यनैर्गुण्यपरैर्वचोभिः॥ १९॥

विनष्टवेदार्थविबोधनाय मन्वादयस्ते स्मृतितन्त्रकाराः।
वितेनुरष्टादशधा विभक्ताः स्मृतीः श्रुतीनामनुगामिरूपाः॥ २०॥

चतुर्दशेमानि च वाङ्मयेऽस्मिन् स्थानानि धर्मस्य पुरातनानि।
वेदास्तथाङ्गानि सशास्त्रकाणि समग्रलोकेष्वतिविस्तृतानि॥ २१॥

विद्येति सर्वैर्विबुधैरिमानि वेद्यानि विद्यागुरुबोधितानि।
सर्वासु विद्यासु फलात्मकं तत् काव्यं पुनः पञ्चदशं च वेद्यम्॥ २२॥

रसात्मकं यत् कविवाग्विसृष्टं श्रुतेन यत्नेन च निर्मलेन।
यायावरो बुद्धिमतां वरेण्यः प्रोवाच सत्काव्यविधानदक्षः॥ २३॥

गुणाद्यलङ्कृतं काव्यं शास्त्रवद्धर्मबोधकम्।
प्रभुसम्मितवेदेभ्यः स्मृतिभ्योऽपि विशिष्यते॥ २४॥

वार्तया कामसूत्रेण शिल्पिशास्त्रेण योजिता।
दण्डनीत्या च भूपानां विद्याऽष्टादशधा स्मृता॥ २५॥

आन्वीक्षिकीं त्रयीं वार्तां दण्डनीतिञ्च शाश्वतीम्।
विद्यामुवाच कौटिल्यः दण्डनीतिं परे बुधाः॥ २६॥

दण्डस्य हि भयात्सर्वे स्वकर्माणि प्रकुर्वते।
ब्रुवते हेतुमेवं ते शुक्राचार्यानुयायिनः॥ २७॥

वार्ताञ्च दण्डनीतिञ्च बार्हस्पत्यास्तु मन्वते ।
सद्वृत्त्या विनयाधानात् लोकयात्राप्रवर्तनात् ॥ २८ ॥

त्रयीं दण्डस्य नीतिञ्च वार्ता विद्यास्तु मानवाः ।
त्रयीमार्गानुसारिण्यावितरे मन्वते हि ते ॥ २९ ॥

साहित्यमेवमन्याञ्च पञ्चमीं रसिकादृताम् ।
यायावरस्तु मनुते विद्यां बुद्धिमतां वरः ॥ ३० ॥

धर्मार्थकाममोक्षाणां वेदनं जायते यतः ।
विद्या इमा बहुविधा लोकयात्राप्रवर्तिकाः ॥ ३१ ॥

मुनयः सूत्ररूपेण भाष्यवार्तिकवर्त्मना ।
प्राचीकशन्निमा विद्या लोकानां हितकाम्यया ॥ ३२ ॥

गुरुभ्यो हितकारिभ्यो नमोवाकं प्रशास्महे ।
यैरिमाः पालिता विद्याः स्वकन्या इव भारते ॥ ३३ ॥

रामेण रचिता सेयं पद्यैरनतिविस्तृतैः ।
पुष्पमाला मुदे भूयात् भारतीवक्षसि स्थिता ॥ ३४ ॥

---

पेक्सिपयर् कृतं

# यथाभिमतम् ॥

II 7.

:0:

प्रेक्षणकम् 7. वनम् । उत्पीठिका एका निवेशिता ।

[प्रविशन्ति ज्येष्ठो राजा, अमीन्स्, अन्ये च प्रभवः ।]

ज्ये. राजा—मन्ये स मृगरूपेण परिणतः, यतः यत्र कुत्रापि मनुष्यरूपेण न दृश्यते ।

प्रथमः प्रभुः— महाराज, अद्यैव स इतो गतः । अत्र गीतं किमपि शृण्वन् प्रहृष्टः अवर्तिष्ट ।

ज्ये. राजा— अपस्वराणां राशिः सः । स यदि सङ्गीताभिलाषी भवति नूनमचिराद् भूतानां विशरणं श्रोष्यामः । गत्वा तं गवेपय । ब्रूहि च तं तेन सम्भाषितुमहमिच्छामीति ।

## प्रविशति जाक्विस् ।

प्रथमः प्रभुः— स्वयमागच्छन् सः मां श्रमाद् वारयति ।

ज्ये. राजा—कथमिदानीम् आर्य, का नाम इयं ते वृत्तिः, यत्र तपस्विनः त्वत्सुहृदः त्वत्सन्निधानाय पर्युत्सुकीभवन्ति । किमेतत्, प्रहृष्टो लक्ष्यसे ।

जाक्विस्— जडः, जडः । वने कञ्चन जडमहमद्राक्षम् । चित्रवासा* जडः । धिगिमं लोकम् । यथाऽहमन्नेन जीवामि ‡ तथा कञ्चन जड-महमद्राक्षम् । सः अधः शयितः आतपेन आत्मानं तापयति स्म । उपालब्ध च देवीं नियतिं सुबद्धैर्वाक्यैः । अथापि स जडः । तमह-मवादिषम्— "सुप्रभातं जडः' । इति । स प्रत्यवादीत्— 'मैवम् । याव-न्मामीश्वरः वित्तसम्पन्नं करोति तावत् न मां जडं ब्रूहि" । ततः परं सः कञ्चुकभस्त्रिकातः कालयन्त्रं† किञ्चिदुद्धृत्य मन्दप्रकाशया दृशाऽव-लोक्य निपुणमाह—"अद्य दशघण्टाः । इत्थं वयं पश्यामः कथं जग-च्चलतीति । इत एकघण्टातः पूर्वं नव घण्टा अभूवन् । इत एकघण्टातः परं एकादश भवेयुः । ततश्च घण्टामनुघण्टां परिणताः परिणताः, घण्टामनुघण्टां जीर्णा जीर्णाश्च भवामः । तेन च कथा काचन निष्प-द्यते ।" एवं चित्रवसनेन जडेन कृतां कालतत्त्वमीमांसां शृण्वतो मम अन्तराक्रोशोऽजनि— जडा अप्येवम् अगाधां तत्त्वचिन्तां कर्तुं प्रभव-न्तीति । हसितवांश्चाहम् अविच्छेदेन एकां घण्टां तदीयं 'कालयन्त्रम्' अनुसृत्य । अहो उदारो जडः, योग्यो जडः । चित्रम् एकं वासः ।

ज्ये. राजा— को नाम स जडः ?

जाक्विस्— योग्यो जडः । आस्थाने स्थितः । वदति च सः 'यदि स्त्रियः अभिरूपास्तरुण्यश्च भवन्ति, ताः तद् ज्ञातुं क्षमन्ते' इति § । तस्य च चिरप्रयाणपरिशिष्टापूपवत् शुष्के मस्तिष्के आश्चर्याः प्रदेशाः

---

* नानावर्णैः वस्त्रखण्डैः निर्मितमिदं वसनं दारिद्र्यचिह्नमिति भाति ।

‡ इदं यथा सत्यं तथा तदपि सत्यमिति भावः ।

† Dial.

§ राज्ञामास्थाने स्थातुं या योग्यताऽपेक्षिता सा तस्यास्तीति ता जानीयु-रिति भावः । रोसलिन्द् सिलिआ इतीमे द्वे मनसि कृत्वा एव-माहेति स्पष्टमेतत् ।

सन्ति, अनुभवैरभिव्याप्ताः यान् अनुभवान् स विप्रकीर्णं प्रकटयति । अहो बत जडोऽहं भवानि । चित्रकञ्चुकायाहं स्पृहयामि ।

ज्ये. राजा — तत् त्वं लप्स्यसे ।

जाक्विस् — सा मे एका प्रार्थना* । परन्तु याऽत्र भवतो मतिर्मां प्रति 'अयं बुद्धिमान्' इति, सा परित्यक्तव्या । यथा वायुः सर्वत्र अविहतप्रसरः तथा भवितुं (यमिच्छामि तं परिवदितुं) महत्स्वातन्त्र्यं मे देयम्, यतो जडानां तत् वर्तते । अपि च यानहं मम जाड्येन अत्यन्तं प्रकोपयामि तैरत्यन्तं हसितव्यम् । अथ कुतस्तैस्तथा कर्तव्यम् ? तत् प्रधानदेवालयमार्गवत् अतिस्फुटम् । यं जडोऽतिनिपुणं विध्यति सः जानन्नपि अत्यनिपुणमभिनयति तस्य प्रहारस्य अज्ञानम् । अन्यथा बुद्धिमतस्तस्य मौर्ख्यं यादृच्छिकेनापि जडस्य दृष्टिपातेन विभज्य निरूपितं स्यात् । चित्रवसनावृतं मां कुरु अनुजानीहि च मां यन्मनसि भवति तत् स्फुटमभिधातुम् । आर्तस्यास्य लोकस्य शरीरगतं सर्वं मालीमस्यं निश्शेषमपनेष्यामि, यदि मदीयमौषधं ते प्रतिग्रहीष्यन्ति ।

ज्ये. राजा — धिक् त्वाम् । शक्यं मया वक्तुं यत् त्वं करिष्यसि ।

जाक्विस् — किम् ? काकिण्याः कृते† किमहं क्षेमं विना अन्यत् कुर्याम् ?

ज्ये. राजा — यत् पापदूषणं तदत्यन्तमनर्थकरं पापम् । त्वं तावत् स्वच्छन्दवृत्तिरासीः । अनियन्त्रणप्रसरः सन् यान्यकृत्यानि त्वमकरोः, यानि सङ्कटानि अन्वभवः तानि सर्वाणि सर्वजनवर्तितया त्वं घोषयिष्यसि ।

जाक्विस् - कथमेतत् । यदि कश्चित् दम्भमुपालभते तेन विशिष्य कस्य जनस्य दूषणं कृतं भवेत् ? स ह्युपालम्भः समुद्रवत् विशालं वितायते, उपालब्धुरुत्साहे शाम्यति सति स्वयं शाम्यति च । अनाढ्या पौरवनिता राजकुलोचितं व्ययं करोतीति ब्रुवन् अहं पुरे कां स्त्रियं विशिष्य निर्दिष्टवान् भवामि ? का मामागत्य वक्तुं धृष्णुयात् 'मां त्वमुपालब्धवानसि' इति ? यतः सा यथाविधा तथाविधा तत्प्रतिवेशिन्यपि भवति । एवं यो दाम्भिकः क्षुद्रः मामुपेत्य ब्रूयात् 'न मे जीवनं त्वदीयवित्तव्ययेन भवति' इति स किं कृतवान् भवति ? तत्परामृश । कथं तद्भवति ?

* Suit—वस्त्रमित्यप्यर्थः । † अल्पं लाभमुद्दिश्येत्यर्थः ।

किं तत्र भवति ? ब्रूहि तावत् कथं मे वाक् तत्र अपराधिनी भवतीति । यदि तया स शिक्षितो भवति तर्हि सः स्वस्मा एव अपराद्धवान् भवति । अथ स निर्दोषः, तर्हि मया कृत उपालम्भः वनचर इव पतत्री, केनापि स्वकीयत्वेन अगृहीतः परापतति । कः पुनरिह आगच्छति ।

(प्रविशति आर्लेण्डो उद्धृतासिः)

# प्रकृतिभेदः ॥

गृहिणी— अरे शेष, याहि, मृत्तैलं सर्वथा नास्ति ; झटिति क्रीत्वा आयाहि । हतो ब्राह्मणः कदा नु विद्युद्दीपं घटयिष्यति, कदा नु दीपसङ्कटं निवर्त्स्यति । भाटकं परं क्रमेण वर्धयितुं जाग्रद्भवति । गृहे वसतां सौकर्यं संविधातुं न चिन्तयत्यपि । शतकृत्वः प्रार्थितोऽपि न कर्णे करोति । याहि तावत् । लघु निवर्तस्व ।

शेषः— (भयमन्थरं) इदं गच्छामि मामि । अत्यन्तं क्षुधितोऽस्मि । यदि भोक्तुं किमप्यस्ति किञ्चिद् दीयताम् । भुक्त्वा गच्छामि । शिरश्शूलमपि किञ्चिद्वर्तते ।

गृहिणी— सर्वदा भोजने दृष्टिः । क्रीत्वा आयाहि रे, ततः परं भोक्ष्यसे । न तावति मरिष्यसि । यथावकाशं गमने, किं तव श्वशुरस्तत्र वर्तते, त्वां प्रतिपाल्य स्थित्वा दत्त्वा 'तात गच्छ पुनरागमनाय' इति सोपचारं प्रतिप्रेषयिष्यति ।

गृही— किमेतत् । बालः । क्षुधितोऽस्मीति वदति । भक्ष्यं वा अन्नं वा स्थितं किमपि दत्त्वा कुतो न प्रेषयसि ? किमिति वृथा किमपि किमपि भाषसे ?

2

कन्या— कथमरे, रिक्तेन अमत्रेण आगच्छसि । क्व मृत्तैलम्? तिष्ठ, अम्बामुपेत्य ब्रवीमि । अम्ब, अम्ब, पश्य पैतृष्वसेयं शेषम् । शून्यममत्रमादाय आगच्छति । अमत्रे न तैलमस्ति ।

गृहिणी— किमरे, कुत्र तैलम् । कुतो नाक्रैषीः? तैलमत्यन्तं नास्ति । अवश्यं क्रेयमिति ह्यवादिषम् ।

शेषः— अक्रैषं मामि । किन्तु क्रीत्वा आगच्छति मयि....

गृहिणी— कृत्स्नं तैलम् अधोऽपवर्जितवानिति ब्रूहि । अये दैव, किमहं कुर्याम् । एवंविधो हि बटुर्मम रक्ष्य आगतः । न किञ्चित् सामर्थ्यमस्ति । भुङ्क्ते उदरपूरं त्रिश्चतुर्दिनस्य । कान्वरे विपत् त्वयि आगच्छति जाता । न किल विषूची आगत्य त्वामहार्षीत् ।

शेषः— न मामि । प्रत्यागच्छति पश्चादागतस्य कस्यचित् द्विवृषभशकटस्य युगाग्रं मम दक्षिणकफोणेरुपरि झटिति घट्टयति स्म । अहमेकतोऽपप्तम् अमत्रं चान्यतः । यावदहमुत्थाय आत्मानं पर्यवस्थाप्य देहे रक्तपांस्वादिकं प्रमृज्य गत्वा पश्यामि तावत् सर्वं तैलं निर्गतमभूत् । किमहं कुर्यां मामि?

गृहिणी— सर्वं तैलमपवर्ज्य धीरं वदसि किमहं कुर्यामिति । अपेहि, कञ्चन याचस्व अथ वा कर्म कुरु, वेतनं लभस्व, पुनस्तैलं क्रीत्वा आयाहि । एषु दिनेषु क्व वसु लभ्यते एवं त्वया नाशयितुम् । न गृहस्यान्तरागच्छ ।

गृही— बालः । किं बुद्धिपूर्वमकार्षीत् । कस्य स्खालित्यं न भवति । दैवायत्ते कार्ये किमयं तपस्वी करोतु । मुञ्च विषयं तत्र । न वाचि पारुष्यं श्रेयसे ।

---

T ४८ TIRUPATI.



# पुस्तकपरामर्शः ॥

———0———

1 **A Descriptive Catalogue** of the TAMIL MANUSCRIPTS Vol. VII. D. Nos. 2726 to 2949.
Price Rs. 13—4—0.

2 **A Trieunial Catalogue** of TAMIL MANUSCRIPTS collected during the years 1943—44 to 1946—47. Vol. IX Part II B Nos. 1474 to 1605.

by Syed MUHAMMED Fazlullah SAHIB BAHADUR, M.A.L.T. ex-curator and T. CHANDRASEKHARAN, .M A L T., Curator, Government Oriental Manuscripts Library, Madras

यथापूर्वमत्रापि प्राचीनचरित्रविषयविमर्शनप्रवृत्तानां अत्यन्तमुपयुक्तानां हर्षावहानां च बहूनामंशानामावेदकाः सुबहवो द्राविडग्रन्थाः कीर्तिताः विवृतविशेषाश्च । [सं]

---

श्री. य. महालिङ्गशास्त्री M. A. B. L. अस्मत्पत्रिकानुवाचकानां परिचितपूर्वः, यतस्तत्कृतिः कौण्डिन्यप्रहसनं रसिकहृद्यं कतिभ्यश्चित् वर्षेभ्यः प्रागत्र प्रकाशितम्। जीवत्सु उत्तमेषु विरलेषु संस्कृतकविषु अयमेकः । तदीयां व्याजोक्तिरत्नावलीम् आङ्गलयनुवादसहितामद्य ससन्तोषं प्रकाशयितुमारब्धवन्तः स्मः । सहृदया नूनमनया प्रमुदिता भविष्यन्ति । [सं]

---

न शस्त्रघातो न च रक्तपातः सत्यध्वजाः शान्तिपराः सुयोधाः ।
तथापि राज्यं युधि निर्जितं यैः न्याय्येन मार्गेण त एव धीराः ॥ १ ॥

अवैदिकैर्म्लेच्छजनैश्च भूयसा समावृतायां भुवि भारतीयैः ।
चिराय वेदाः परिरक्षिता यैर्धर्म्येण मार्गेण त एव धीराः ॥ २ ॥

गुणांश्च रीतीरसदलङ्कृतीश्च काव्यस्य शोभां समुदाहरन्ति ।
प्रतीयमानं हि रसादिकं यत् तदेव रूपं रमणीयतायाः ॥ ३ ॥

गद्यं कवीनां निकषं वदन्ति पद्यं परं केचिदुदाहरन्ति ।
रसात्मकं यद्दशरूपकाव्यं तदेव रूपं रमणीयतायाः ॥ ४ ॥

Pandit K. S. Ramaswami Sastri, Baroda.

Registered No. M 2300.

Book XXIII ॥ श्रीः ॥ Nos. 5 & 6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥



| | | | |
|---|---|---|---|
| पु. २३] कलि | ५०५० विरोधि | मकर<br>कुम्भ | साधारण सं ३<br>शास्त्रानुबन्ध सं ३<br>आहत्य ,, ६ |



# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

January & February 1950.

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sastraic Supplement Rs. 2—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम्। सानुबन्धाया द्वे रूप्ये।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।
५. एतत्पत्रिकालक्ष्यांविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन्। गद्यरूपेषु अधिकतर आदरः।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण)।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः। ३०९—३१६

1 मेनका।
2 व्याजोक्तिरत्नावळी।
3 सर्वानर्थपरिहारः।
4 राज्यभारः।
5 नरकवधः विवाहश्च।
6 काव्यपुरुषोत्पत्तिः।
7 यथाभिमतम्।
8 प्रकृतिभेदः।
9 पुस्तकपरामर्शः।
10 प्रतिबोधनम्।(wrapper)

TIRUPATI.

व्यसनकरे विषये यत् किमपि साह्यं मया क्रियमाणं भवतामपेक्षितं चेत् तदहं सप्रमोदं कर्तुं सज्जोऽस्मि । अपेक्षितं प्रति लिख्यताम् ।

सञ्जीव्यार्यः

....इत्येवं लिखितं दीर्घं लेखं वराहस्वामी द्वाभ्यामेव निमेषाभ्यामनुवाच्य समापयति स्म। तस्य वपुः पाणिपादं च आर्ता 'वेड वेड' इत्यकम्पत। किं नु स जागरः अथवा स्वप्न इति सन्देहो बभूव । स्वकीये चक्षुषी अविश्वसन् सः ते प्रमृज्य लेखं पुनरपि सकृदनुवाचयामास । तस्य मुखं सद्यो विकृतिमभजत । नेत्रयोः बिम्बफलवदरुणीभूतयोः, ताभ्यां अग्निस्फुलिङ्गाः रक्तकणाश्च निष्पतन्ति स्म । दिग्भ्रमं भेजे। किमयमाकाश उत भूमिरिति न प्रत्यभात् । मनसि चण्डमारुताधिकबला असङ्ख्येयाः प्रतीतयः प्रादुर्भूय जगदेव आवृण्वन् । रौद्राकारः कोप उच्छ्रित उल्ललति स्म । सद्यो मुसलमादाय पेरुन्देवी कोमला श्यामार्य इत्येषां त्रयाणां मूर्धानं एकेन प्रहारेण भित्त्वा शकलीकृत्य अनुवातं किं नु विकिरेयमिति मेने । सर्वथा निष्कलङ्का निरपराधा च स्वपत्नी किल अस्थाने आत्महत्यां कृतवतीति आर्तिः दुःखं अश्रु च उदजृम्भन्त। वीरावेशविजृम्भिताभिः नानाविधाभिः चित्तवृत्तिभिः अतीव परवशीकृतः सः इतिकर्तव्यतामुग्धः लुठ्यन् सिंहवत् गर्जति स्म । हिरण्यकशिपोर्वक्षो विदार्य मालावद् धारणमभिसन्धाय प्रादुर्भूत उग्रनृसिंह इव पटपटायितः मूर्तः कोपो भवन् खट्वात उत्थातुमयतत । प्रथमम् अग्रजाप्रभृतीनां सविधं गत्वा तेषां वञ्चकतां प्रकाश्य सर्वान् एकधा छेत्तुं मतिमकरोत् । तस्मिन्नेव क्षणे परिपूताया मेनकाया अन्वेषणं कञ्चित् करवाणीत्यमन्यत । किन्तु ततः पूर्वं बहुभिः कृते अन्वेषणयत्ने निष्फले, स्वेन पुनः अन्वेषणकरणे परं आत्महत्यया मृता किन्तु प्रत्यावर्त्स्यतीति पश्यन् नष्टप्रत्ययो नष्टधैर्यश्च बभूव । खट्वात उत्थातुं एकद्वान् वारान् यत्नमकरोत्। अपि तु स्वजानुविन्यासेऽप्यशक्ततया अतिविसंष्ठुलः तूलिकायां साचीबभूव। वाचिकं पुनरवालोकयत् । तत्र संहितानि अन्यानि काकदानि सर्वाणि अपठत्। मेनकाया मरकायाय विक्रयणं यत्र लिखितं

तस्य लेखस्य स्वानुजया कोमलया लिखितता, तस्याधस्तात् श्यामार्येण पेरुन्देव्या च यत् हस्ताक्षरं दत्तं तच्च अपश्यत् । मेनकापेटिकात उद्धृतयोर्लेखयोर्लिपीनां श्यामार्यावरजलिखितप्रार्थनापत्रलिपीनां च एकतामपश्यत्। मायाण्डिपिळ्ळै-अनेन नाटककार-वीरास्वामि नायुडु-अस्मै विलिख्य दत्तस्य सम्मतिपत्रस्य लिपीनां कात्स्न्येन अन्यथाभावं च अपश्यत् । किं कुर्यात् ? किं तदिन्द्रजालं उत तत्त्वप्रतीतिरिति संशयो मुहुरजायत । तदीयं शिरोऽभ्रमत् । बुद्धिराकुला बभूव । मनः सम्भ्राम्यति स्म। कोपेन हा हू इत्युल्लपन् दीर्घमुच्छ्वासममुञ्चत् ।

तस्य अवस्थायां तथाविधायां, कञ्चन लेखमागतं, तदनुवाचनसमनन्तरं तं तथा विक्रियाविशेपभाजं खट्वात उत्थातुं कृतप्रयत्नं च दृष्टवती श्वेतकन्या विवरीतुमशक्यां महतीं चिन्तां प्राप्य अनल्पेन भयेन तमुपसृत्य, क्षणमात्रेण तं तथा विक्रियां नीतवति तस्मिन् लेखे लिखितः को नु विषय इति पर्यालोचयामास । न किमप्यस्फुरत् । सद्यो विकसितसरोरुहाधिकेन शीतलिम्ना कामनीयकेन च विलसता मुखेन सा विनीतं खट्वासविधे स्थित्वा 'भवतां देहः अतिदुर्बलावस्थो भवति । रक्तमेव नास्ति किं भवतां एवमातुरीभवितुं युक्तम् ? किम् उत्थातुं युक्तम् ? इतः चतुःपञ्चैर्दिनैः उत्थातुं शक्तानां भविष्यतां भवतां अनेन मासाधिकं कालं खलु शय्यायां वर्तितव्यं भवेत । अहो वत, किञ्चित् सहध्वम् । शिरश्छेदापायवानपि स विपयो भवतु । तं चेदद्य भवन्तो गणयन्ति भवत्प्राणानामेव आपत् प्रसक्ता भवेदपि । मा मा। शयिता भवत' इति शान्तं सप्रेम च अनुनार्थति स्म । परं तु को विषय इति प्रष्टुं न सा अधृष्णोत् । तस्याः प्रियां वाचं श्रुतवतोऽपि तस्य क्रोधो मनागपि न शशाम । अथापि जानुनि रुजावत्त्वात् उपधानमपाश्रित्य शयितो बभूव । किन्तु हस्तौ पादौ ओष्ठौ नेत्रे च स्फुरन्ति आसन् । एकस्मिन् निमेषे सहस्रं कार्याणि कर्तव्यानि मेने । उत्थातुमशक्ततया तु भग्नकटिः सर्प इव स्वस्थानस्थित एव सीत्करोति स्म । 'आः ! अन्ततः त्वदुक्तरीत्यैव कार्यमवसितमस्ति । इदमनुवाचय' इति वदन् तं काकदगुच्छमादाय

तां प्रति चिक्षेप। सा तं त्वरया आददे। आदानकाल एव तस्याः पाणिपादं शरीरं चावेपेताम्। सा लेखं अन्यानि च काकदानि पञ्चभिर्निमेषैरनुवाच्य समापयामास। तस्या मुखं सपदि विकृतमभूत्। परं तु सा किं तदानीं हृष्टा बभूव उत विषण्णा, इत्येतत् तस्या मुखदर्शनेन दुर्विज्ञानमासीत्। तस्या नेत्रयोः अश्रु असृवत्। अथापि सा विनयेन सान्त्वेन च भाषित्वा तस्यावेशमातुरतां च शमयितुं येते। 'यद्यपि मदभिसन्धिप्रकारेण कार्यं पर्यवसन्नं, एतत् प्रति मे युगपत् हर्षश्च विषादश्च भवतः। भवत्पत्नी आन्तं निष्कलङ्कपातिव्रत्यशालिनीत्येतत् ईश्वरेणैव भवन्मनस्तृप्तिकरं निरूपितमिति पश्यन्त्या जात आनन्दो नैव मे मनसि माति। एतदर्थमहं तं कारुणिकं महोदारं यावत्पर्याप्ति मनसा समर्चयामि। किन्तु अस्यां दुर्बलावस्थायाम् इमानि रहस्यानि प्रकटीभूय भवतामसह्यां बाधामजीजनन्निति एषा मे महती व्यथा भवति। दयया कोपं निरुन्ध्वम्। युष्मद्गृहिण्या कृतो ह्यात्मवधो न्याय्यः। तेन तत्प्रति वो व्यसनं न युक्तम्। अद्य भवतां गृहे बहव आगताः। तेषां पुरतः एषां दुर्विषयाणां प्रकटीभवनं खलु भवतामवमानाय। तच्च भवतां देहस्थितिं च विचिन्त्य अद्य सम्भ्रमं प्रशमयत। इतः चतुःपञ्चानि दिनानि क्षमाकरणेन कार्यहानिर्न भविष्यति। यद्भवद्भिः कर्तव्यं तत्पश्चात् कर्तुं शक्यम्। कृतं तु ते किमपि कृतवन्तः। भवद्गृहिणी च अपुनर्निवृत्तये गता। अद्य भवद्भिः कलहकरणात् गता न प्रत्यागमिष्यति। वृथा देहो न विनाश्यः। मम वाचं कृपया शृणुत। यदि वस्तुतो मयि वः प्रीतिरस्ति मत्प्रार्थनामङ्गीकृत्य तत् सत्यापनीयम्।' इति द्रुतचित्तमभिधाय चिबुकमालम्ब्य प्रार्थयत।

तस्या मोहनाङ्ग्या वागुरायां सर्वात्मना निपतितस्य वराहस्वामिनो मनसः स्थितिः तेन कथञ्चित् शैथिल्यमभजत। तथापि तस्य आर्तिः तदापि तथैवावर्तत। 'आः! किं कार्यं कृतवन्तो घातुकाः। तेन किरातकेन श्यामार्येण हि एतावद्वृत्तम्! अद्यावधि स योग्य इति मत्वा किल अहं मोषं गतोऽस्मि। अरेरे; मम सहजाते एवमपि नु कुर्याताम्? किमाश्चर्यम्, किमाश्चर्यम्! लोके एवमपि नु वर्तेत?' इत्युक्त्वा स्वदृष्टिं

मनश्च एकाग्रमवस्थाप्य विस्मितः केवलं शून्यं बहिरपश्यत् । पादनाडिकापर्यन्तं स तथैव चित्रवत् निष्कम्पं आसीत् । तत्पत्न्याः शोभना गुणाः दुर्लभं गाम्भीर्यं अद्भुतं रूपं च तदीये आन्तरे चक्षुषि अभासन्त । तदीयं चित्तं सर्वं गृहिणीं प्रति प्रावर्तत । मुक्तकण्ठं प्रजल्पितुमारभत । 'हा मेनके, मम दृष्टिभूते, मद्भाग्यरूपे, परिपूतात्मानं त्वां प्राप्तुं अहमयोग्य इति मत्वा किमात्महत्यामकार्षीः ? अहो बत किन्तु ते उदरज्वलनं वृथा भवेत् । त्वदीयः शापः किं सप्तसप्तपुरुषावधि निवर्तेत ? कियन्त्यपि जन्मानि आदाय कियदपि तपस्तप्त्वा किं त्वत्सदृशमनर्घं माणिक्यं विन्देयम् ? मादृशः पातकी दुर्भगशिरोमणिः अलक्ष्मीनिवासः अस्मिन् लोके न कश्चन भवेत् । केवलं शुनोऽप्यवरे मयि महालक्ष्मीतुल्या उत्तमस्त्री कथं स्थिरा भवेत् ?' इत्यवादीत । तदीयः शोकः वननदीप्रवाहवदभिवृद्धः तं अवपीडयति स्म । मूर्छितस्तथैव पपात । तदा समीपे स्थिता सा दुर्लभगुणा भामिनी तद्दर्शनेन अतीव व्याकुला रुदन्ती तन्मूर्छानिवर्तनौपयिकमकरोत् । तस्य तेन कोऽनर्थो जायेतेति चिन्ताक्रान्ता समतप्यत । नानाविधाश्चिकित्साः अर्धनाडीं यावत्कृतवत्यां तस्यां स पुनः प्रबोधमभजत । उपोपविश्य सा तं स्वोपरि साचीभूतं कृत्वा किमप्यौषधं पाययामास । स तदानीमपि आकुलचेताः शून्यमाकाशं तां कन्यां चालोकत । रुदितं आर्तिश्च विजृम्भिते तस्य कण्ठं न्यरुन्धाम् । अश्रु अगलत् । 'हा हन्त मेनके, मेनके, इति लक्षकृत्व आह्वानेऽपि त्वं किमितः परं त्वदीयं सुन्दरं मुखं दर्शयिष्यसि ? आः, 'स्त्रीदैवम्' इत्येव त्वं कीर्तनीया । आलये त्वां प्रतिष्ठाप्य वन्दनमपि युक्तम् । भूलोके मनुष्यैः प्राप्तुं शक्यां सर्वां सम्पत्तिं ममोपकृतवतीं कल्पलतां त्वां प्राप्यापि सुखानुभवभाग्यहीनस्य मे इतःपरं त्वत्त उत्कृष्टं किं वस्तु लभ्यम् ? त्वदपगमानन्तरं जीवामि चेत् अपर्यन्तं व्यसनमेव मे शिष्येत । ममापि प्राणानां त्याग एव सर्वदुःखौषधम् । 'मज्जीवितेश्वरि, मन्नेत्रभूते, अखण्डेक्षो, शुकीव हि सञ्जल्पेः । चिन्तितं सर्वं कामधेनुवद् दद्याः । अधीतवती । समर्था । महापुरुषस्य पुत्रीति स्वल्पोऽप्यहङ्कारः किमासीत् ? उच्चैर्वचनं

Sir, Camel! who art so high above all! What are these miserable honey-suckers (the bees) who daily beg in front of bowers, to revile at thine unique manifestation of taste in the Nimba (leaves)? Men of the common sort are not generally competent to question the peculiar ways of the great. Was it ever considered derogatory of the god Gangadhara that he loves the Dhattura flower?
8

दन्तीन्द्रः सलिलाशया परिपतन् दावावलीढाद्वनात्
शुष्यत्तालुरुदग्रचण्डकिरणप्लोषप्रसर्पच्छ्रथः ।
तोयाभ्युद्गमकूपकच्छसलिलैः स्तोकैरपश्यन्नहो
सन्तापोपशमं विनिन्दति भृशं स्वीयां महाकायताम् ॥ ९ ॥

The elephant king escaping from the fire-stricken forest and roaming in quest of water with throat parched up with thirst and limbs reeking with the severity of the midday sun, sorely deplores the unwieldy dimensions of his own body, because of which he cannot have his irritation allayed by a plunge into scanty collections of waters at the springs, wells or marshes. 9

अद्रोहेण वने वने तृणभुजो हन्यामहे द्वीपिभि-
र्हेलाखेलपरिप्लुतान् मृगयवो गृह्णन्ति नः प्रत्यहम् ।
गुल्मश्वभ्रदवाग्निभिः सविपदः शश्वद्भया हा वयं
राजन्नेणशिशुं त्वयैकमवता सङ्गः कथं विस्मृतः ॥ १० ॥

We eat our harmless morsels of grass in the forests, and we are killed by tigers. We jump and run about in sport, and we are everyday caught in the traps of hunters. We live alas! in constant fear of forest fires and dangers in every bush and hollow. Oh,

Moon Lord! indeed, you have taken into your protection a single young one of the deer kind, but, what a pity! you forget the whole lot of us! 10

चूडाभोगिकलानिधी तव कथं तुल्यं गतौ लाल्यता-
मास्तां वैतदमी वयं न भगवन्नाक्षेप्तुमत्नेश्महे ।
प्रक्ष्यामः परमेतदप्यभिमतं किं ते कृपालो, तयो-
रेको यद्विषमुद्गिरन् व्यथयते पीयूषसारं परम् ॥ ११ ॥

Is it meet that the serpent should equally be the object of your loving caresses on your crest with the abode of kalas (the moon)? But Oh Lord! we would rather drop that question as it is not in our competence to raise objections in such matters. Still, we would ask you, oh, merciful one! how could you knowingly acquiesce in the inequity of the former torturing with his poisonous breath the latter who in his essence is nectar itself? 11

इतः कोकाक्रन्दः कटु रटति भेकावलिरियं
गरुत्क्षेपाटोपैरिह पतति कारण्डवकुलम् ।
असौ ग्राहं ग्राहं शफरपृथुकानत्ति च बकः
सरस्यस्मिन् हंस, क्षणमपि न ते वस्तुमुचितम् ॥ १२ ॥

Here the Chakravaka birds pour forth their lament. Here the frogs croak harshly. The ravens here hop about with noisy fluttering of the wings. Here the crane swallows the young one of the fish catching them every now and then. Oh Swan! this lake is not a fit place for you to reside in, even for a minute. 12

साजात्यं प्रथयन् मराल भवता सोऽयं वराको बकः
प्राप्तो वर्ष्मणि पुण्डरीकसुषमां भुङ्क्तां मृणालाङ्कुरान्।
गर्वान्निर्विशतु श्रितोर्मिशिखरो डोलाविहारोत्सवं
नीरक्षीरविवेचनेऽपि पटुतां किं दर्शयिष्यत्ययम् ॥ १३ ॥

The wretched crane, endowed, as he is, with a complexion white as the lotus, may, claiming kinship with you, Oh swan! nibble at the delicate fibres of the lotus stem, or may, with high conceit enjoy the felicitous rocking on the crests of waves (in your manner). But will he ever show evidence of your wonderful ability in separating milk from water? 13

हंहो जाल्म, दवावलीढविपिनव्याधूतधूमावलिं
दृष्ट्वा भूरिपतत्स्फुलिङ्गजटिलं नृत्ताय किं सज्जसि।
केकिन् भोः कुरु सत्वरं निजतनोर्यत्नेन रक्षां, यदि
स्तोकेनापि विलम्बसे परिणतिः कष्टा भवेत्काचन ॥ १४ ॥

Alas, you fool! would you prick yourself up for a gaily dance mistaking the heavy trail of smoke emerging from the fire stricken forest and emitting volumes of glowing sparks, for winter clouds? Ah! peacock! take speedy caution to save yourself. If you tarry even for a minute, such a distress as I shrink from describing is sure to follow. 14

त्वत्कण्ठस्वरमाधुरी दिशि दिशि प्राज्ञैरभिष्टूयते
त्वामाहुर्मधुमण्डनं त्वयि सुखी लोकः सुहृद्दर्शनः।
त्वं हि श्लाघ्यतमः पिक, द्विजकुले मोदस्व कस्ते निजा-
पत्यत्यागगतां मलीमसकथां धृष्टः पुरो वक्ष्यति ॥ १५ ॥

The melody of your voice is extolled in every direction by the knowing. You are the accredited ornament of the vernal season. All the happy individuals in the world look upon you as a friend. In the midst of the twice-born species (the birds) you are certainly the most praiseworthy. Rejoice, Oh Kokil! (immune from impeachment) for, who will dare to divulge in your presence the dark incident of desertion by you of your young ones? 15

श्वैत्यं किञ्चन साध्यते यदि तनोर्हंसोऽस्म्यहं पश्यता-
मुद्रास्यामि कुहूः कुहूरिति यदि स्यामेष साक्षात्पिकः ।
इत्यास्तां वहुधा विकथ्य यदि ते काक प्रमाणं वच-
स्त्वज्जातेरभविष्यदस्तमवनौ नामापि कालाद्बहोः ॥ १६ ॥

Enough of your empty boast, oh crow! that if the complexion of your body is but a little improved to shining whiteness, you will for all appearance be a swan; and that if you but sing out the note of 'Kuhu', 'Kuhu' you will at once be none else than the Kokil itself. If all this were true, I do not doubt that the very name of your race would long have disappeared from the face of the earth. 16

वेतण्डोत्कटदानवारिणि कुतः स्वेच्छारतिर्भृङ्ग ते
पातुं तत्र किमस्ति किञ्चन मधु घ्रातुं च वा सौरभम् ।
फुल्लेयं मधुशालिनी वनलता न त्वां विना राजते
तां सम्भावय कर्णशूर्पनिहतो मा तेन मृत्युं गमः ॥ १७ ॥

Why should you take a wanton rancy for the stream of the elephant's rut? Ah, Bee! Is there any honey for you in it to suck, or any perfume to inhale? This forest creeper blooming with honey-speckled flowers looks forlorn

# उद्यानपत्रिका ॥

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २३] कलि ५०५० विरोधि { मकर / कुम्भ } { साधारण सं ३ / शास्त्रानुबन्ध सं ३ } आहत्य सं ६


# सर्वानर्थपरिहारः ॥

—o❀o—

PATTUKOTTAI, January 22.

A sovereign remedy and a permanent solution could be found in the great teaching of the Vedas and the Dharmasastras for all the ills and troubles that have now engulfed the entire world, and peace and good will on earth would reign if only we acted up to the spirit of the Vedas, emphasised Mr. Ch. Raghava Rao, Judge, Madras High Court in the course of his presidential address to the first Sammelanam of the Veda Dharma-sastra Paripalana Sabha, held here, yesterday.

[The 'HINDU' dated Wednesday, January 25, 1950. Page 12.]

सन्निहिते काले पट्टुक्कोट्टै-अत्र प्रवृत्ते वेदधर्मशास्त्रपरिपालनसभा-सम्मेलने आध्यक्ष्ये स्थितेन उत्तमाधिकरणप्राड्विवाकेन श्री. Ch.राघव राव्-महाशयेन यदुक्तं तदिह सारांशोद्धारेण प्रकाशितमस्ति । लोके सर्वत्र सम्प्रति वर्तमानं सङ्कटं इदमीदृशमिति वाग्मिनामपि वक्तुमशक्यम्। वेदोपदिष्टं मार्गमनुसृत्य प्रवृत्तौ क्रियमाणायां सर्वेषां अद्यतनानां अनर्थानां परिहारो भवेदिति इह सारांशः ।

अस्य अस्मदीयस्य भारतदेशस्य यो महिमा स सर्वः अन्ततो वेदशास्त्रमूलः। इह लोके सुखजीवनस्य अयं मार्ग इति शास्त्राणि निष्कृ-

ष्य सर्वजनहिततत्परतया दर्शयन्ति । पूर्वस्मिन् काले जनैः समस्तैः स मार्गः भक्त्या श्रद्धया च परिपालित आसीत् । तेन ते सुखमजीवन् । क्रमेण तत्र जनानामनादरः अजनि । तेनैव क्रमेण लोके जीवने क्लेशः अजनि । अन्वयव्यतिरेकाभ्यां स्फुटमिदं पश्यामः । तदद्य यदि सर्वसङ्कटपरिहारेण जनानां शान्तिभूयिष्ठा सुस्थितिः सम्पादयितुमिष्यते तर्हि स वैदिको मार्गः पुनः प्रतिष्ठापनीयः । गत्यन्तरं नैवास्ति ।

विशालेऽस्मिन् अस्मद्देशे कथमिदं तत्त्वं यस्यकस्यचिदेकस्यापि बुद्धौ न पततीति चिरात् विस्मिता विषण्णाश्च अवर्तिष्महि । दैवादद्य तदवगमक्षमः यथावगमं तत्प्रकाशनक्षमश्च अयमेकोऽस्तीति जानन्तो मोदामहे ।

---

# राज्यभारः ॥

I

## Woman thrown into fire.

### Outrage in Hyderabad Village

Secunderabad, March 14.

Venkatamma, the aged mother of the Patel of Devarpalli, a village in the suburbs of Hyderabad was thrown into flames by a gang of decoits on Saturday last, it is reported. Her partly charred body has been brought to the city.

It transpires that seven armed men entered the house of the Patel and started looting the house and beating the inmates. When the old woman declined to part with the ornaments on her person, a fire was made and she was thrown into it. The police are investigating.

हैदराबाद्-अन्तर्गते देवर्पल्ली-ग्रामे प्रदीपचोराः सप्त ग्रामणीगृहं प्रविश्य निवासिनो जनान् प्रहृत्य वस्तून्यपाहरन् । स्वधृतान्याभरणानि अवमुच्य दातुमनिच्छन्तीं वृद्धां ग्रामणीमातरं अग्निमुत्पाद्य ज्वालामालाजटिले तस्मिन् प्राक्षिपन्निति इयं वार्ता अत्र आङ्गलया उक्ता ।

## II

# Woman Stabbed by Thief

### INCIDENT IN CITY

MADRAS, March 13.

A daring theft occurred this afternoon in Appu Mudali Street, Mylapore, when a thief wounded a woman with a *bichuva* and succeeded in getting away with a gold chain.

Rukmani Ammal, wife of a music teacher employed in Adyar, was alone in her upstairs portion at No. 51, Appu Mudali Street, when at about 3-30 p. m., a dark man of medium height got up the stairs and enquired after one Mr. Srinivasa Aiyar. He was told that there was no such person living in the place. He pretended to get down the staircase and go away.

After about five or ten minutes he again appeared and repeated his enquiry. The woman told him emphatically that there was no such person in the place. Suddenly, he whipped out a *bichuva* and stabbed her on the upper left arm. He snatched her chin weighing eight sovereigns and rapidly descending the stairs, jumped on his cycle and made away.

As he was fleeing the woman and others raised an alarm. One Raghavan tried to stop the thief by catching hold of the back-wheel of the cycle. The culprit stabbed Raghavan on the right hand and made good his escape. Rukmani Ammal gave a complaint to the Mylapore Police She and Raghavan received treatment for their injuries at the Royapettah Hospital as out-patients.

The police are investigating.

अस्मिन् आङ्गलीमये वार्ताखण्डे 'मद्रनगरे दिवा अर्धाधिकासु तिसृषु घण्टासु स्वगृहोपरिभूमौ स्थितां काञ्चित् स्त्रियं शस्त्रेणाभिहत्य तस्याः कण्ठे स्थितां कनकशृङ्खलामाच्छिद्य पलायत कश्चित्पश्यतोहर इति, द्विचक्र-मारुह्य धावन् सः स्वग्रहणाय द्विचक्रस्य पश्चिमं चक्रमवलम्बितवन्तं कञ्चन पुरुषं च शस्त्रेणाभिहत्य विद्रुतः आत्मानमरक्षदिति, स्त्री च पुरुषश्च उभावपि वैद्यशालायां चिकित्सां लभेते इति, पालकाश्च परिशीलयन्त आसत इति चोच्यते ।

प्रतिदिनं वार्तापत्रिकासु ईदृश्यो वार्ताः बह्व्यः प्रकाशीभवन्ति । कतिपयेभ्यो दिनेभ्यः पूर्वं कल्कत्तागामिनो धूमशकटस्य जातया विपदा बहूनां प्राणापायोऽभवदित्यश्रृणुम । कैश्चन दुर्जनैः अयोमार्गस्य खिली-करणात् सा महती विपदुपनतेति वदन्ति । एवं स्वगृहं विहाय बहिः प्रयाणकरणे महती प्राणहानिपर्यन्ता आपद्भवति । स्वगृहेऽपि तु अस्मा-भिः निर्भयं वस्तुं न शक्यते । न परं रात्रौ निद्राणेषु जनेषु, अपि तु दिवापि, जागरेऽपि, एवं वस्तून्यपह्रियन्त इति चेत् इतोऽपि शोचनीया घोरा का दुरवस्था राज्ये भवितुमर्हति । अनर्थे वृत्ते ततःपरं पालका आग-च्छन्ति, विचारयन्ति, चोरे लब्धे व्यवहारं प्रवर्तयन्ति, इति सर्वमिदं काममस्ति । किं पुनरियदेव राजकार्यम् । अमार्गे गच्छतां जनानां सङ्ख्या दिने दिनेऽभिवर्धते । दण्डाद्भीतिः प्रायो नष्टा । श्रोतुमप्य-शक्यानि अतिक्रूराणि कर्माणि निश्शङ्कं कर्तुमनुमन्यते बहूनां मनः । चोरा अपि हि जीवन्तीं स्त्रियं ज्वलत्यग्नौ क्षेप्तुं कथं पर्याप्तधैर्या भवितु-मर्हन्ति । एवंविधा अक्रमा यत्र प्रवर्तन्ते तत् किं राज्यपदाभिधानार्हम् ? नाद्य राजा नाम कश्चिदस्ति यस्य शिरसि अयं दोषो निधीयेत । प्रजा-रूपा वयमेव अस्माकं राजानः । अस्माकं राज्ये दुस्सहमेवमुच्चावचं सङ्कटं जायते । उत्तरोत्तरमभिवर्धते । अत्रास्माभिरतीव लज्जितैर्भाव्यम् ।

राज्यप्रवर्तने इयान् क्लेशो वर्तत इति यो वेद स एकोऽपि नास्तीति भाति । उत्पन्नस्य सङ्कटस्य परिहारे एकतः स्थिते यथा तादृशं सङ्कटं नोत्पद्येत तथा करणे हि बुद्धिमद्भिर्यतितव्यम् । जनानां धर्मप्रवणता सम्पन्ना कार्या । नास्तिक्यप्रसरं प्रतिरुध्य ईश्वरास्तित्वं प्रति श्रद्धामुत्पाद्य जनानां मनसि कश्चन संस्कार आधेयः । ईदृशं प्रयत्नविशेषं विना अद्य स्थिता, क्षणे क्षणे वर्धमाना, आयतौ घोरतमा भविष्यन्ती लोकदुर-वस्था सर्वथा दुष्परिहरा ।

'स नो देवः शुभया स्मृत्या संयुनक्तु'

# नरकवधः विवाहश्च ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

—— o❀o ——

भूमिपुत्रो नरकासुरो वरुणस्य छत्रम इन्द्रस्य मातुरदितेः कुण्डले अमराद्रिगतं मणिपर्वतं चाहरत। लोकपालेषु मुख्यो वासवश्छत्रादिहरणजातमानभङ्गः सत्यभामाभवनमासाद्य भगवन्तं भौमचेष्टितमवेदयत्। तदा श्रीकृष्णः, भार्या सत्यभामा कुतूहलाविष्टेति वा, त्वदनुज्ञयैव त्वत्सुतं हनिष्यामीतीतिहासेनोक्तो मेदिन्यै दत्तो वरः सत्यापनीयः सा तु वसुधाया अंश इति वा, नारदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते सति कुपितां तां सान्त्वयितुं तुभ्यं पारिजाततरुमेव वितरिष्यामीति स्वेन प्रत्यज्ञायतेति वा मत्वा तया सह प्राग्ज्योतिषनामकं महीसूनोर्नगरं गरुडमारुह्य ययौ। तत्पुरं हि गिरिरूपैश्शस्त्रात्मकैश्च दुर्गैः परितो वर्तमानैर्जलाग्न्यनिलैर्घोरैर्दृढैरयुतैर्मुरस्य पाशैश्च दुर्गममवर्तत। माधवो गुर्व्या गदया प्राकारमद्रींश्च सायकैश्शस्त्राणि चक्रेणाग्निजलवायून् असिना मुरपाशान् शङ्खनादेन स्वैरिणां मुरादीनां हृदयानि च नितरां बिभेद। पञ्चशिराश्शयानो मुराह्वयो दैत्यो युगान्ताशनिध्वनिवत् भीषणं पाञ्चजन्यध्वनिं श्रुत्वा परिखाया जलादुदतिष्ठत्। प्रलयकालसूर्यानलदीप्तिसमानदीप्तिर्मुरो दुर्निरीक्षस्सन् त्रिशूलमुद्यम्य पञ्चभिर्वक्त्रैस्त्रिलोकीं ग्रसन्निवोरगो गरुत्मन्तमिव तं तार्क्ष्यमभ्यधावत्। स मुरः शूलमातोल्य बलेन वैनतेयाय प्रयुज्य पञ्चभिराननैर्व्यनदत्। स महान्नादो द्यावापृथिव्यौ सर्वेषां श्रोत्रविलं सर्वदिगन्तरमण्डकटाहमप्यावृणोत्। हरिर्वैनतेयायापतत् तत्त्रिशूलं बलेन शरौघैस्त्रिधा चकर्त। मुखेषु मुरं तैस्ताडयामास च। मुरोऽपि रुषा गदाग्रजाय गदामाक्षिपत्। दैत्यारिरागच्छन्तीं तां गदां स्वगदया सहस्रधा निर्भिद्य बाहू उद्धृत्याभिधावतस्तस्य शिरांसि चक्रेण लीलया लुलाव। मुरो निकृत्तशीर्षो गतासुरम्भसि वज्रेण छिन्नशृङ्गः पर्वत इव पपात। तस्य ताम्रादयस्सप्तात्मजाः पितृवधेन दुःखिताः कुपिताः प्रतिक्रियाकृतसङ्कल्पाः क्षोणीसुतेन प्रेषिताः धृतायुधाः पीठनामानं चमूपतिं पुरस्कृत्य समरार्थं निर्जग्मुः। दुस्सहास्ते विष्णुमासाद्य रुषा तत्र शरादीन् प्रायुञ्जत। अमो-

घवीर्यो भगवान् तेषां शरादीन् स्वमार्गणैस्तिलशः कर्तित्वा स्वबाणच्छिन्न-शीर्षादिकान् पीठमुख्यान् तान् यमसदनमलम्भयत्। धरात्मजो जनार्दन-चक्रसायकैः स्वसेनापतीनां मध्ये कांश्चित् निहतान् कांश्चित् दूरतः पाति-तांश्च निरीक्ष्य पारावारान्तर्द्वीपप्रभवैरास्रवन्मदैर्दन्तिभिस्सार्धं युद्धाय निष्क्रम्य सूर्यस्योपरिष्टाद्वर्तमानं तटित्सहितं नीलमेघमिव भासमानं गरुड-स्योपरिस्थितं सदारं केशवं विलोक्य तस्मै शतघ्नीं व्यसृजत्। तस्य सर्वे योधाः स्वस्वायुधैर्युगपदच्युतं प्रविव्यधुश्च। मधुसूदनः सुपर्णेनोह्यमानो व्यधन-समय एव तद्भौमसैन्यं निकृत्तमूर्धदेहादिकं निषूदिताश्वकुञ्जरं च कलया-मास। गरुत्मता तुण्डपक्षनखैस्ताड्यमाना आर्ता दन्तावलाः प्राग्ज्योतिषमे-वाविशन्। पृथिवीतनयो वैनतेयेनार्दितं स्वकीयं बलं पलायितं निशाम्य वज्र-प्रतिघातिन्या शक्त्या तं प्रजहार। तार्क्ष्यस्तथाविद्धोऽपि मालाहतोद्विप इव नाकम्पत। अथ दामोदरः खगेश्वरे वितथोद्यमस्य स्वहिंसनाय शूल-माददानस्य गजस्थस्य नरकस्य शिरस्सुदर्शनेन चिच्छेद। सकुण्डलं चारु-किरीटभूषितं तन्मस्तकं पृथिव्यां पतितं सदतिवेलमज्वलत्। नरक-सम्बन्धिनो हाहेति, ऋषयः साधु साध्विति चोचुः। सुरेश्वरास्तु कुसु-मानि विकिरन्तो मुकुन्दं तुष्टुवुः। ततो नरकस्य जननी क्षितिः वैकु-ण्ठमुपेत्य प्रतप्तजाम्बूनदप्रत्युप्तरत्नभास्वरे कुण्डले वैजयन्तीं वनमालां प्राचेतसं छत्रं मेर्वंशभूतं मन्दरशिखरं महामणिं च तस्मै समर्पयामास। अथो धरणिः प्राञ्जलिः प्रणता भक्तिभरिता देववरैरर्चितं विश्वेशं देवं तमित्थमीडांचक्रे। 'हे देवदेवेश, शङ्खचक्रगदाधर, तुभ्यं नमः। परा-त्मन् भक्तानुग्रहेच्छयोपात्तरूपाय ते नमोऽस्तु। स्रष्टृचतुर्मुखोत्पादकपङ्कज-नाभाय ते नमः। सत्कीर्तिमयनलिनमालाशालिने ते नमः। पङ्केरुह-वत्सुप्रसन्नप्रपन्नजनतापत्रयोपशमननेत्राय ते नमः। पद्मवत्सौगन्ध्य-सौकुमार्यादियुक्ताङ्घ्रये ते नमः। कल्याणगुणाकराय चतुर्मुखरुद्राद्यनुप्रवे-शेन जगत्सृष्टिसंहारौ मन्वाद्यनुप्रवेशेन स्वावतारेणापि स्थितिं च तन्वते ते नमो नमः। स्वरूपेण गुणैश्च निरतिशयबृहत्त्ववत् स्वासाधारणाभ्यां निमि-त्ताभिन्नोपादानत्वकार्यप्रपञ्चगतोत्पत्त्यादिविकारराहित्याभ्यां द्योतमानाय लोके एकाधिकरणेऽदृश्यमानं प्रतिपादितधर्मद्वयं घटयन्तीभिः अग्न्यादे-र्दाहकत्वादिवत् स्वासाधारणीभिरपरिमितशक्तिभिस्समिन्धानाय, उपादान-

त्वोपपादकचिदचिदन्तरात्मभावभास्वराय स्वरूपस्वभावविकारवैदेशिकाय प्रकृतिपुरुषकालशरीरकतया जगत्कारणत्वाज्जगद्रूपाय ते नमोऽस्तु' इति। अवनिरेवं स्तुत्वा भगवन्तं प्रति, 'हे प्रपन्नार्तिहर, अयं भगदत्तनामा नरकस्यात्मजो भीतोऽभयप्रदानार्थं मया तव चरणारविन्दं प्राप्यत। प्रपन्नमेनं पालय । अमुष्य शिरसि अखिलकल्मषापहं तव करकमलं न्यस्य' इत्यवदत् । एवं भक्तिनम्रया विश्वम्भरया वाग्भिरर्चितो वासुदेवोऽभयं तस्मै दत्त्वा भोग्यभोगोपकरणादिसमृद्ध्या जाज्वल्यमानं क्षमासुतस्य वेश्म प्रविश्य तेन विक्रमेण सिद्धादिभ्यो राजभ्यश्चापहृत्य निजमन्दिरे निरुद्धानि कन्यानां शताधिकानि षोडशसहस्राणि ददर्श । सर्वास्स्त्रियः प्रविष्टं वरश्रेष्ठं तं वीक्ष्य विमोहितास्सत्यो 'ममायं पतिर्भूयात्, अस्मदभिमतं धाता सत्यापयतु' इति प्रत्येकमभिसन्दधाना हृषीकेशे हृदयं निदधुः। केशवः शिबिकाभिः स्नापिताः धौतवस्त्राद्यलङ्कारिताश्च ताः कन्याः, अनर्घान् रथान्, महद्धनं, ऐरावतकुलोद्भवान् चतुर्दन्तान् बलवतः पाण्डरान् चतुष्षष्टिं मतङ्गजांश्च द्वारवतीं प्रति प्रेषयामास । पुण्डरीकाक्षः सुरेन्द्रागारं गत्वा अदित्यै कुण्डले दत्त्वा त्रिदशेन्द्रेणेन्द्राण्या च सत्यभामया सहितः पूजितस्सन् तया भामया चोदितः पारिजाततरुमुत्पाट्य गरुत्मत्यारोप्य सेन्द्रान्देवानायोधने निर्जित्य तं वृक्षं द्वारकामुपानयत्। स पादप आलवाले स्थापितस्सन् सत्याया गृहाराममशोभयत् । तत्सौरभमकरन्दयोर्लोलुपा भ्रमराः स्वर्गादन्वगच्छन्। पराजितो मघवान् मूर्धानमानमय्य किरीटाग्रैः पादौ स्पृशन् श्रीधरमाश्रितजनाभिमतप्रयोजननिष्पादकं कल्पशाखिनं ययाचे । महान्त एवं कृतवन्तं शक्रं मनसि निधायेत्थमगदन्— 'पुरन्दरः सिद्धार्थः समनन्तरं स्वप्रयोजनसाधकेन विश्वम्भरेण व्यरुद्ध्यत। तदनु याच्ञया प्राप्तकल्पद्रुमत्वादाढ्यो बभूव । तस्मात्सुराणामहङ्कारः आढ्यभावश्च निन्द्यः' इति ।

ततः पुरुषोत्तम एकस्मिन्नेव सुमुहूर्ते यावत्यो योषितस्तावत्सु सद्मसु तावद्रूपधरः सर्वत्रापि सम्पूर्णः प्रतिगेहं यौगपद्येन देवक्यादिबन्धुजनसमागमेन सम्पन्नश्च सन् यथावत् ता नारीरुपयेमे । अचिन्त्यकर्मकारी स गोविन्दो गृहीतमनुजविग्रहोऽपि निजस्वभावमजहदपि स्वानन्दानुभवपूर्णोऽपि भोग्यभोगोपकरणादिसमृद्ध्या समाभ्यधिकरहितेषु तासां सद-

नेषु विना विश्लेषमवतिष्ठमानः प्राकृतजनवत् गृहस्थधर्मानाचरन् रमणीयाभिस्ताभिस्सह रेमे । अपरिच्छिन्नस्य निरस्तसमाभ्यधिकसम्भावनस्य स्वभक्तचित्तानुवर्तिनो मुरारेरेकदैव स्वकीयतत्तद्दाराभिमतरूपधारणं किं चित्रम् ? अधुनाऽपि योगनिर्वाहको नारायणः स्वान्ते, बहिः समन्ताच्च परिपूर्णभक्तियोगैश्शतधा सहस्रधा च लक्ष्यते । ता रामाः ब्रह्माद्यविदितमहिमानं रमापतिमित्थं भर्तारमवाप्य मोदमेदुराः सानुरागहासे तत्पूर्वकावलोकने तत्पूर्वकनवसङ्गमे तत्र नर्मवचनेषु च लज्जां भेजुः । दासीशतवत्योऽपि स्वयमेव प्रियस्य प्रत्युद्गम वरासनसमर्पण पादप्रक्षालन ताम्बूलदान पादसंवाहनादिकैङ्कर्यप्रयुक्तश्रमापहरण वीजन गन्धमाल्यप्रतिपादनकेशप्रसाधन शयन स्नपनोपहारविश्राणनैर्दास्यं वितेनुश्च ।

'दिव्यगोपः श्रीकृष्णः पितृश्वशुरादिभिः प्रतिरुद्धाः परस्सहस्रा गोपिका दिनकरतनयायास्सैकते वंशनादानुयातैः पादुकामञ्जुनादैरयत्नाद्वशमनयत् ।' 'गोपभार्याणां सम्भोगेऽपि तस्य स्त्रीसङ्गराहित्यरूपं ब्रह्मचर्यं न श्लथमासीत् । अबाधितेनैव येन ब्रह्मचर्येण व्यासादीनां समक्षमश्वत्थामास्त्रविप्लुष्टमुत्तरागर्भच्युतस्य परीक्षितो जीवनं सम्पन्नं भविष्यति' इत्यर्थकस्य

'विमोहने वल्लवगेहिनीनां न ब्रह्मचर्यं विभिदे तदीयम् ।
सम्पत्स्यते बालकजीवनं तत् येनैव सत्येन सतां समक्षम् ॥'

इति यादवाभ्युदयचतुर्थसर्गचतुष्षष्टितमश्लोकस्य व्याख्याने 'ननु गोपकन्याभुक्ताः ब्रह्मचर्यं च न स्खलितमिति कथम्' इत्याशङ्क्य,' उच्यते—पुरुषस्य ब्रह्मचर्यं रागपरवशानां तत्सम्भोगाभावे प्राणान्धारयितुमशक्नुवतीनां स्त्रीणां तत्प्राणत्राणाय परिग्रहणे न लुप्यते' इत्यभिधाय इममर्थं महाभारतोक्तोलूप्यर्जुनवृत्तान्तेनोपपाद्य गोपगृहिणीनां भगवत्परिग्रहालाभे प्राणधारणाशक्ततां भागवतेन मूलश्लोकेन च प्रतिपादितामुपवर्ण्य 'अपि चास्य ब्रह्मचर्यस्खलनं न तावच्चरमधातुमोक्षणं, भागवते 'आत्मन्यवरुद्धसौरतः' इति तस्य गोपिकासम्भोगे वीर्यनिरोधोक्तेः, नाप्यालिङ्गनादिना, सर्वात्मनस्तस्य स्वशरीरातिरिक्तशरीराभावात् स्वशरीरालिङ्गनादेश्च ब्रह्मचर्याविरोधित्वात्' इत्युपन्यस्य स्वशरीरालिङ्गनादेश्च ब्रह्मचर्याविरोधित्वं पाद्मोत्तरखण्डोपनिबद्धोमामहेश्वरप्रश्नप्रतिवचनाभ्यां मूलश्लोकेन च समार्थ्यत ।

---

# काव्यपुरुषोत्पत्तिः ॥

(Pandit K. S. Ramaswami Sastri, Baroda.)

## I

अथैकदा देवगुरुर्महात्मा शिष्यैर्विनीतैः परितस्थितद्भिः ।
सारस्वतेयस्य गुरोः प्रभावं विज्ञापितो वक्तुमुवाच हर्षात् ॥ १ ॥

पुरा कदाचित् तनयाभिलाषात् सरस्वती वागधिदेवताऽपि ।
तेपे तपो ब्रह्मणि भक्तियुक्ता विचित्रसंसारविधानदक्षे ॥ २ ॥

प्रीतो विधाता तपसो बलेन प्रोवाच तां पुत्रमवाप्स्यसीति ।
काले गते वागधिदेवतेयं काव्यस्वरूपं तनयं प्रपेदे ॥ ३ ॥

जातः कुमारः प्रणनाम भक्त्या छन्दोमयीं वाचमुवाच धीरम् ।
सारस्वतेयः श्रुतिमात्रसिद्धां प्रहर्षयन्मातरमाद्यवाचा ॥ ४ ॥

'वाङ्मात्रमेतत्परिदृश्यमानविश्वात्मना यच्च विवर्ततेऽम्ब ।
सोऽहं तदाकारधरोऽस्मि काव्यः पादौ त्वदीयौ शरणं प्रपद्ये ॥ ५ ॥'

निशाम्य माता सुकुमारमेनं निशम्य चैवास्य वचोविकासम् ।
जयेति वाचा परिवर्धयन्ती बभूव हृष्टा वचसां विधात्री ॥ ६ ॥

अदृष्टपूर्वामुपलभ्य देवी छन्दोमयीं लौकिकवाचि मुद्राम् ।
ससंमदं तं परिरभ्य पुत्रं स्वाङ्के समादाय जगाद वाक्यम् ॥ ७ ॥

'जिताऽस्मि वत्स प्रियमातनोषि छन्दोमयीं वाचमुदीर्य मह्यम् ।
पुत्रात्पराभूतिमुदाहरन्ति द्वितीयपुत्रोद्भवमेव वृद्धाः ॥ ८ ॥'

पुरातना बुद्धिमतां वरेण्या गद्यं मनोज्ञं रचयांबभूवुः ।
पद्यं न चैव प्रबभूवुरेते स्वयं विधातु निगमेषु दृष्टम् ॥ ९ ॥

छन्दस्वदेतद्वचनं प्रवृत्तं त्वत्तो जनानां मुदमादधातु ।
अहो सुरूपोऽसि मदीयपुत्र शब्दार्थयोगो हि वपुस्तवेदम् ॥ १० ॥

सुसंस्कृता वाङ्मुखतां प्रपन्ना यत्प्राकृतं बाहुरयं त्वदीयः ।
पश्चात्तनं भागमनुत्तमं तेऽपभ्रंशभाषा परिगृह्य भाति ॥ ११ ॥

पिशाचभाषा पदयोर्युगं ते विमिश्रभाषा हृदय प्रविष्टाः ।
प्रसादमाधुर्यसमत्वरूपा औदार्यकान्तिप्रथमा गुणास्ते ॥ १२ ॥

स्वभाववक्रादिसदुक्तियुक्तं वचो मुखात्ते मुदमातनोति ।
आत्मा त्वदीयो हि रसस्वरूपश्छन्दांसि ते रोमकदम्बकानि ॥ १३ ॥

प्रवल्हिकाप्रश्नतदुत्तराणि वाक्केलिरूपाणि भवन्ति वत्स ।
शब्दार्थचित्राणि विभूषणानि शोभां परां ते दधते शरीरे ॥ १४ ॥

भूतं भवद्भावि पदार्थजातं वक्तुं समर्था श्रुतिदेवतैत्रम् ।
त्वामेव लोकोत्तररम्यरूपं पुराणशब्दैः प्रथितं करोति ॥ १५ ॥

'चत्वारि शृङ्गाणि पदत्रयं च शीर्षद्वयं तस्य करास्तु सप्त ।
त्रिधा निबद्धो वृषभस्वरूपश्शब्दं प्रकुर्वन् जनतां प्रविष्टः ॥ १६ ॥'

अलं कुमार स्पृहणीयरूप प्रगल्भभावं विजहीहि तूर्णम् ।
बालोचितं ते चरितं सुरम्यं निरीक्षितुं कामयते मनो मे ॥ १७ ॥

एवं निगद्य प्रियबालमेनं निवेशयामास शिलातले सा ।
प्रच्छायशीतैस्तरुभिर्वृतेऽथ जगाम च स्नातुमुदभ्रगङ्गाम् ॥ १८ ॥

(अनुवर्तिनी)

शेक्स्पियर्-कृतं

# यथाभिमतम् ॥

II. 7

आर्लण्डो—विरम्यताम् ; नेतःपरं भोक्तव्यम् ।

जाक्विस्—नाहमेतावत् किमप्यभुक्षि ।

आर्लण्डो— न च भोक्तव्यं, यावदावश्यकं निर्वर्त्यते ।

जाक्विस्—को नामायं सुमुखः?

ज्येष्ठो राजा—भद्र, किं दुर्दशावशेन एवं धार्ष्ट्यं ग्राहितोऽसि, अथवा विनयशालिनि वृत्ते तव अत्यन्तमनादरः, येनैवं सौशील्यदरिद्रोऽसि ।

आर्लण्डो—प्रथमः पक्ष इह तात्त्विकः । अतिसङ्कटमापतितं विनीताचरणं मे अपहरति स्म । जनपदे तु अहमभिवृद्धः विद्यासु मनाक् शिक्षितश्च ।

अपि तु भोजनाद्व्रद्धिर्विरन्तव्यमित्यहं ब्रवीमि । मदपेक्षा यावत् पूर्यते तावत् यदि कश्चिदिमानि फलानि स्पृशेत् स म्रियेत ।

जाकिस्—यदि तत्त्वार्थकथनेन समाधानं ते भविष्यति, अहं मरिष्यामि ।

ज्येष्ठो राजा – किं नाम ते अपेक्षितम् ? यथा ते सौजन्यं बलादस्मान् सुजनान् करिष्यति न तथा ते बलात्कारः ।

आर्लण्डो—अनशनेन प्रायोऽहं मृतः । तन्मे दत्त ।

ज्ये. राजा – उपविश्य भुङ्क्ष्व । स्वागतं ते ब्रमः ।

आर्लण्डो—तथा उदारं नु भाषध्वे ? क्षमध्वं माम् । अत्र सर्वाणि भूतानि क्रूराणीति मे मतिरभूत् । अतोऽहं ऊर्जिताज्ञाकारिणो वेषं धृतवानस्मि । दुर्गेऽस्मिन् विजने वने दीनानां शाखानामधश्छायायां स्थित्वा कालकलाः कथमपि नयन्तो यूयं ये केऽपि भवत । यदि कदाचित् शोभनानि दिनानि दृष्टवन्तः स्थ, यदि कदाचित् देवालयमुपेत्य भगवन्तं पूजितवन्तः स्थ, यदि कदाचित् सज्जनस्य कस्यचिदातिथ्यं प्राप्तवन्तः स्थ, यदि कदाचिद् भवन्नेत्राभ्यमश्रु प्रमृष्टमासीत्, यदि च इयमनुकम्पा अयमनुकम्पनीय इति वो विदितम्, सौजयन्मेव मे सम्प्रति कार्यसिद्धिकरं कुरुत । अनया प्रत्याशया अहं लज्जितो भूत्वा असिं पिदधामि ।

ज्ये. राजा—सत्यमेतद् यद्वयं शोभनानि दिनानि दृष्टवन्तः स्मः, यद् देवालयमुपेत्य भगवन्तं पूजितवन्तः स्मः, यत् सज्जनैः कृतानि आतिथ्यानि प्राप्तवन्तः स्मः, यच्च अनुकम्पाजनितानि परिपूतानि अश्रूणि प्रमृष्टवन्तः स्मः । अतस्त्वं गम्भीरमुपविश्य यद् वयं त्वदपेक्षापूरणाय दातुं शक्नुमः तदादिश्य गृहाण ।

आर्लण्डो—तर्हि कञ्चन कालं तूष्णीमाध्वम्, यावदहं गत्वा हरिणीव हरिणपोतं मदीयं जनमन्विष्य अशनं ददामि । अस्ति कश्चित् तपस्वी वृद्धः केवलमनुरागेण मया सह दीर्घमध्वानं चरित्वा खञ्जीभूतः । यावत् वार्धकेन बुभुक्षया चोभाभ्यां पीडितः सः पर्याप्तमाशितो भवति तावदणुमात्रमपि नाहं स्प्रक्ष्यामि ।

ज्ये. राजा—गत्वा तमन्विच्छ । आ भवत्प्रत्यागमनात् न किमपि वयं भोक्ष्यामहे ।

आर्लण्डो—नमो भवद्भ्यः । कुशलं वो भूयात् य एवमुपकृतवन्तः ।

(निष्क्रामति)

ज्ये. राजा—पश्यति हि भवान् न वयमेव केवलं दुःखभाजः । अयं विशालः सर्वसाधारणो रङ्गः यस्मिन् प्रेक्षणके वयं नटाः स्मः तस्मात् कष्टतराण्यपि प्रेक्षणकानि दर्शयति ।

जाक्विस्—कृत्स्नोऽयं लोकः एकनाटकशाला । सर्वे पुरुषाः स्त्रियश्च तत्र नटाः केवलम् । तेषां तत्र सन्ति निष्क्रान्तयः प्रवेशाश्च । तत्र च एकः पुरुषः तस्य आयुषि बह्वीः भूमिकाः परिगृह्णाति । तदीयाः सप्त अवस्थाः 'अङ्काः' । प्रथमं तावत् शिशुर्भवति रुदन् धात्र्या अंसयोः लालाः स्यन्दयंश्च । ततो मुणुमुणायमानो माणवकः, पुस्तकसञ्चिकया प्रत्यग्रप्रकाशेन मुखेन च, अनिच्छया पाठशालां प्रति क्रिमिवत् सर्पन् । ततः कामी, भ्राष्ट्रवत् श्वसन्, कान्तामुखप्रसादार्थं करुणगाथाग्रन्थनपरः । ततो युद्धवीरः, विचित्राः प्रतिज्ञाः कुर्वन्, श्मश्रुमान् बहुमानलाभे असूयुः, क्षिप्रकलहः, शस्त्रमुखेऽपि यशआर्जनलोलः । ततो न्यायवादी उत्कोचपुष्टे रम्यवर्तुले उदरे जातरेखः, उग्रदृष्टिः, समुदाचारकृतश्मश्रुः, प्रसिद्धनिदर्शनोल्बणैर्निपुणसुभाषितैः पूर्णः ; एवं स स्वभूमिकां निर्वर्तयति । अथ षष्ठावस्थापरिणामोऽयं योऽसौ कृशः शिथिलपादुको विकटपुरुषः, नासिकायामुपलोचनेन, पार्श्वे भस्त्रया* च सहितः ; यौवने धृतः सुरक्षितः तस्य पादकञ्चुकः शुष्कायास्तस्य जङ्घाया अतिविशालो भवति ; गम्भीरस्तस्य कण्ठध्वनिश्च पुनः शिशुक्रन्दात्मना परिणमति, यत्र नादः अव्यक्तः सीत्कारबहुलः सम्पद्यते । एवंविधचित्रचरित्रावसानकारि चरमं प्रेक्षणकं द्वितीयं शैशवम् ; केवलास्तमयरूपम्, रहितं दन्तैः, रहितं चक्षुर्भ्याम् रहितं रसनेन रहितं सर्वेण ।

(पुनः प्रविशति आर्लण्डो आडं-अनेन)

ज्ये. राजा—स्वागतम् । अभ्यर्हितं ते भारं अधो निधाय भोजय ।

आर्लण्डो—तस्य स्थाने अहं युष्मान् वन्दे ।

आडम्—तत् सम्प्रति भवतामावश्यकम् । नाहमद्य भाषितुं शक्तः; येन साक्षादहमेव भवतो वन्देय ।

ज्ये. राजा—स्वागतम् । भोक्तुमभिनिविशतां भवान् । नाहमिदानीं भवद्वृत्तान्तप्रश्नेन भवन्तमायासयिष्यामि ।

---

* दन्तपतनेन कपोलचर्म भस्त्रावद्भवति ।

सङ्गीतं तावत् किञ्चिदनुभवेम । सौम्य, गायतु भवान् ।

अमीन्स्—

वाहि, वाहि, वार्षिक पवन
न तथा त्वं नो विप्रिय घटनः
जगति यथा नृपु कार्तघ्न्यम् ;
भवतो दन्ता न तथा तीक्ष्णा
भवसि यतस्त्वं दृष्टो नाक्ष्णा*
†श्वासे तेऽस्त्वपि काठिन्यम् ।
है-हो गायत है-हो हरितां गुल्मसमृद्धिम्
मैत्रं प्रायः कृतकं कामः प्रायो मौग्ध्यम्
तस्मात् है-हो गुल्मसमृद्धिम्
जीवनमेतत् बहुरसविद्धम् ।
प्रहर प्रहर गगन क्रूर
दंशस्तव किल न तथा घोरः
विहितस्य यथा विस्मरणम् ;
यद्यप्युदकैरभिहन्ति भवान्
अभिघातस्ते न तथा बलवान्
सुहृदोऽत्र यथा न स्मरणम् ।
है-हो गायत, है-हो इत्यादि

ज्ये. राजा—§यथा त्वं विश्वसनीयमुपांशु कथितवानसि, यथा च मे नेत्रं तस्य प्रतिरूपं त्वन्मुखे समुत्कीर्णं प्रस्फुरच्च सुविशदं पश्यति तथा त्वं तस्य साधोः मान्य-रोलन्द्-अस्य पुत्रश्चेत्, अस्तु तेऽत्र स्वागतम् । सोऽहं राजा, यस्ते पितरि अनुरक्तः । त्वद्वृत्तान्तशेषं मदावासमागत्य कथय । भद्र वृद्ध, त्वत्स्वामिन इव तवापि सुस्वागतम् । ‡आलम्बस्व तावत् तं करेण । देहि मे तव करम्, सर्वं च तव वृत्तान्तं मम विदितं कुरु ।

इति द्वितीयोऽङ्कः ।

---

* प्रत्यक्षक्रूरो हि परोक्षक्रूरादधिकोद्वेगकर इति भावः ।

† श्वासः प्रसरः । तस्य रौक्ष्येऽपि न तथा दन्तास्तीक्ष्णा इति योजना ।

§ आर्लण्डो-इमं प्रति, इयं राज्ञ उक्तिः ।

‡ इयं च आर्लण्डो-इमं प्रत्येव ।

# प्रकृतिभेदः॥

—०❀०—

I

पिता— वत्से मैथिलि, पादधावनपात्रे जलमाहर, पादौ मे क्षालनीयौ।

पुत्री—तात, इदमाहार्षम्। पादौ क्षालय। नदीत आगतोऽसि। पादयोस्ते मृल्लेपो घनः।

पिता—वत्से, इह पश्य ; मम जपस्थाने बहुरवकरः। सम्मार्जनीमादाय शोधय। कथमेतावान् अवकर इहागच्छत्।

पुत्री—इदं शोधयामि तात। पार्श्वगृहशिशव इह आगत्य क्रीडामकार्षुः। ते काकदं कर्तित्वा कर्तित्वा विकिरन्ति। तेन बहुरवकरः। (शोधयन्त्याः कन्यायाः हस्तात् सम्मार्जनी मुहुरधः पतति)

पिता—कुतो वत्से सम्मार्जनीम् अधोऽधो विसृजसि?

पुत्री—नाहं विसृजामि तात। स्वयं सा मे हस्तात् पतति। सा स्थूला। मम हस्ते न माति। तेन मुहुः पतति।

माता—(खिन्नाङ्गीं पुत्रीं दृष्ट्वा भर्तारं प्रति) किमिति शिशुमेवं क्लेशयथ। निर्द्रवं वो हृदयम्। अहमाहूता किं न पादप्रक्षालनजलम् आहरेयम्, किं न सम्मृज्याम्। श्व एव भर्तृगृहं गतायाः बहु कर्म कर्तव्यं भविष्यति। अस्मद्गृहे कञ्चित् कालं सुखं वर्तते चेत् वर्ततां नाम। किमिति इदं कुरु तत् कुर्विति सर्वदा यूयं तां म्लापयथ?

II

माता—(शय्यायां शयिता) उत्तिष्ठ वत्से। प्रभातमभूत्। कियच्चिरं निद्रा। पश्य किं कर्मकरी आगता। न चेत् कूपात् घटेन जलमुदच्य द्वारं सिञ्च। सम्मृज्य रङ्गवल्लीं कुरु।

पुत्री—सर्वमहमकार्षम् अम्ब। कर्मकरी नागता। किं कारणं न ज्ञायते।

माता—साधु। शिशुः रोदिति, पश्य। तमादाय मलवन्ति वस्त्राणि अपनीय अङ्गानि प्रमृज्य शुद्धानि वस्त्रान्तराणि प्रेङ्खोलिकायामास्तीर्य तं तत्र शाययित्वा प्रेङ्खय।

पुत्री—तथा अकार्षम् अम्ब। शिशुः पुनः स्वपिति। (उपविशति)

माता—कथमुपविष्टासि। तक्रक्षीरपात्राणि सम्मृड्ढि। क्षीरकार आगतो भविष्यति। ततः परं उष्णोदकं कुरु। कटाहः कथं वर्तते? ह्यः सायमेवावदमद्यैव शोधयेति। तूष्णीमवर्तिष्ठाः। इदं हि तव पितुः न विरतिदिनम्। कार्यालयाय हि तेन गन्तव्यम्। कालोऽभूत्। त्वमेवमलसाऽसि।

पिता—कथमयि त्वं शयन एवोपविष्टा बालामेवं पीडयसि। त्वं कर्म कुर्वाणा सह कृत्वा इदं कुरु तत्कुरु इति लघुकार्यनियोगे साऽपि सोत्साहं शक्त्यं कुर्यात्। कृत्यभारं सर्वं तस्यास्तपस्विन्याः शिरसि निधाय त्वमुल्लासेन वर्तितुमिच्छसि।

माता—आम् आम्। उल्लासेन वर्तितुमिच्छामि। कन्यानां प्रतिमावत् निश्चलं रक्षितानां गृहकृत्यकरणे व्युत्पत्तिः कथं जायेत। भर्तृगृहं गताः किमपि कर्तुमजानत्यः श्वश्रूप्रभृतीनां सकाशात् प्रहारान् यदि लभेरन् तत् किं शोभनं भवेत्।

———

KENDRIYA SANSKRIT VIDYA PEETHA, TIRUPATI. LIBRARY.



# पुस्तकपरामर्शः ॥

वेदान्तरक्षामणिविमर्शः। (तृतीयभागः, आनन्दमयाधिकरणम्)।

श्री ए. वि. गोपालाचार्यविरचितः। मूल्यम्—रूप्यद्वयम्

विख्यातवैदुष्यैः सुव्युत्पन्नैः रसिकशिखामणिभिरेभिराचार्यैर्विरचितपूर्वा बहवो ग्रन्थाः प्रसिद्धाः। तत्तुल्येऽस्मिन्नपि ग्रन्थे सर्ववेदान्तनिष्णातत्वमेते आचार्याः पदेपदे प्रकाशयन्ति। अद्वैतिभिः कैश्चित् कृतानां विशिष्टाद्वैतसिद्धान्तदूषणानां परिहारः प्रतिवादिवाक्यानुवादः तस्योत्तरमित्यनेन क्रमेण इह क्रियते। तत्तद्ग्रन्थतत्त्वार्थप्रकाशनपाटवे एकतः स्थिते यदयं ग्रन्थकारः पूर्वपक्षिणोच्यमाना अर्थाः सूत्रभाष्यादितत्पूर्वग्रन्थात्यन्तविरुद्धा इति सम्प्रतिपन्नं प्रदर्शयति स इह परमो विशेषः।

'ब्रह्मचिन्तावृत्त्या अनावृत्तिर्लभ्यत इति सौत्रं रसप्रदर्शनम्। अनावृत्तसाधनेन आवृत्तिरेव लभ्येतेति रसध्वनिः' इति सूत्रग्रन्थेऽपि रसानुभवः ग्रन्थरसिकत्वकाष्ठां ग्रन्थकारस्य स्फुटीकरोति।

---

अलङ्कारसङ्ग्रहः। अमृतानन्दयोगिकृतः। पण्डित वि. कृष्णमाचार्येण पण्डित के. रामचन्द्रशर्मणा च सम्पादितः।

Adyar Library Series No. 70. मूल्यम्—Rs.9-0-0

दण्डिभामहादिकृतिवत् इयमपि केवलं पद्यमयी। अत्र एकादश परिच्छेदाः। तेषु वर्णगणौ, शब्दार्थौ, रसः, नेता, अलङ्कारः, दोषगुणौ, सन्धिः, वृत्तिः, रूपकम्, नाट्यालङ्कारः, चाटुप्रबन्धश्च विषयाः। एवमलङ्कारशास्त्रस्य यो यो विषयः स सर्व इह प्रतिपाद्यते। परन्तु सङ्कलनमात्रमिदं, न तु विविच्य कस्यचिदपि विषयस्य निरूपणम्।

अयं ग्रन्थकारः त्रयोदशे शतके काञ्च्यामासीदिति उपोद्घाते निपुणं निरूप्यते। मुद्रणं सर्वप्रकाररमणीयम्।

---

Registered No. M 2300.

Book XXIII || श्रीः || Nos. 7, 8, 9 & 10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

| | | | | |
|---|---|---|---|---|
| पु. २३] | ५०५० विरोधि | मीन | साधारण | सं ७, ९ |
| कलि | ५०५१ विकृति | वृषभ | शास्त्रानुबन्ध | सं ८, १० |
| | विकृति | मेष, मिथुन | आहत्य | ,, १० |

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

March, April, May & June 1950

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription **Re. One only.**
Do. With Sastraic Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका, अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूर्षद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari;*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः । ३१७—३२४

1 मेनका ।
2 व्याजोक्तिरत्नावळी ।
3 अराजकम् ।
4 लोकवार्ता ।
5 गोवर्धनधारणम् ।
6 शिरिय तिरुमडलूदिव्यप्रबन्धः ।
7 यथाभिमतम् ।
8 गीर्वाणवाणीस्तवः ।
9 प्रकृतिभेदः ।
10 काव्यपुरुषोत्पत्तिः ।
11 पुस्तकपरामर्शः ।

ORIYA SANSKRIT VIDYA PEETHA
७३
TIRUPATI.
LIBRARY.

किमासीत् ! मद्भाग्यलक्ष्मीस्त्वं मां विहाय गन्तुं किं मतिमकार्षीः ? सर्वं ज्ञातवत्यास्तव आत्महत्यासङ्कल्पः खलु, आश्चर्यो भवति । यावतामपि कष्टानां गोचरीभूयापि आत्मनः पातिव्रत्यं रक्षितवती त्वं किं मां नोपगतवती ? त्वयि मे संशयो भवेदिति किममन्यथाः ? त्वं मां साक्षादागत्य भूतार्थमवदिष्यश्चेत् किमहमकोपिष्यम् ? तात्त्विकं मे प्रेम यथावदजानती किल त्वमेवं चकर्थ । अयि मेनके, मन्मुखे हि मृदमक्षिपः । एतैश्चण्डालैः कृतादपि त्वया कृतमेव नितान्तं क्रूरं भवद्बाधते' इति प्रलपन् अश्रूणि वर्तयन् उत्कम्प्योत्कम्प्य रुरोद । आश्वासितमप्यनाश्वस्तं शोचनीयावस्थं परितप्यमानं तं द्रष्टुमसहमाना सा श्वेतकन्या सम्भ्राम्यति स्म । तस्य नेत्रे वृष्टिमिव वाष्पमवर्षताम् । सा तमभ्यधिकेन प्रेम्णा प्रश्रयेण च परिमृश्य 'मा स्म विषीदत । इदं वो नूनं देहस्थितेः प्रतीपमाचरेत् । इयन्ति दिनानि अस्माभिः कृतः परिश्रमः सर्वः व्यर्थो भवेत् । भवत्पत्नी समुद्रे पतित्वा आत्महत्यामकरोदित्येतद्यदि वास्तवं तस्याः शवेन तीरे पर्युदस्तेन भाव्यम् । तत् धीवरा उपलब्धवन्तः स्युः । यस्मात् तथा किमपि न वृत्तं तस्मात् सा जीवितं न त्यक्तवती स्यादिति भाति । मोटारशकटपीडितानां भवतां वैद्यशालायामवस्थितिं भिषजो हूण्याः सकाशात् सा ज्ञातवतीत्यवगम्यते । एतदवस्थेषु भवत्सु भवत उपेक्ष्य आत्मनो मरणं सा चिन्तयेदित्येतदपि सन्देहास्पदं भवति । यस्य-कस्यापि कृते भवन्तः इतस्त्रिचतुराणि दिनानि देहमनायासयन्तो भवितुमर्हन्ति । तावज्जातु भवद्गृहिणीगता वार्ता या काऽपि लब्धा भवेत् । इमान् विषयान् प्रति भवत्सहोदर्योः सकाशेऽपि पश्चाद्बोधयितुमर्हथ । अद्य ताभ्यां सह सम्भाषणं नैव कर्तव्यम् । मम वाचं दयया शृणुत' इति द्रुतहृदयमभिधाय अनुनाथति स्म । मृदुहृदयतया शिशुवन्निष्कपटप्रकृतितया च वराहस्वामी स्वस्य महोपकारं कृतवत्यास्तस्या वचनमतिलङ्घितुमशक्नुवन् ईषच्छान्तः महोपधाने साचीभूय निमीलिताक्षः अन्तर्विषण्णः विलीनचित्तः परिश्रान्त आसीत् । उपर्युपरि आश्वासनं कुर्वत्यां तस्यां स पादनाडिकया तथैव विगतचेतनः गाढनिद्रानिमग्नो बभूव । तथा

एका घण्टा व्यतीयाय । पुनः स प्राबुध्यत। धात्री आर्द्रवस्त्रेण तदीयं मुखं प्रमृज्य निर्मलीकृतवती 'शरीरं कथमस्ति, ब्रूत । वैद्यशालातः समीचीनानि भेषजानि आनाययामि' इत्यवोचत् । वराहस्वामी तु तस्या वचनं न कर्णे चकार । तस्य मनः सर्वथा मेनकां प्रति गतमासीत् । नयने शून्यनिरीक्षणपरे अभवताम् । तदीये मनसि नानाविधाश्चिन्ताः प्रादुर्भूय तिरोभवन्त्य आसन् । चक्षुषोरश्रु उत्सवत् परिवहति स्म । स कराभ्यां पिहितमुखः 'मेनके, मेनके' इति प्रलपन् हो इत्याक्रोष्टुमारभत । मूर्धनि वक्षसि च प्रहरन् विलपितुमुपाक्रमत । अनन्तरक्षणे दन्तान् 'नरनरेति' दशन् 'आः, एवं नु अकार्ष्ट' इति गर्जति स्म । तदधिष्ठितगृहद्वारस्य आवृतत्वात् तेन कृतः शब्दः बहिर्नाश्रूयत । परितापकरीं तदीयामवस्थां दृष्ट्वा भीता कम्पिता च सा बालवनिता स्वशक्त्या महान्तं प्रयत्नं कृत्वा तस्य विषादं क्रोधं च शमयन्त्यवर्तत । स तु अनाश्वस्त एव आत्मानं, सन्निहितां तां कोमळवल्लीं च विस्मृत्य स्ववेदनाब्धेव मग्न आसीत् । तदानीं तस्य आहारदानवेळा आजगाम । पेरुन्देवी कोमळा च यथाशीलम् अन्नतीर्थादिकमादाय आगते कवाटमुद्घाटयताम् । तद्दृष्टवती धात्री 'न ते तदा वराहस्वामिनः समीपं गन्तुमनुमन्तव्ये' इति मत्वा त्वरितमुत्थाय उपकवाटं धावित्वा मार्गमवरुध्य स्थिता 'न देहस्थितिः समीचीना । नाद्य भोक्ष्यते । इतः अर्धघण्टायामहमेवागत्य वक्ष्यामि । तदानीं युक्तमानेतुम्' इत्यब्रवीत् । तदाकर्णितवती पेरुन्देव्यम्बा किमपि आवेगिनी भूत्वा 'क्षणात् पूर्वं कोमळायां लेखं दत्तवत्यां सुस्थितस्य देहस्य एतावत् किमागतम् । तत्राधिकारो हि ऊर्जितो वर्तते । 'अभिनवो ग्रामणीरागत्य अग्निना ददाह' इत्याहुः । तथा या कापि हि पथिकी त्वमागत्य अस्मानधिकरोषि । अस्मदीयस्य बालस्य देहोऽस्वस्थश्चेत् किमस्माभिरागत्य तन्न द्रष्टव्यम् ? सर्वस्य त्वमेवाधिकारिणीतीव ह्यस्ति । नष्टां गृहिणीमतिक्रम्य त्वमेव महागृहिणी संवृत्तेतीव हि दृश्यते । प्रभाते निश्चयताम्बूलम् । अद्यावधि सुस्थितं देहं त्वमेव कथमपि विकृतमकार्षीः । एतदर्थमेव श्वेतानां 'वैद्य'मेवानुपयोज्यमित्याहुः । व्याधिमता

बालेन सह सदा पिहितकवाटं तरुण्यास्तत्रावस्थानादेव तस्य शरीरं दुःस्थमभूत् । प्रथमं त्वं चेत् प्रासादान्निर्यासि, एकेन निमेषेण तस्य शरीरं स्वस्थं भवेत् । बालस्य तरुणं वयः । तमाश्लिष्य धारयितुं स्प्रष्टुं च परकीयायाः स्त्रियास्ते न खलु मनागपि लज्जा वर्तते । किं जन्मेदम् ?' इति सोल्लुण्ठनं च साधिक्षेपं चावोचत् । कर्णकठोरां तां वाचं श्रुतवती नारीमणिः वराहस्वामिनः सङ्कटां स्थितिमनुचिन्त्य निरुद्धक्रोधोद्रेका स्मितं कृत्वा अम्ब, यावन्तमपि मयि स्थितं कोपं पश्चाद्दर्शयत । वक्तव्यं सर्वं पश्चाद्ब्रूत । अद्य युष्मदनुजस्य शरीरस्थितिर्न समीचीना वर्तते । किञ्चित्कालात्पूर्वं हि किञ्चिद्वाचिकमागमत्, तद्दर्शनात्प्रभृति सोऽतिमात्रं क्रुद्धः शयानो वर्तते । मयाऽपि सह स न सम्यग्भाषते । यूयं चेदद्य तस्य समीपे गच्छथ, महान् कलहः स्यादिति भाति । युष्माकमिच्छा चेत् गत्वा पश्यत । कुत आगमामेति यूयमेव व्यसनिन्यो भवेत । को नाम ममाधिकारः । अहं वैतनिकी । युष्मत्क्षेमाय कर्मकारिणी । युष्मन्मनोऽनुसारेण कुरुत' इति विनीतमब्रवीत् ।

तदाकर्णितवती पेरुन्देव्यम्बा 'तद् वाचिकं कस्य सकाशादागतम् ? यथाऽयमेवं कुप्येत् तथा तत्र का वार्ता आसीत् ? इत्यपृच्छत् ।

तदाकर्णितवती धात्री 'विवरं किमपि न मे विदितम् । नष्टगृहिणीविषया वार्ता स्यादिति भाति । यूयमेव साक्षाद्गत्वा पृष्ट्वा जानीत' इति प्रत्यभाषत ।

तदाकर्ण्य पेरुन्देव्यम्बा विभ्रान्ता सन्त्रस्ता च सती 'किं जातु रहस्यं भिन्नं स्यात् ?' इति सन्दिदिहे । तस्या वपुः स्वयमेव गिडुगिडिति चकम्पे । अथापि न कदाचिदपि रहस्यं प्रकटीभवेदिति मत्वा अनन्तरक्षणे धैर्यमालम्ब्य किञ्चिदालोचयामास । धात्रीवचनानुसारेण किञ्चित्कालानन्तरमेवागमनं श्रेय इति मत्वा कवाटं घटयित्वा कोमळया सह बहिरगात् । धात्री सद्यो निवृत्य वराहस्वाम्यधिष्ठितं स्थलमभ्यगच्छत् । तदा स भूयोऽपि निमीलिताक्षः परिम्लानः शिश्ये । मातुः स्मृत्या नष्टचेतनस्य परिश्रान्तशयितस्य वत्सस्येव पर्युत्सुकीभूतस्य वराहस्वामिनो मुखं निर्निमेषं

पश्यन्त्येव सा उपसृत्य तस्थौ। तथा बहुकाले गते स उन्मीलति स्म। विकृतदर्शनं तदीयं मुखं तस्य मनसि प्रवृत्तं महद्युद्धं लघु दर्शयति स्म। श्रमेण दुःखेन आवेगेन च आक्रान्तं पूर्वदिन एव कृताहारं तमभिवीक्ष्य सा 'अभ्यधिको हि श्रमो भवति। कच्चिदाहारं कुरुथ?' इति मृदु पप्रच्छ। सः अतिजुगुप्सया 'आम्। भार्या जग्धवतश्चण्डाळस्य आहारोऽपि तु अपेक्षितः। किं मया इतःपरमिदं शरीरं वर्धयित्वा अस्मिन् लोके जीवितव्यमपि? आहारश्च मे मा भूत्; भेषजं च मा भूत्। तूष्णीं मां मुञ्चत। भवद्वैद्यशालायां विषौषधमस्ति चेत् अल्पं यदि गृहीत्वा दास्यसि एकेन क्षणेन युष्मत्परिश्रमं मम दुःखानि जीवितं च परिहरिष्यामि' इत्यतिमात्रौत्सुक्येनोवाच। तदाकर्णितवती सा ललनामणिः पुनरपि तमाश्वासयितुमारभत। यद् भवन्तो वदन्ति तदाश्चर्यं हि भवति। भवत्कुले पुरुषमरणे स्त्रीणां पुनर्विवाहो न शक्यः कर्तुम्। तस्मात् तासां व्यसनं युक्तम्। भवन्तस्तु पुरुषसिंहाः। सहस्रमपि गृहिण्यः अपेक्षायां परिणेतुं शक्याः। भवत्पत्नी अतीव गुणवतीति भवद्वचनात् स्फुटीभवति। सा यत् अन्याय्यं वञ्चिता आत्महत्यामकरोत् तन्नूनमसह्यदुःखहेतुभूतं वृत्तम्। न तत्र सन्देहः। परन्तु तदर्थम् 'अहं प्राणांस्त्यक्ष्यामि' इति यद्भवद्भिरुच्यते तन्न साधु। लोके सा किमेकैव गुणवती रूपवती च। ईश्वरसृष्टौ कत्याश्चर्याणि संविधानानि सन्ति? इतरेतरातिशायिसुगुणसौन्दर्यशालीनि स्त्रीरत्नानि कोटिशो लोके समग्राणि सन्ति। मेनकया सह सुखमनुभवितुमियदेव भवतां पूर्वकृतं सुकृतम्। मनस आश्वासनं कृत्वा शोभनामपरां कन्यां विवाह्य सुखं जीवितुमेव भवतां युक्तम्। लोके जननमरणे प्रतिदिनं भवतः। ते अतिघोरविपत्तिवत् यत्र काप्यवर्तमानात्यन्तासम्भावितकष्टवच्च भावयित्वा तदर्थं स्वयमपि प्राणान् परित्यजन्तीति नेदं लोकानुष्ठानानुसारि। अस्मिन् विषये भवतां प्रधानसंशयो निवृत्तः। सा स्वयं स्वमत्या गृहान्न निरगच्छत्। न च चारित्रभङ्गवती। तावता भवतां तृप्तिरस्तु। श्वः 'निश्चयताम्बूलं' दास्यन्ति। सम्बन्धी अभिनवा कन्या इत्येतत्प्रभृतय आगताः सन्ति। भवद्गृहिणी-

without you. Have regard to her. Do not court death by exposing yourself to the heavy sweeps of the winnow-like ears of the elephant. 17

गायन्वाहयति क्षताम्रकलिकः पुंस्कोकिलो वासरान्
कादम्बस्तनुनालमात्रविघसो यानं स्वमभ्यस्यति।
कोकः केलिरसेन जीवितफलं जानाति नान्यत्क्षितौ
वान्तेनाप्यनुपोष्य पुष्टवपुषा काक त्वया भूयते॥ १८॥

The youthful cuckoo nibbles at the tender buds of the mango tree and spends his days singing delightfully ; the swan, content with tasting the slender stems of the lotus applies himself diligently to the practice of his lovely gait. The chakravaka, being engrossed with the pleasures of amourous sporting, scorns to look upon any other diversion on earth as worthy of his interest. But you, oh crow ! contrive by every means in your power to keep hunger in appeasement even if it be by devouring vomitted stuff, and thereby put more flesh day by day. 18

शान्तं वैद्युतवल्लरीविलसितं लीनं तदैन्द्रं धनु-
र्निर्घोषः स पटुः प्रचण्डरुदितप्रायोऽधुना श्रूयताम्।
निस्सारस्त्विति तोल्यतेऽखिलजनैर्हंसैर्न च त्रस्यते
बिम्बं चन्द्रमसोऽप्यसौ तिरयितुं नेष्टे शरद्वारिदः॥ १९॥

No more does the creeper-like lightning dance about him ; that many-coloured bow of Indra has vanished ; that smart deep rumblng of his, alas !, now approximates itself to a loud lamention ; in his impoverished condition he is looked upon with contempt by all men ; even the swans are not afraid of him. The autumn cloud is so inconsequential that he is unable even to screen out effectively the disc of the moon. 19

भूभृन्मूर्ध्नि समादृताऽपि चपला नीचैः प्रवृत्ता झरी
सेयं गण्डशिलाभिघातशिथिला भुक्तोज्झिता गह्वरैः ।
आकृष्टा शतधा कृषीवलकुलैः स्वैरं विगाढा जनैः
क्षामा कर्दमशोषिता परिभवात् क्षाराम्बुधिं गाहते ॥ २० ॥

On the tops of mountains she was borne in high esteem. But fickle as she was, she descended down the lowly path. Dashing against the boulders, she was torn to pieces by the hard contact. The caverns drank her in and spat her out Further down her course the cultivators dragged her hither and thither. The common people plunged into her wantonly. At last imaciated and miry the mountain rill loses herself for shame in the saline ocean.
20

उल्लङ्घ्यापि दिशः क्षुधो मृगयते सद्यः प्रशान्तिक्रमं
वर्ग्यैः श्लिष्यति पोषयत्यपि शिशूनन्योज्झितान् मौकलिः ।
इत्युच्चैरुपलालयत्यमुमसौ निम्बो गुणश्लाघया
दूरे तिक्तमरुत्सृजोऽस्य क्वचित् स्वस्त्यस्तु ते कोकिल ॥२१॥

'The crow (our friend) no sooner than he feels hunger travels to the ends of directions (in search of food) for its appeasement, he loves to live with his kindred and nourishes the young ones abandoned by others (the cuckoos)'. The Margossa tree thus extolling the crow for its admirable qualities caresses it with loving esteem. Well, let it (the margossa tree) please itself. But, oh ! kokil ! may you be so blessed as to be able to lead a happy life somewhere else, far far away from the reach of the bitter breath of the margossa ? 21

न त्वं न प्रददासि किं त्वविधिना दातुस्तवातिव्ययो
व्यर्थस्तोयद तावता किमफलत् सारावसादादृते।
यन्मर्त्यैरतिवृष्ट्यवग्रहदशापर्यायसंपीडितै-
रुत्सन्नस्वकृषिक्रियोचितफलैः स्थाने त्वमाकुश्यसे॥ २२॥

Nobody accuses you, oh cloud! of not pouring forth your showers; but you send your downpour so indiscriminately that it is all a huge waste and nothing results except that you become bankrupt. Men on earth are fully justified in raising an outcry against you as they find themselves afflicted by the alternating calamities of deluges and drought both of which bring about an utter ruin of all the fruits of their agricultural labours. 22

अन्या सा किल मञ्जरीति चरणैर्व्याधूय या भुज्यते
भ्रातर्भृङ्ग निबोध वारणपतेर्दानाम्बुरेखामिमाम्।
झंकारैरलमुन्मदो गलतु ते मा स्वैरपातं कुरु
न्यग्रः कर्णमरुत्पथं परिहरन्नीचैर्व्रजोपान्तिकम्॥ २३॥

Here is no nosegay which you are accustomed to spurn with your legs while sucking from it. Brother, Bee! understand that this is the streaming rut of the king of elephants. Stop your humming, shed your hot-headed conceit, give up your dashing flights, avoid carefully the path of the winds blown by the swinging ears and approach with caution and humility. 23

शृङ्गाग्राहतिदुर्गतेषु वसुधाश्रोत्रेषु वप्रक्रियां
दूरे दुर्मद वाहिनीतटभुवामभ्यस्यता चापलात्।
आत्मैवागणितः कथं नु भवता प्रक्षुभ्यदाशीविषो-
द्भ्रान्तोद्दामविषानलस्य विषयीभूतः ककुद्मंस्तदा॥ २४॥

While practising with a wayward impulse, upon the line of ant-hills your capricious pranks of attacking with your horns some barrier, instead of doing so, as is your wont, upon the banks of rivers, oh hot-headed bull! how have you neglected to have regard to the safety of your own person which is presently exposed to the deadly fire of poison emitted by the cobra thus rudely disturbed by you from its abode ? 24

दुर्वर्णोऽपि दुरीक्षणोऽपि पततां मध्ये जघन्योऽप्यसौ
दैवज्ञप्रिय इत्यहो बत परां काकः स्थितिं लम्भितः ।
तत्स्वेच्छागतिकल्पिताशुभशुभाशंसाविधेयैर्जनै-
रारम्भेष्वखिलेषु सिद्धिविषये यस्तु प्रमाणीकृतः ॥ २५ ॥

Ill-complexioned, squint-eyed and the meanest among the birds, the crow has been raised to great eminence by the sooth-sayer's partiality for him. For, interpreting his freewilled flights hither and thither as indicative of good or bad luck in store for them and acting in deference to such fancied indications, the people regard the crow as an unerring guide to them in the matter of ensuring success in all their business 25

कालेऽप्युद्भटवारिवर्षिणि परिभ्राम्यत्प्रचण्डानिले
ये कूर्दन्ति कलापिचातकबकास्तत्साहसायाञ्जलिः ।
अन्तः कोटरमेकका परमियं भीता कलालापिनी
निःस्पन्दं वसति स्मरन्त्यनुकलं पुष्पाकरस्य श्रियः ॥ २६ ॥

We pay homage from a distance to the audacious boldness of the peacocks, the catakas and the cranes who revel in a season which is characterised by an incessant downpour of rain and by the severities of tempestuous winds. But the female kokil lurks all alone and stunned

# उद्यानपत्रिका ॥

“अन्या वाचो विमुञ्चथ”

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

| | | | | |
|---|---|---|---|---|
| २३] कलि | ५०५० विरोधि | मीन | साधारण सं | ७, ९ |
| | ५०५१ विकृति | वृषभ | | |
| | विकृति | मेष | शास्त्रानुबन्ध सं | ८, १० |
| | | मिथुन | आहत्य सं | १० |

## अराजकम् ॥

व्यतीतायां तु शर्वर्यामादित्यस्योदये ततः ।
समेत्य राजकर्तारः सभामीयुर्द्विजातयः ॥

रात्रौ दशरथः पञ्चतामगच्छत् । अथ रात्र्यपगमे, सोत्सुकं प्रतीक्षिते सूर्योदये जाते, द्विजातयः राजकर्तारः राजानं कञ्चन कर्तुमिच्छन्तः वसिष्ठेन सम्भाषितुं राजगृहे स्थितां सभां जग्मुः । दशरथः प्रेतस्तथैव वर्तते । न तस्य निर्हरणं वृत्तम् । ततोऽपि पूर्वं राजानं कञ्चन निर्धार्य स्थापयितुं यतन्ते महाजनाः । ते वसिष्ठमवोचन्—

अतीता शर्वरी दुःखाद् या नो वर्षशतोपमा ।
अस्मिन् पञ्चत्वमापन्ने पुत्रशोकेन पार्थिवे ॥
स्वर्गतश्च महाराजो रामश्चारण्यमाश्रितः ।
लक्ष्मणश्चापि तेजस्वी रामेणैव गतः सह ॥
उभौ भरतशत्रुघ्नौ केकयेषु परन्तपौ ।
पुरे राजगृहे रम्ये मातामहनिवेशने ॥
इक्ष्वाकूणामिहाद्यैव राजा कश्चिद् विधीयताम् ॥

राज्ञा केनचिदवश्यं भाव्यमित्यत्र एषां संरम्भः । पितरि मृते पुत्रेषु कश्चिद्राजा भवितुमर्हति । सर्वेऽपि तु पुत्राः असन्निहिताः । तत्र रामस्य लक्ष्मणस्य वा प्रत्यानयनमशक्यम् । भरतशत्रुघ्नयोस्तु शक्यम् । तदर्थ-

मुद्यमः कार्यः । तथैव एतैः प्रार्थितो वसिष्ठ एनाननुशास्ति। परं तु तदेषां बुद्धौ न भातम् । अराजकस्थितौ तथा तेषां उद्वेगो जुगुप्सा सन्त्रासः। अस्मिन्नगरे सन्निहितः यः कोऽपि इक्ष्वाकुवंश्यः अस्मिन्नेव क्षणे विलम्ब-लेशमपि विना राजा कर्तव्य इति त्वरन्ते । सहसा कस्मिंश्चित् सिंहासने स्थापिते पश्चादागतो भरतः शत्रुघ्नो वा रामो लक्ष्मणो वा को भविष्यति, किं वक्ष्यति, एतच्चिन्तने तेषां मतिः न प्रससार। राजा कश्चित् कर्तव्य इत्यस्मिन् विषये ते सर्वे एकाग्रमनसोऽभवन्। कुत एतत्। तत् ते स्वय-मेव स्फुटं वदन्ति—

अराजकं हि नो राष्ट्रं विनाशं समवाप्नुयात् ।

अस्माकं राष्ट्रमिति व्यवहरन्ति । न परं राज्ञः अन्येषामपि सर्वेषां राष्ट्रे स्वत्वाभिमानः। तस्य अविनाशे अत्यन्तजागरूकता । तत् स्वकीयं राष्ट्रं राजविरहे विनाशं गच्छेदिति अतिमात्रं बिभ्यति। को राष्ट्रस्य विनाशः॥ तं विस्तरेण प्रतिपादयन्ति—

नाराजके जनपदे विद्युन्माली महास्वनः ।

अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ॥

विद्युन्माली महास्वनः पर्जन्यः यन्महीं दिव्येन वारिणा अभिवर्षति स राष्ट्रस्य क्षेमः । स तादृशो यन्नाभिवर्षति स विनाशः । अयं विनाशो भवेदराजकत्वे जनपदस्य । निषेधार्थमपि विद्युन्माली महास्वन इति पर्जन्यं, दिव्येनेति वारि च वर्णयन्त इमे तस्मिन् क्षणे तद्रूपस्य पर्जन्यस्य तेन मुच्यमानस्य दिव्यवारिवर्षस्य च मानससाक्षात्कारमात्मनोऽभिव्य-ञ्जयन्तः लोकविनाशप्रथमकारणभूते तदभावे स्वकीयमार्त्यतिशयं प्रकाश-यन्ति। अराजकस्य जनपदस्य प्रथमो महान् अनर्थः वर्षप्रतिबन्ध इत्य-भिप्रायः।

नाराजके जनपदे यज्ञशीला द्विजातयः ।

सत्राण्यन्वासते दान्ता ब्राह्मणाः संशितव्रताः ॥

कुतः पर्जन्यो न वर्षति ? तदुच्यते — अराजके जनपदे 'यज्ञाद्भवति पर्ज-न्यः' इत्युक्तरीत्या पर्जन्यकारणयज्ञानुष्ठानलोपात् पर्जन्यो नोत्पद्यते। कथं वर्षेत ?

नाराजके जनपदे धनवन्तः सुरक्षिताः ।

शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥

धनधान्यसमृद्धिमद्भिः पुरुषैः निरातङ्कैः निर्भयैः निश्शङ्कैः गृहद्वाराणि अघटयित्वाऽपि सुखं निशासु स्वप्तव्यम् । एवं यत्र भवति तद्राष्ट्रं कृतक्षेमम् । श्लाघार्हम् । यत्र तु नैवं भवति । सर्वदा साशङ्कैरेव शयितव्यं भवति । कदा चोरैः क उपद्रवो भविष्यतीति चिन्ता सन्ततं बाधते । तद्राष्ट्रं विनष्टमेव ।

नाराजके जनपदे माल्यमोदकदक्षिणाः ।
देवताभ्यर्चनार्थाय कल्प्यन्ते नियतैर्जनैः ॥

देवालयभेदनं, प्रतिमाभञ्जनं, भगवदर्थमित्यभिसन्धिं विना स्वार्थतया पचनादिसर्वक्रियाकलापस्यानुष्ठानं, इदं कर्म अस्येति नियमं विना अव्यवस्थया करणमितीदमपि राष्ट्रविनाशरूपम् ।

नाराजके जनपदे स्वकं भवति कस्यचित् ।
मत्स्या इव नरा नित्यं भक्षयन्ति परस्परम् ॥

परस्परपीडया जना जीवितुं प्रवर्तन्त इति विनाशस्यापरमिदं लक्षणम । काले वृष्टिविरहेण दैवपीडा भवतीत्येतावत् परं न, मनुष्याणां दुर्गुणवृद्ध्या आत्मविनाशेन स्वकृतपीडाऽपि महती भवति ।

अराजकस्य जनपदस्य ईदृशी अवस्था भवतीति तत्त्वदर्शिनः सर्वलोकहितैषिणः प्राञ्चोऽत्यादरेण वदन्ति । साक्षादीदृशी दुरवस्था सम्प्रति सर्वत्र समग्रा दृश्यते । अराजकोऽयमस्मदीयो जनपद इति तु न कश्चिदङ्गीकुर्यात् । क इह परमार्थः ? विवेकिनश्चिन्तयितुमर्हन्ति ।

---

# लोकवार्ता ॥

उद्योगदाने सम्प्रति जातिभेदं दर्शयन्ति—इयन्तो ब्राह्मणाः, इयन्तोऽब्राह्मणाः, इयन्तो हरिजनाः, इयन्तः क्रैस्तवाः, इयन्तोऽन्य इति । अनयैव रीत्या यन्त्रविद्याशालावैद्यविद्याशालाप्रभृतिषु प्रवेशदानेऽपि । एतेन आसु विद्याशालासु प्रवेशमिच्छतां बहूनां प्रत्याख्यानं भवति । अचिरात् एवं प्रत्याख्याता काचित् स्त्री पुरुषश्च कश्चित् महाधिकरणे व्यवहारं प्रावर्तय-

ताम्–समष्टिराज्यशासनविरुद्धमिदमस्मत्प्रवेशप्रत्याख्यानम् । प्रवेशोऽस्माकं देय इति । एवमेतदिति महाधिकरणिकैः निर्णयोऽकारि । जातिकलहस्यात्र वर्तमानतया अनेन निर्णयेन एकेषामाक्रोशो भवति । अन्येषामतिहर्षः । इमं निर्णयमाक्षिपन्तः राज्याधिकारिणः समष्ट्यधिकरणे पुनर्व्यवहारप्रवर्तने उद्युञ्जते । अत्र को निर्णयः करिष्यते ? अन्ततः अस्य विवादस्य कथं पर्यवसानं भविष्यति ? स्थित्वा द्रष्टव्यम् । विवेकिनां तु इमं विवादं प्रवर्तमानं पश्यतां विषादोऽवश्यम्भावी ; अवर्जनीयः । यथाकथञ्चिज्ज्ञातस्य जनानां मिथो द्वेषस्य प्रशमने बुद्धिमद्भिः सर्वैः शक्यः सर्वः प्रयत्नः कर्तव्यः । तं विना स यथा प्रतिष्ठितो भवेत् उपर्युपरि वर्धेत तथा करणे को बुद्धिमान् न विषण्णो भवेत् ?

किं पुनरत्र कर्तव्यम् ? न किमपि कर्तुं शक्यमिति बहवो मन्येरन् । न तु वयं तथा मन्यामहे । अस्ति किञ्चित् कर्तव्यम् । शक्यं च तत् कर्तुम । दीर्घदर्शित्वं धैर्यं च परम् अपेक्षितम् । चिरेणापि लोके शान्तिसमृद्धिः सम्पादनीया । अस्य परमोद्देश्यस्य यद्विरोधि तस्य परिहारे, यदनुकूलं तस्याचरणे च अवधानं कर्तव्यम् । उपदेशानुष्ठानाभ्यां जनानां सन्मार्गे प्रवर्तनं ब्राह्मणानां धर्मः । तदर्थमेषां जन्म । अस्मिन् धर्मे प्रतिष्ठितानामेषां आत्मश्रेयः स्वतो निष्पन्नं भवति । न तत्र पृथक्प्रयत्नापेक्षा । 'ब्राह्मणाः राज्ये उत्तमानि स्थानानि अधितिष्ठन्ति । कुतो नास्माभिस्तान्यधिष्ठेयानि' इति इतरेषां असूया स्पर्धा च जाता । अनुवर्तते । वर्धते च । अस्यां स्थितौ यत् तेषामात्मनश्च हितं तद् ब्राह्मणैः कर्तव्यम् । अत्र धैर्यमपेक्षितम् । उद्योगवहने आशा सर्वथा परित्याज्या । विवेकार्थं ज्ञानं सम्पाद्य, शक्येन प्रकारान्तरेण जीविकां प्राप्य, 'लोकहितादन्यदेषां आत्मार्थतया न किञ्चिदुद्देश्य'मिति विस्रम्भं सर्वतो जनयित्वा 'उद्योगाः सर्वे सन्तु भवतामेव । नास्ति तत्रास्माकं मनागप्यपेक्षा । अनुद्योगिन एव लोकस्य भवतां च यत् हितं तत् कुर्वन्तो वतिष्यामहे । यत् किमपि साहाय्यमस्माभिः क्रियमाणं भवतामपेक्षितं चेत् तदवश्यं करिष्यामः । न कञ्चिद्वयं द्विष्मः । सर्वसुहृदो वयम् । युष्माभिरपि, लोके सर्वैरपि एवंविधैरेव भाव्यम्' इति निर्व्याजं निष्कपटं सर्वविस्रम्भार्हमुद्धुष्य ज्ञापयित्वा गम्भीरस्वभावता प्रख्यापनीया । अयमेको लोकरक्षणस्यात्मरक्षणस्य च मार्गः । एवं वदद्भ्योऽस्मभ्यं केचन कुप्येयुरपि । नमस्तेभ्यः ।

---

# गोवर्धनधारणम् ॥

(Vidyalankara .V. R. Srinivasa Tatacharya Siromani)

—— o❀o ——

भगवान् बलदेवेन संयुतो बृन्दावन एव निवसन् गोपानामिन्द्रयागार्थमुद्यमं जानन्नप्यजानन्निव वृद्धसन्निधौ नन्दमित्थमपृच्छत्- 'हे पितः, भवतोऽन्येषां च कःसम्भ्रम उपस्थितः । मखार्थोऽयमिति चेत् किमत्र क्रतौ फलम्, का देवता, किं साधनम् एतत् मह्यं ब्रूहि । जगति शत्रुमित्रोदासीनत्वबुद्ध्या रहितानां साधूनां गोप्यं नास्त्येव । विषमदर्शिनामपि सुहृद्विषये गोपनीयं न भवत्येव । यथालोकाचारं सुहृद्भिस्सह विचार्य कर्मानुतिष्ठतो विदुष एव कर्मफलसिद्धिः । सम्प्रति भवतान्यैश्च चिकीर्षितमिदं कर्म किं सुहृद्भिस्समं शास्त्रतो विचारेण प्रवृत्तम्, आहोस्वित् आचारप्राप्तम् । साधु यथातथानुयुञ्जानस्य मे उत्तरं भण्यताम्' इति । तदनु नन्दः पुरुषोत्तमं प्रत्येवमवदत्—'वर्षाधिदेवता भगवान् वासवः । मेघास्तस्य शरीरवत् नियाम्याः । ते च भूतानां प्राणाप्यायनद्वारा तद्धारणसाधनं जलमभितस्सिञ्चन्ति । अस्मत्प्रभृतयो नरा जलमुचां नियन्तारं तं तदीयवर्षोदकसिद्धद्रव्यसाध्ययज्ञैर्यजन्ते । त्रिवर्गफलसिद्ध्यर्थं तदीयाध्वरावशिष्टवस्तुभिर्जीविकां निर्वर्तयन्ति । त्रिवर्गप्रापकाणां पुरुषाणां मध्ये शक्रः स्वायत्तवृष्ट्यादिद्वारा फलप्रापकः । अतस्तदाराधनात्मकं वृद्धाचारपरम्पराप्राप्तमिदं कर्म कामादिभिर्हेतुभिर्यस्त्यजेत् स सुखं न भावयेत' इति । केशवो नन्दस्य वचो निशम्य परेषां तदनुरोधितामवगत्य च क्रोधजननद्वारा सङ्क्रन्दनस्य गर्वं वारयितुं नन्दमेवमाचचक्षे । 'हे तात, पुण्यापुण्यरूपं कर्म प्राधान्येन सुखदुःखादिहेतुः । यद्यपि क्षणिकं जडं च कर्म तत उत्पन्नं स्थिरमपि जडमपूर्वं च न कालान्तरभाविविचित्रफलसाधनम् । कर्मजनितनिग्रहानुग्रहवानीश्वर एव तत्साधनम् । तथापि स स्वाराधनात्मकं कर्मानुतिष्ठत एव फलं दिशति न त्वननुतिष्ठत इत्यन्वयव्यतिरेकाभ्यां कर्मैव फलसाधनम् । कार्याः कर्मवश्या दुःखिनस्सुत्रामादयस्तु स्वानिष्टपरिहारस्वेष्टसाधनासमर्था अन्येषामनिष्टपरिहारमिष्टं वा कर्तुं कथं पारयेयुः । पुरन्दराद्यन्तर्याम्यकर्मवश्यो निस्समाभ्यधिक एक ईश्वरस्तु फलवितरणदक्षः । सोऽपि कर्मानुवर्तित्वेन तत्परतन्त्रः । नृणां स्वस्वभावानुगुणकर्मविहितसुखदुःखादिकमन्यथा

विधातुं पुरुहूतो न शक्नोति । सर्वेश्वरस्तु साध्वसाधु वा कर्म कारयन् तद्द्वारान्यथा कलयितुमीष्ट एव। कर्म सात्त्विकस्वभावाद्यनुसारि जन्मादिकारणं च । पाकशासनादिगतं सावधिकमीश्वरत्वमपि कर्मकृतमेव। अतः स्वस्वभावानुरूपकर्मकारी पुरुषः अहो कर्मणो वैभवमिति कर्म श्लाघेत । येन सुखं जीवेत् तदेव जिजीविषोः पुरुषस्य दैवतत्वेनाराधनीयम् । य एकं पदार्थमुपजीव्य पदार्थान्तरं भजते स पश्चादुपास्यमानात्पदार्थात्, पुंश्चली नारी पतिमुपजीव्यमनाराध्य जारमनुवृत्य तस्मादिव क्षेमं न विन्दते। अस्माकं गोरक्षा वृत्तिः । गवां वृत्तिर्न वृत्रहाधीना। रजस्स्वभावेन प्रेरिता घना नदीसमुद्रपर्वतादिषु वर्षन्ति। जलनिधिष्वपि वृष्टिदर्शनात् न वृष्टिः प्रेक्षावत्प्रवृत्तिपूर्विका । गवादयः प्राणिनो वलाहकैरेव प्राणन्ति । शुनासीरादस्माकमीषदप्यपकार उपकारो वा न प्रसङ्क्ष्यति। न वयं पुरादिवासिनः । अपि तु वनशैलादिवासिनः । तस्मादस्मज्जीवनहेतूनां गवाम्, अस्मत्कुलमाशासानानां ब्राह्मणानां तृणजलादिभिर्नित्यं गोवर्धनस्याचलस्य च सन्तोषाय सप्ततन्तुरारभ्यताम्। य आखण्डलयागसम्भारास्तैरयं साध्यताम् । पायससूपापूपादयः पच्यन्ताम्। व्रजे कृत्स्नं क्षीरं पायसाद्यर्थमेकपात्रे निधीयताम् । ब्रह्मवादिभिर्ब्राह्मणैर्यथावदग्नयो हूयन्ताम् । तेभ्यष्षड्रसोपेतमन्नं धेनुसहिता धेनव एव वा दक्षिणाश्च दीयन्ताम् । श्वपर्यन्ताः प्राणिनोऽन्नादिभिस्तर्प्यन्ताम्। गोभ्यो यवसो गोवर्धनाय बलिश्च वितीर्यताम्। स्वलङ्कृता भुक्तवन्तः स्वनुलिप्ताः सुवाससश्च सन्तो गोविप्रानलपर्वतान् प्रदक्षिणं प्रक्रमध्वम् । हे तात, एवंविधं कर्म अस्माभिः कर्तव्यत्वेन मम सम्मतम्। यदीदं रोचते तर्हि आचर्यताम् । अयं यज्ञो गोब्राह्मणशिखरिणां मम च प्रियतमः' इति। सुरपतिदर्पं निराचिकीर्षता बहिः कालरूपेण नियमयता नारायणेन प्रोक्तं निशम्य गोत्रभिद्गर्वजिघांसामजानाना अपि नन्दादयो गोपास्तदभ्युपगम्य तदुक्तिमनुसृत्य पुण्याहं वाचयित्वा शतमन्युसवार्थद्रव्येण गिरिं द्विजांश्चोद्दिश्य सर्वान् बलीन् गाः प्रति यवसं च समर्प्य सादरा द्विजाशीर्वादसहिताभिः कृष्णचेष्टितानि गायन्तीभिर्भूषिताभिर्गोपीभिस्साकं वृषभयुक्तानि शकटान्यारुह्य गोधनानि पुरस्कृत्य च क्ष्माभृतं प्रदक्षिणं चक्रुः । श्रीकृष्णः कथमयमचेतनो महीध्रो बलिमुपादत्ते कथन्तरामस्माननुगृह्णाति चेत्यादिरूपां नन्दादीनां शङ्कां परिहर्तुं गोपानां विश्वासकरं तन्मध्यगतरूपवदन्यद्रूपं स्वयमासादयत् । स बृहद्वपुरसन् धरस्य मूर्ध्नि स्थित्वा शैलोऽस्मीति ब्रुवन् बलिं स्वीकुर्वन् तन्मध्यगतरूपेण, 'अहो हे गोपाः

पश्यत। अयं शैलोऽस्मदुपहृतबल्यादानोपयुक्तरूपधरो नोऽनुग्रहमकलयत्। यथेष्टसर्पादिदुष्टजन्तुरूपग्रहणसमर्थ एष शिलोच्चयोऽवजानतो वनौकसो मर्त्यान् हन्ति। अतोऽस्माकं गवां क्षेमायैनं नमस्यामः' इति कथयन् गोपजनैस्सह बृहद्वपुषं गिरिरूपं स्वमेव ववन्दे। इत्थं वासुदेवेन चोदिता गोपाला अद्रिगोद्विजयागं यथावद्विधाय गोविन्देन सहिता व्रजं प्रति ययुः। दिवस्पतिरात्मनः पूजां कृष्णेन विहतां विज्ञाय तन्नाथेषु नन्दादिगोपेषु कोपात् सांवर्तकगणगतानन्तकारिणो वारिवाहान् प्राचोदयत्। एवमगदच्च। 'काननौकसां गोपानां श्रीमद्माहात्म्यमाश्चर्यकरम्। अहमेव मुक्तिदोऽपि। मद्याग एव तत्साधनमपि। एवं सत्यपि, वाचालमविनीतं पण्डितमानिनं मन्निग्रहान्मरिष्यन्तं कृष्णमुपाश्रित्य मद्यागमननुष्ठितवतां गोपानां श्रीमद्प्रयुक्तमविनयमपनयत पशून् नाशयत च। अहमप्यैरावतमारुह्य महावेगैर्मरुद्भिस्सार्धं नन्दादिगोपहननार्थं व्रजं प्रति युष्मत्पृष्ठत एवागमिष्यामि' इति। इत्थं मघवताऽऽज्ञप्ता जीमूता मुक्तशृङ्खलास्तटिद्भिर्विद्योतमाना अशनिभिर्गर्जन्तश्चण्डवातसङ्घातैः प्रेरिताश्च सन्त आगत्य जलधारासम्पातैर्वर्षोपलैश्च व्रजं यावद्बलं पीडयामासुः। धाराधरेषु स्तम्भवत् स्थूला वर्षधारा अविरतं मुञ्चत्सु सत्सु पृथिवी जलप्रवाहैः प्लाव्यमाना सती निम्नोन्नता नादृश्यत। समधिकैरासारैश्चण्डवातेन च जातकम्पाः पशवो गोपागोप्यश्च शीतेनार्ताः शिरांसि स्वसुतांश्च कायेनप्रच्छाद्य पद्मनाभं शरणं प्रापुः। हे कृष्ण, भक्तवत्सल, अस्मद्रक्षोपयुक्तज्ञानशालिन्, त्वन्नाथं गोकुलमस्मांश्च कुपितात्पर्जन्यात्त्रातुमर्हसीति गोपास्तं प्रार्थयन्त च। शिलावर्षनिष्ठुरपातेन पीड्यमानं जडीभूतं गोकुलमवलोक्याश्रितार्तिहरो विष्णुरसति वर्षर्तौ जातमतिशयितवातं शिलामयमत्युल्बणं वर्षमस्माभिः स्वयागे विहते सति कुपितेन वज्रिणास्मन्नाशाय कृतमिति मन्यमान एवमलपत्। 'गोपानां वर्षप्रयुक्तबाधायाः प्रतीकारं स्वसामर्थ्येन साधयिष्यामि। मौढ्याल्लोकेशमात्मानं मन्यमानानां सहस्राक्षादीनां धनमदं हरिष्यामि। यद्यपि मयि भक्तियुक्तानां सात्त्विकानां सुराणामीशा वयमित्यहङ्कारो न जायत एव। तथापि प्रकृतिवशात् कदाचित् सञ्जातमीश्वरत्वाभिमानं जुषमाणानां तेषां तद्दर्पभङ्गस्तन्मानभङ्गद्वारा तदुपशमायैव कल्पते। अतो मदेकरक्षणोपायं मदेकप्राप्यं च गोष्ठं स्वशक्त्या गोपायेयम्। शरणागतरक्षणमद्भक्तदर्पभञ्जनरूपं व्रतं मया धृतम्' इति। अथ सप्तहायनः पुण्डरीकाक्ष एकेन हस्तेन गोवर्धनमुत्पाट्य बालकश्शिलीन्ध्रमिव लीलया वामकरकनिष्ठिकानखाग्रेण धारयन्, 'हे

अम्ब, हे तात, सगोधना यूयं यथासुखं गिरिगर्तं विशत। मद्धस्तादद्रेर्यस्य पातात्त्रासो युष्माकं मास्तु। वातवर्षभयेनालम्। वातवर्षभयात्त्राणं मया व्यतन्यत' इति गोपानब्रवीत्। सर्वे व्रजौकसः श्रीधराश्वासितमानसाः सगोधनाः सपुत्रपौत्रा भृत्यपुरोहितादिवर्गसहिताश्चासङ्कीर्णं यथातथा गिरिगर्तं विविशुः। अच्युतः स्वावलोकनजानन्दपूर्त्यैवाशनायोदन्याकृतव्यथासुखापेक्षारहितैस्तैः केवलं वीक्ष्यमाणः सप्ताहमद्रिं दधार। यत्रोद्धारसमये पदं विन्यस्तं ततो नाचलत्। शचीपतिः सामर्थ्यप्रभावं दृष्ट्वातिविस्मितः समुज्झितव्रजवासिहिंसासङ्कल्पो गर्वरहितः स्वान् पयोधरान् सन्न्यवारयत्। गोवर्धनधरो मधुसूदनो दारुणं वातवर्षमुपरतमाकाशमम्भोधरशून्यं प्रकाशमानादित्यं च निशाम्य 'हे गोपाः यूयं स्त्रीगोधनार्भकसहिता निर्यात। साध्वसं त्यजत। वातवर्षं निवृत्तम्। निम्नगाः स्वल्पजलाश्च समवर्तन्त' इति तान् प्रत्यकथयत्। ततः स्त्रीबालस्थविररूपाः सर्वे गोपाः शकटोढगृहोपकरणाः स्वं स्वं गोधनमादाय शनैर्गर्तान्निर्जग्मुः। जनार्दनः सर्वभूतानां पश्यतां सतामनायासेन पूर्ववत् पर्वतं स्वस्थाने स्थापयामास। वनवासिनस्तं प्रेमातिशयात् परिरम्भणादिभिर्यथार्हं समीयुः। सुखिताश्च समपद्यन्त। गोप्यो दध्यक्षतोदकैः सस्नेहं तमपूजयन्। श्रेष्ठाशीर्वादान् प्रायुञ्जत च। यशोदा, रोहिणी, नन्दो बलिनां वरो रामश्च कृष्णमालिङ्ग्य स्नेहादाशिषोऽवाचयन्। दिवि देवगणादयस्तुष्टास्तं तुष्टुवुः। तदुपरि पुष्पाणि ववृषुश्च। दिवि देवैराध्मापिता वादिताः शङ्खा दुन्दुभयश्च नेदुः। तुम्बुरुप्रमुखा गन्धर्वपतयो जगुः। ततोऽनुरक्तैः पशुपालैः परिवृतो बलभद्रोपेतो हरिः स्वगोष्ठमलभत। गोपिकाः स्वहृदयङ्गमस्य हृषीकेशस्य गोवर्धनोद्धरणतुल्यान्यतिमानुषाणि कर्माणि गायन्त्यो मुदितास्सत्यो व्रजमव्रजन्। इयं श्रीभागवतकथा महाकाव्ये यादवाभ्युदये अक्लिष्टशब्दचित्रप्रधानषष्ठसर्गे सप्तमसर्गे च सप्रपञ्चं सरसञ्चावर्ण्यत।

षष्ठे—अतियजेत निजां यदि देवतामुभयतश्च्यवते जुषतेऽप्यघम्।
क्षितिभृतैव सदैवतका वयं वनवताऽनवता किमहिद्रुहा॥

इति कुवलयानन्दोदाहृतं पद्यं लक्ष्यते।

सप्तमे—गोवर्धनधारणविषयेषु पद्येष्विदमेकं

तमेकहस्ताङ्गुलियन्त्रलग्नं धाराहतं धारयतस्त्रिधाम्नः।
अमुक्तबाल्यस्य समग्रशक्तेः क्षणार्धवत्सप्तदिनान्यतीयुः॥ इति।

॥ श्रीः ॥

श्रीपरकालसूरिप्रणीतः

# शिरियतिरुमडल् दिव्यप्रबन्धः ॥

संस्कृतविवरणसमेतः ।

## திருமங்கையாழ்வார் அருளிச்செய்த
## சிறிய திருமடலுக்கு விவரணம்.

(मधुरान्तकम् श्री. ति. ई. वीरराघवाचार्यः शिरोमणिः)

पद्माकान्तपदप्रपन्नजनता कूटस्थसूरीश्वर-
श्रीपादप्रवणात्मभावभगवद्रामानुजैकान्तिनः ।
वन्दे वेदवतंसदेशिकमणेर्दिव्याङ्घ्रिचूडान्वितान्
तं च श्रीपरकालसूक्तिहृदयं तत्त्वेन वेत्तुं गुरुम् ॥

## अवतारिका

भगवतो नारायणस्याभिनवदशावतारभेदतयाऽभिमतेषु पुराणादि-प्रसिद्धानुभावेषु दिव्यसूरिषु चरमावतारभूतस्य श्रीपरकालसूरेरियं 'शिरिय तिरुमडल्' इति प्रसिद्धा द्राविडीदिव्यसूक्तिः महारत्नगर्भेव माणिक्यमञ्जूषिका सर्वतः सहृदयानां हृदयमासेचयति । एतत्प्रणीताः सरसगम्भीराः षट्प्रबन्धाः श्रीशठकोपमुनेः द्राविडचतुर्वेद्याः षडङ्गानीति सांप्रदायिकाः मन्यन्ते । तेष्वयं पञ्चमः प्रबन्ध इति श्रीदेशिकचरणानां प्रबन्धसारपाठक्रमादवगम्यते । श्रीकृष्णपादैरन्यत्र व्याख्यातमर्थक्रममनु-सृत्य तु तुरीयोऽयं स्यादिति संभाव्यते ।

मुनिरयं निरतिशयप्रीतिरूपेण दर्शनसमानाकारेण ज्ञानेन भगवन्तं निरन्तरमनुभूय बाह्यसंश्लेषमपेक्षमाणः तत्प्राप्तये च तमेव शरणं प्रापद्यत पूर्वस्मिन् प्रबन्धे । फलालाभेन निर्विण्णहृदयः तमभिमुखयितुं 'मडल्' इति कामपि साहसप्रवृत्तिमात्मनः प्रकाशयतीह दिव्यप्रबन्धे ।

उपवनादिषु यदृच्छया समागतयोः निरतिशयानुरागयोः नायिका-नायकयोः उन्मस्तकरसेन मदनोत्सवेन तदात्वे चरितार्थयोः पुनस्समागमनिमित्ते बान्धवैः प्रतिहते बलादभिमतलाभाय कामातुरस्तयोरेकतरः स्वाभिमतमितरं क्वचन चित्रफलके विलिख्य तदेकदृष्टिः ताळवृक्षदळमयं तुरगमारुह्य निद्रान्नपानादिवर्जं आकुलकचं च सकललोकसाक्षिकं यत् रथ्यासु सञ्चरति, सेयं साहसप्रवृत्तिः 'मडल्' इति व्यवह्रियते । दुष्करक्रियोपक्रममिममवलोक्य बान्धवाः राजानो वा मिथस्संयोजयेयुरेतौ । स्वयमेव वा सम्पन्नमनोरथौ स्याताम् । अलाभे जीवितस्यैव वाऽन्तं लभेयाताम् ।

कामाधिकाः स्त्रियः पुमांसो वा साहसमिदमनुतिष्ठेयुरित्यार्यमर्यादा । *समुद्रोपमकामा अपि वामाः नेदं कर्म कुर्युरिति द्राविडाः सूत्रयन्ति । अभुक्त्वा स्थातुमशक्ये कामे वर्तमानाः निषिद्धेऽपि पथि प्रवर्तन्ते इति लोकरीतिरियम् । अतो निषेधवश्याः कथं स्युः अतः चिन्त्यमिदम् । तदिदमग्रे वक्ष्यति स्वयमेव सूरिरयम्— †'अगाधो दधिनिभकामाः का नाम वामाः परापवादं गणयेयुः' इति अस्तु वेयं द्राविडी व्यवस्था सुस्था । परकालसूरिस्तु स्वयं नायिकाभावमास्थाय पुरुषोत्तमेन बाह्यसंश्लेषमभिलषन् वाङ्मात्रेण साहसप्रवृत्तिमात्मनो घोषयति । न पुनरनुतिष्ठति । तदिदं प्रबन्धशैली परामर्शादवसीयते । भीषणवाङ्मात्रमपि पर्याप्तं फलाविनाभावाय 'चापमानय सौमित्रे' इति वचनमात्रं हि सिन्धुराजमभिमुखयति स्म इत्यमंस्त परकालनायिका । अतो न द्राविडमर्यादाविरोधोऽपि । 'भक्तिः शृङ्गारवृत्त्या परिणमति मुनेः' 'गोप्यः कामात्' इत्यादिकमिह भाव्यम् ।

भगवति§ काम एव साक्षात् पुमर्थः । इतरे धर्मादयः त्रयोऽपि तदर्था इति श्रीरङ्गामृतगुरोः अन्तादिश्रीसूक्तिः । शुकादीनां परवासुदेव-

---

* 'கடலன்னகாமத்தராகிலும் மாதர் மடலூரார் மற்றை யார் மேல்'.

காரார் கடல் போலும் காமத்தராயினர், ஆரே பொல்லாமை யறிவார்.

§ 'சேம நல்வீடும் பொருளும் தருமமும், சீரிய நற்காம மும்மென்றிவை நான்கென்பர், நான்கினும் கண்ணனுக்கே ஆமதுகாமமறம் பொருள் வீடிதற்கென்றுரைத்தான் வாமனன்சீலன், இராமாநுசனிந்த மண்மிசையே'

रूपे कामः । सनकादीनामन्तर्यामिणि । वाल्मीकिप्रभृतीनां रामादिषु विभवरूपेषु । शौनकादीनां परकालमुनेश्चार्चावतारेषु । 'बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः' इति च श्रुतिः । आलम्बनसंशीलनात्मकं भक्तेः सहकारिकारणमिह विधीयते इति शारीरके सहकार्यन्तरविध्यधिकरणे स्थापितम् । प्रबन्धेऽस्मिन् स्वतः फलमिदमिति स्थाप्यते । नहि निन्दान्यायेनान्यनिन्दा क्रियते ।

मडलुक्तिमात्रेण कान्तं वशयितुकामाऽपि कामिनी नायकमनः कान्ताप्रसादादृते तत् फलं न सेत्स्यति इति प्रबन्धारम्भे देवीं भुवं पुरस्करोति । सपत्नीजने सखीवृत्तिर्हि गृहिणीपदं प्राप्तुमभ्यर्हितोपायः इत्याहुः । यथा कण्वोपदेशः शकुन्तलां प्रति 'कुरु प्रियसखीवृत्तिं सपत्नीजने ... ... ... यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः' इति । काम एव पुरुषार्थः इति स्वपक्षे स्थितानां भूयसामियमधिष्ठानं इत्यादरातिशयेनापि भुवः पुरस्करणमादौ स्यात् ।

---

# शिरिय तिरुमडल् ॥

## திருமங்கையாழ்வார் அருளிச்செய்த

## சி றி ய தி ரு ம ட ல்.

——0❀0——

*தனியன்*

*'முள்ளிச் செழுமலரோர்தாரான் முளைமதியம்*
*கொள்ளிக் கென்னுள்ளம் கொதியாமே*
*வள்ளல் திருவாளன் சீர்க்கலியன் கார்க்கலியை வெட்டி*
*மருவாளன் தந்தான் மடல்.'*

காரார் வரைக்கொங்கை கண்ணார் கடலுடுக்கை
சீரார் சுடர் சுட்டிச்செங்கலுழிப் பேராற்று
பேராரமார்பில் பெருமா மழைக்கூந்தல்
நீராரவேலி நிலமங்கை யென்னும்—இப்
பாரோர் சொலப்பட்ட மூன்றன்றே. [1]

श्रीशैलं सागरं सूर्यमण्डलं च त्रिधाम्नः पदमुशन्ति । दक्षिणोत्तरौ सुन्दरबाहुगिरिः वेङ्कटाद्रिश्च भूमेरस्याःस्तनौ । तयोरग्रे मेघमण्डलमेव मेचकं चूचुकम्। नीळातुङ्गस्तनगिरितटीसुप्तं श्रीस्तनाभरणं तेजः नित्यमिह सन्निधत्ते। अथ च तस्य द्वितीयं धाम सागरः– 'यमन्तस्समुद्रे कवयोऽवयन्ति'। नायकाधिष्ठानेन दर्शनीयोऽयं सागराम्बरायाः दिव्यं वसनम्। तृतीयं च तस्य धाम श्रीमदादित्यमण्डलम्। 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' इति हि श्रूयते। तदेतदस्यास्तिलकम्। तदेवं स्वाधीनपतिकायास्सपत्न्याः प्रसादो नोपेक्षणीयः । अथ च कलुषरत्नमयविशालनदीहारान्वितमुरः। परस्परमाभरणायते। मेचकतमामेघमण्डलीचिकुरबन्धोऽस्याः। अण्डावरणजलमेव मर्यादा 'दशोत्तराण्यावरणानि यानि च' इति ह्याहुः। अहो भूयो मुखमस्याः सौभाग्यम्। अहो भोग्यभोगोपकरणादिसम्पत्। अहं तु पतिपरित्यक्ता हाराहारविहारपरिहारेण सीदामि। इत्थमियं शृङ्गारदेवतेव मूर्तिमती भूमिनाम्नी देवी । अत्रत्यैः त्रय एव पुरुषार्थाः इत्युच्यन्ते।

---

அம்மூன்று மாராயில் தானே அறம்பொரு ளின்பமென்று
ஆரா ரிவற்றினிடையதனை யெய்துவார்
சீரா ரிருகலையு மெய்துவர். [2]

के ते त्रयः ? इति विमर्शे धर्मः, अर्थः, कामश्चेत्येव पर्यवस्यति। न तु तुरीयो मोक्षो नाम । ये पुनरेतेषां मध्ये कामपुरुषार्थं लभन्ते, ते धर्मार्थावपि लभन्ते तेषां तल्लाभ एवोत्तमा श्रीः। कामस्य कलामात्रं इतरत् द्वयं धर्मोऽर्थश्चेति। तद्धिकामस्य साधनम्। साध्यलाभे साधनसम्पत्तिरपि ननु सिद्धैव।

---

சிக்கென மற்றோரானு முண்டென்பா ரென்பதுதானதுவும்,
ஓராமை யன்றே யுலகத்தார் சொல்லுஞ் சொல்,
ஓராமை யாமா றதுவுரைக்கேன் கேளாமே
காரார் புரவியேழ் பூண்ட தனியாழி
தேரார் நிறை கதிரோன் மண்டலத்தைக் கீண்டுபுக்கு
ஆரா வமுதமங் கெய்தி. [3]

शेक्सिपयर्-कृतं

# यथाभिमतम् ॥

III. 1, 2

—※—

## तृतीयाङ्के प्रथमं प्रेक्षणकम् । प्रासादान्तर्गृहम् ।

प्रविशन्ति
राजा फ्रेडेरिक्, आलिवर्, प्रभवः, अनुचराश्च ।

राजा— ततःप्रभृति तं न दृष्टवानसि ? नन्वार्य, न तद्भवितुमर्हति । करुणामयोऽहमस्मि । अन्यथा सन्निहिते त्वयि मम वैरनिर्यातनं कुर्याम् । न त्वसन्निहितमन्वेषयेयम् । अवधत्स्व । यत्र क्वापि सन्तं अन्विष्य उपलभस्व । निपुणमन्विष्य जीवन्तं मृतं वा द्वादशमासाभ्यन्तरे आनय । अन्यथा नास्मज्जनपदे जीवितुमिच्छन् प्रतिनिवर्तस्व । त्वदीयानि क्षेत्राणि ग्रहणार्हाणि अन्यानि च वस्तूनि गृहीत्वा अस्मद्वशे करिष्यामः यावद्भवान् अस्माभिः शङ्क्यमानोऽपराधो भवति नास्तीति भवदनुजमुखात् निरूपयिष्यसि ।

आलिवर्— हन्त, अस्मिन् विषये मम हृदयं ज्ञातुमर्हति महाराजः । न मम जीविते कदाचित् मद्भ्रातरि मे प्रेम बभूव ।

राजा—तर्हि खलतरस्त्वम् । कोऽत्र भोः, निष्कास्यतामयं बहिः । किञ्च अस्मत्पुरुषाः तस्य गृहान् क्षेत्राणि च सङ्ख्याय अस्मदायत्तानि कुर्वन्तु । त्वरितमिदं कर्तव्यम् । अयं च अपसार्यताम् । (निष्क्रान्ताः)

## द्वितीयं प्रेक्षणकम् । आर्देन्-वनम्

(प्रविशति आर्लण्डो पत्रमेकं वृक्षे लम्बयन्)

आर्लण्डो— हे मदीय पत्र, मदनुरागस्य साक्षिभवत् अत्र लम्बस्व । अयि निस्सपत्ने निशाधीश्वरि,* भवती च परिशुद्धादन्तरिक्षप्रदेशात परिपूतया दृशा त्वज्जयिन्या नामधेयमिदं प्रसमीक्षस्व । एतदायत्ता मे प्राणाः ।

अये रोसलिन्द्, इमे वृक्षा मम पुस्तकानि । एषां वल्केषु मदीयाश्चित्तवृत्तीर्लेखिष्यामि । येन इदं वनं प्रविशतः चक्षुष्मत एकैकस्य चक्षुः

---

* चन्द्रस्य स्त्रीत्वं पाश्चात्यभाषासम्प्रदायसिद्धम् ।

त्वद्गुणप्रसिद्धिं ग्रहीष्यति ।

धाव धाव, आलेण्डो ; वृक्षे वृक्षे अशक्यवर्णनां तां सुन्दरीमुत्कीर्णां कुरु । (निष्क्रान्तः)

प्रविशतः कारिन् निकषोपलश्च

कारिन्— स्वामिन् निकषोपल, कथं पुनरिमाम् अजपालवृत्तिं भवान् मन्यते ?

निकषोपलः—नूनं, अजपाल, स्वरूपत इयं शोभना । अजपालसम्बन्धिनीति तु अशोभना । एकान्तवर्तिनीति मे प्रिया भवति । परं तु स्वैकमात्रविश्रान्तेति अत्यन्तमसाध्वी । अथ स्थलवर्तिनीति हर्षदा । राजकीये आस्थाने न भवतीति तु अवसादकरी । अनतिव्ययहेतुत्वात् मत्स्वभावानुरूपा समृद्धिराहित्यात्तु मदुदरप्रतिकूला । अजपाल, अपि ते अस्ति कश्चित् तत्त्वशास्त्रे परिचयः ?

कारिन्—नेतोऽधिकं यदहं जानामि— यथा यथा कस्यचिदार्तिर्भवति तथा तथा तस्य शान्तिर्न भवतीति । यस्य अर्थो नास्ति, नापि तदार्जनोपायः नापि च सन्तुष्टता तस्य त्रयोऽपि सुहृदो न भवन्तीति ; वृष्टेरार्द्रीकरणं स्वभावः ; अग्नेर्ज्वलनमिति ; तृणभूमिः अजान् पुष्टान् करोतीति ; निशायाः प्रधानकारणं सूर्यस्याभाव इति ; यस्य नैसर्गिकी प्रज्ञा नास्ति, नापि शिक्षया समधिगता, तस्य पोषकेषु वा दोषो वक्तव्यः, मूढकुले वा जन्म ।

निकषोपलः—एवंविधः आजानसिद्धतत्त्वज्ञानः । अजपाल, किं कदाचित्त्वं राज्ञामास्थाने स्थितोऽसि ।

कारिन्—न, सत्यमेतत् ।

निकषोपलः— तर्हि त्वं गर्ह्योऽसि ।

कारिन्—न । अहं मन्ये, —

निकषोपलः— परमार्थतः त्वं गर्ह्योऽसि दुष्पक्व इवापूपः, कृत्स्नमेकस्मिन् पार्श्वे ।

कारिन्—आस्थानेऽनवस्थानेन । अयं ते हेतुः ।

निकषोपलः—तथैव । यदि त्वं कदाचिदपि राजास्थाने नावर्तथाः न त्वं जातु विनयवृत्तिप्रकारान् दृष्टवानसि । यदि तान् न दृष्टवानसि तर्हि त्वद्वृत्तिप्रकारा नूनं क्रूराः । क्रौर्यं पापाय । पापाद्विनाशः । विनश्यदवस्थोऽसि अजपाल ।

कारिन्—न मनागपि, निकषोपल । ये आस्थानसमुदाचाराः ते ग्रामेषु तथैव परिहास्या भवन्ति यथा ग्रामीणवृत्तयो राजास्थानेषु । त्वमात्थ आस्थाने न प्रणामः क्रियते किन्तु हस्ते चुम्बितमिति । अयमाचारोऽशुचिर्भवेत् आस्थानस्था यदि अजपालाः स्युः ।

निकषोपलः—कथम् ? उपपादय सङ्ग्रहेण । एहि, उपपादय ।

कारिन्—किमत्र उपपादनीयम् । सर्वदा वयमजाः परिचरन्तो वर्तामहे । तासां चर्म च क्लिन्नमिति च भवान् जानाति ।

निकषोपलः—कुत एतत् । आस्थानस्थानां हस्ताः किं न स्विद्यन्ति ? किं वा मांसक्लेदः तथा न पथ्यः यथा मनुष्याणां स्वेदः फल्गुः फल्गुः । समीचीना उपपत्तिरुच्यताम् ।

कारिन्—अपि च अस्माकं हस्ताः कठिनाः ।

निकषोपलः—तथा चेत् चुम्बनावसरे युष्मदीयौ ओष्ठौ शीघ्रतरं हस्तस्पर्शं गृह्णीयाताम् । पुनः फल्गुः । अन्या शोभना उपपत्तिरुच्यताम् ।

कारिन्—अपि च अजचिकित्सावशेन *तारवरूषिता भवन्ति । किं नाम भवान् तारवचुम्बितं अस्माभिः क्रियमाणमिच्छति । आस्थानगतानां तु हस्ताः कस्तूरीपरिमलवासिता भवन्ति ।

निकषोपलः—अत्यन्तमसारोऽसि क्रिमिभोज्यमांसपिण्डमात्ररूपः । अभिज्ञेभ्यो ज्ञात्वा चिन्तय ; कस्तूरिकाया जन्म तारवात् निहीनतरम् । परिष्कुरु उपपत्तिम्, अजपाल ।

कारिन्—मदपेक्षया भवान् अतिबुद्धिमान् । अहमुपरतोऽस्मि ।

निकषोपलः—निग्रह एव किमुपरतो भविष्यसि ? देवस्त्वां पातु । शून्यमनुष्य । देवस्त्वां परिपक्वं करोतु । आमोऽसि ।

कारिन्—आर्य, अयमहं कर्मोपजीवी । मया भुज्यमानमन्नमहं सम्पादयामि । वसनं लभे । न कञ्चन द्वेष्मि । परसुखे नासूयामि । इतरेषां शुभे हृष्टो भवामि यन्ममानिष्टं भवति तदेव पर्याप्तमिति चिन्तयन् । अयं च मे परमानन्दः यन्मे अजाश्चरन्तीः पश्यामि, अजशिशूंश्च स्तन्यपायिनः ।—अये इत आगच्छति युवा स्वामी, गनमीड्, अभिनवाया मत्स्वामिन्या भ्राता ।

---

* Tar

# गीर्वाणवाणीस्तवः ॥

(T. Ramachandra Sastri Siromani)

यस्यां वेदमयः पुराणपुरुषः स्वात्मानमादीदिपत्
यस्यां वैदिककर्मणामुपहृतिर्विद्योतते सर्गतः ।
याऽसौ देवगवीति लोकविदिता या केवलं संस्कृता
रराजीति नमोऽस्तु सर्ववचसां मात्रे परज्योतिषे ॥ १ ॥

दिव्यं लोकमपास्य यं प्रथमतश्छन्दोमयी शारदा
सञ्जग्राह तपोनिधिं स भगवान् कारुण्यवारांनिधिः ।
वाल्मीकिः कविपुङ्गवो मधुरया रामायणं निर्ममे
व्राह्मया मञ्जुलया यया सततमस्त्वस्माकमस्यै नतिः ॥ २ ॥

शास्त्रार्थैः सकलैस्तथा हितकथैर्धर्मोपदेशैर्भृतं
तस्मात्पञ्चमवेदनाम महितं भारान्महत्वाच्च यम् ।
सर्वेषां प्रकृतिं समष्टिविषयं प्राहुर्महाभारतं
तं व्यासो विदधे निबन्धमनघं यस्याममुष्यै नमः ॥ ३ ॥

यस्मिंस्ते मुनयः परावरविदः श्रुत्यर्थसंवादिनीः
कर्मानुष्ठितितत्परोद्धृतिपरा धर्मादितत्त्वोच्छ्रयाः ।
प्राणैषुः कृपया स्मृतीश्च जनतासौख्यैकजीवातवः
तस्मै सर्वमनोरमाय वचसे स्तात् संस्कृतायाऽऽनतिः ॥ ४ ॥

यस्मिन् व्याकरणं बभाण तदिदं श्रेष्ठो मुनिः पाणिनि-
र्यस्माद्व्याकरणान्न किञ्चिदधिकं जागर्ति लोके क्वचित् ।
यच्च व्याकरणं पतञ्जलिमहाभाष्येण संभूषितं
तस्मै निर्जरभाषिताय नतयः सर्वार्थकल्पद्रवे ॥ ५ ॥

वर्णोच्चारणकारणादिगणनात् सर्वङ्कषप्रक्रमा
शिक्षा सर्वमनोरमा विजयते यस्यामृषिप्रस्तुता ।
ज्योतिः शास्त्रमपूर्वमाविरभवत्पूर्वं श्रुतेर्लोचनं
तस्यै सर्वविधां चमत्कृतिधुरां वाचे वहन्त्यै नमः ॥ ६ ॥

सर्वालङ्कृतिभूषिते सुमधुरे गद्येऽथ पद्येऽपि वा
काव्ये शास्त्रसमुच्चये च विपुलं पुष्णाति या वैभवम् ।
यस्यां लक्षणलक्षितं च सुषमां तर्कादिकं लम्भितं
तामेकामपहाय देवभणितिं नान्यत्र मे स्यान्नतिः ॥ ७ ॥

वैदर्भीचतुरः सुमञ्जुलपदव्यङ्ग्यैकबद्धोत्सवो
वाग्देवीसदनाननो मधुरवाग्वाल्मीकिसन्दर्शिते ।
वन्ये सञ्चरणोत्सुकः पथि गजः श्रीकालिदासः सुधीः
यस्यामेव कृतीर्विधाय सुमहल्लेभे यशस्तां स्तुमः ॥ ८ ॥

दैवी किञ्च सुसंस्कृता बहुतिथात्कालात्समासादिता
सर्वेषां श्रुतिचोदिते विहरतां सौहार्दहेतुः पथि ।
ऐक्ये भारतवासिनां न हि भवेद्बीजं च यस्या ऋते
ब्राह्मीं तामवलम्ब्य कल्पलतिकां सौख्यं भजन्तां समे ॥ ९ ॥

शब्दालङ्कारचित्रा जयति सुरगवी धातुजस्वस्वरूपा
दीर्घैरत्यन्तरम्यैरनितरसुलभैर्मण्डिता या समासैः ।
यस्यामेवैकवर्णं भवति च सुलभं पद्यमालोकितुं सा
प्राचीना शाश्वतीनामपि सकलगिरां मातृकल्पा नमस्या(भिवन्द्या)
॥ १० ॥

श्रीरामानुजदिव्यजन्ममहिते श्रीभूतपुर्याह्वये
क्षेत्रे संस्कृतमन्दिरे बुधवरैः संसेविते सुन्दरे ।
लब्धव्याकरणादिपाठकपदो यद्रामचन्द्रो व्यधात्
ब्राह्मीस्तोत्रमिदं भवेत्सुमनसां प्रीत्यै रसैर्मेदुरम् ॥ ११ ॥

---

लोकाराधितकीर्तिमान्यविबुधन्यक्कारकोलाहलात्
पाण्डित्यं प्रकटीचिकीर्षति निजं मन्दाय तस्मै नमः ।
आरोप्यागसमञ्जसा बुधजनं सन्दूष्य सन्तुष्य च
स्वीयं गोप(च्छाद)यितुं प्रमादशतकं बद्धोत्सवायाञ्जलिः ॥

[T. R.]

# प्रकृतिभेदः ॥

I

— ननु कमलायाः शिशुरस्वस्थ इत्यश्रौषम् । महाभिषजोऽपि किल तस्या गृहमागमन् । कथमिदानीं वर्तते । जानासि ?

— न खलु प्राणापायशङ्का । स्वास्थ्यमप्यचिराद्भविष्यतीति भाति । कस्तस्य शिशोः रोग इति मन्यसे ? अत्याहारादजरणमेव । मृगप्रकृतिः कमला । जातस्य शिशोः कतिपये मासा एवाभवन् । तस्य क आहारो देयः कियान् देय इति विवेकलेशो नास्ति । न पयः क्रीणाति । न घृतम् । रूक्षेण रसान्नेन शिशोरुदरं पूरयति । पश्य तस्योदरं सदा कथं वर्तत इति । अपूपः दोशा करम्भः इति यत् किमपि पच्यते तत्सर्वं अपरिमितं ददाति । शिशुः कथं वर्तेत । सदा प्रवृत्तिः, सदा उपद्रवः ।

II

— कल्याण्याः कुमारः कथं वर्तते ? तस्या गृहं प्रविशन्तीं त्वामद्राक्षम् । तव मुखात् वार्तां विज्ञाय गन्तव्यमिति त्वां प्रतिपालयन्ती वर्ते ।

— निमीलिते लोचने नाद्याप्युन्मीलयति । तथापि सर्वं सम्यग्भवेदिति वैद्या वदन्तीति कल्याणी वदति ।

— को रोगः कुमारस्य ? तस्याः प्रकृतिरेकविधा । सा शिशोः समग्रमाहारं न ददातीति वदन्ति । तत्प्रायस्तथ्यं भाति ।

— कः सन्देहः । न ददात्येव सा शिशोरपेक्षितं समग्रमाहारम् । इदमलम्, इयदलम्, इति सर्वदा सा आहारे अतिसङ्कोचं कुर्वती वर्तते, अत्याहारेण शिशोरस्वास्थ्यं भवेदिति बिभ्यती । क्षुधा असकृत् क्रन्दति शिशुः । आहारमदत्त्वैव सा तत्समाश्वासनं करोति । तथा नाम शिशुं रक्षति ।

---

# काव्यपुरुषोत्पत्तिः ॥

(Pandit K. S. Ramaswami Sastri, Baroda.)

—— ०※० ——

(अनुवृत्ता)

शुक्रो महर्षिस्तपसां निधानं प्रातः कुशेध्माहरणाय यातः ।
बालं सुखार्हं रवितप्तदेहं विलोकयामास दयार्द्रचेताः ॥ १९ ॥

प्रीत्या सुनिध्याय महामुनिस्तं निनाय बालं स्वकमाश्रमौकः ।
सारस्वतेयश्च समाससाद क्षणेन शान्तिं बुबुधेऽथ शुक्रम् ॥ २० ॥

अन्वग्रहीत्तं प्रथमं कवीनां छन्दस्वता वाक्प्रसरेण बालः ।
शुक्रोऽपि निर्हेतुकशक्तियुक्तो विस्मापयन्वाचमुवाच रम्याम् ॥ २१ ॥

'दुग्धाऽपि या दोग्धृभिरादरेण नदुग्धपूर्वेव समृद्धरूपा ।
सूक्तीः प्रसूते सुरभिः कविभ्यः सरस्वती सा हृदि सन्निधत्ताम् ॥ २२ ॥'

शुक्रस्तदारभ्य कविर्बभूव शिष्यास्तदीया अपि काव्यकाराः ।
कवित्वमव्याहतमाप्नुवन्तो वंशं कवीनामुदपादयंस्ते ॥ २३ ॥

तावन्निवृत्ता वचसां विधात्री पुत्रेण हीनं पदमालुलोके ।
उद्विग्नचित्ता च बभूव देवी वाल्मीकिवाक्याद्बुबुधेऽस्य वृत्तम् ॥ २४ ॥

प्राचेतसा दर्शितमाश्रमं सा संप्राप्य बालं जगृहेऽङ्कपाल्याम् ।
स्तुतं पयः पाययति स्म माता नितान्तहृष्टा च सुतं चुचुम्ब ॥ २५ ॥

प्राचेतसायापि महर्षये सा प्रसन्नचित्ता प्रददौ विधात्री ।
छन्दस्वतीमुत्तमवाचि सिद्धिं स्वयंप्रकाशां सरसार्थयुक्ताम् ॥ २६ ॥

अनुग्रहेणामितशक्तियुक्तो निषादविद्धाण्डजदर्शनोत्थम् ।
क्रौञ्चस्य शोकेन दयार्द्रचित्तः श्लोकं मुनिश्शोकवशाज्जगाद ॥ २७ ॥

वनेचर त्वं न हि यास्यसीह भुवि प्रतिष्ठां चिरमीदृशेन ।
रतिप्रसक्तस्य सुकोमलस्य क्रौञ्चस्य वेधेन विनिन्दितेन ॥ २८ ॥

श्लोकं सुरम्यं बुबुधेऽथ देवी वरं च तस्मै प्रददौ प्रहृष्टा ।
योऽध्येष्यते पूर्वमिदं तु पद्यं कवीश्वरत्वं भजतां स धीमान् ॥ २९ ॥

प्राचेतसः प्राप्तवरप्रसादो रामायणं काव्यवरं चकार ।
प्रसादमाधुर्यरसाद्युपेतं यदादिकाव्यं कविबृन्दवन्द्यम् ॥ ३० ॥

KENDRIYA SANSKRIT VIDYA PEETHA LIBRARY TIRUPATI.



द्वैपायनो ब्रह्मविदग्रगण्यः श्लोकं तमेनं प्रथमं विदित्वा ।
सरस्वतीदत्तवरं महात्मा कवीश्वराग्रेसरतामवाप ॥ ३१ ॥

स भारतं पञ्चमवेदसंज्ञं लक्षेण पद्यैः प्रणिनाय तूर्णम् ।
काव्यद्वयं तन्मणिकुण्डलाभं सरस्वतीवक्त्रमलञ्चकार ॥ ३२ ॥

इत्थं गते काव्यकुमारसङ्घात् सरस्वती भूतलवासरक्ता ।
नैवास्मरद्ब्रह्मपुरं स्वकीयं ब्रह्मर्षिदेवर्षिविभूपितं सा ॥ ३३ ॥

विज्ञाय सर्वं भुवि वृत्तमस्याः प्रजापतिः पूर्णमनोरथां ताम् ।
सरस्वतीं पुत्रसुखावकृष्टां दाक्षिण्ययोगान्न समाजुहाव ॥ ३४ ॥

अथैकदा सर्वजगद्विधाता ब्रह्मर्षिबृन्दारकमण्डितायाम् ।
आसीन्निषण्णो मुदितस्सभायां शृण्वन्विवादं मुनिपुङ्गवानाम् ॥ ३५ ॥

श्रुत्यर्थनिर्धारणतत्परेषु मुनिप्रवीरेषु बभूव वादः ।
यत्रार्थतत्त्वस्य विनिर्णयाय सस्मार वेधा वचसां विधात्रीम् ॥ ३६ ॥

---

# पुस्तकपरामर्शः ॥

## Exercises in Sanskrit Translation: Book I

(For the Intermediate classes) by V. Gopala Iyengar M. A., Lecturer in Sanskrit, St. Joseph's College, Teppakulam P. O. Trichirapalli. Price Rs.

आङ्गलमहाकलाशालासु अधीयानानां भाषापरिवर्तनं प्रधानकार्येष्वन्यतमं भवति । तत्र संस्कृताध्यायिभिः संस्कृताद् भाषान्तरे भाषान्तरात् संस्कृते च परिवर्तने कर्तव्ये तदुचितगद्यपद्यदानाय अध्यापकानां महान् अन्वेषणश्रमोऽनुभाव्यो भवति । इमं परिहृत्य तानुपकर्तुमिच्छद्भिः कैश्चित् उचितानि सुभाषितपद्यानि कथागद्यानि भाषान्तरवाक्यगुम्भांश्च सङ्कलय्य कानिचित् पुस्तकानि सन्ति प्रकाशितानि । अद्य श्रीगोपालार्येण प्रकाशितमिदं उत्तमकक्ष्यामवगाहते । अत्र संस्कृतमये प्रथमभागे आद्याश्चत्वारिंशत् अभ्यासार्थाः पद्यखण्डाः सन्ति । उपरि पष्टिर्गद्यखण्डाः । द्वितीयभागे आङ्गलीमये अशीतिः खण्डाः । अन्ते योजिता श्लोकार्थसूचना पदटिप्पणी च नूनं विद्यार्थिनां महते उपकाराय कल्पेयाताम् ।

[सं]

Registered No. M 2300.

Book XXIII || श्रीः || Nos. 11 & 12

# उद्यान पत्रिका

नाम

## || संस्कृतमासपत्रिका ||

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २३] कलि || ५०५१ विकृति { कर्कट सिंह } साधारण सं ११
शास्त्रानुबन्ध सं १२
आहत्य सं १२

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

July & August 1950

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription   Re. One only.
Do. With Sastraic Supplement   Rs. 2—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण)।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः — *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः । ३२५—३३२

1 मेनका ।
2 व्याजोक्तिरत्नावळी ।
3 वर्षपूर्तिः ।
4 संस्कृतग्रन्थजातम् । वैदिककाण्डः ।
5 माण्डूक्योपनिषत् ।
6 धर्मघोषणा ।
7 शिरिय तिरुमडल्दिव्यप्रबन्धः ।
8 काव्यपुरुषोत्पत्तिः ।
9 यथाभिमतम् ।
10 प्रकृतिभेदः ।
11 प्रतिबोधनम् । [in the wrapper]

TIRUPATI. LIBRARY

वार्तया एतदवधि अविदितत्वात् पुनर्विवाहं प्रतिरोद्धुं भवन्त ऐच्छन् । अद्य तु मेनका अन्तं गता । इतः परं भवतां पुनर्विवाहेन कृतेनैव भाव्यम् । एते सर्वाणि संविधानानि कृतवन्तः । कुतोऽत्र प्रतिषेधो भवद्भिः कार्यः । निर्वर्तितविवाहा भवत । यद्यप्यस्मिन् मुहूर्ते तन्निर्वर्तनाय भवतां शरीरस्थितिः अवकाशं न दद्यात्, तथापि इतः कतिपयदिनानन्तरं वा इमामेव कन्यां परिणयत । इयमपि कन्या सर्वेषु विषयेषु अनुरूपैव भवेत् । भवत्सोदर्यौ सम्यक् परीक्ष्यैव निर्धारितवत्यौ स्याताम् । सा किल लक्षप्रभोः पुत्री । तस्याः स्वं सर्वं किल भवत एव आगमिष्यति । विवाहं कृत्वा प्रासादे सुखं वसन्तः सुखमनुभवत । यदेवं भवन्तः अतिमात्रं शोचन्ति, न तन्मनागपि न्याय्यम् ।" इत्यवोचत् ।

यद्यपि सा तथा तस्मिन् आन्तरेण प्रेम्णा द्रुतहृदयमभाषत तथाऽपि तस्या वाचः ज्वलति वह्नौ आज्यसेकवत् तस्य आर्तिं शोकं चावर्धयन् । अथापि स्वस्मिन् अगाधानुरागवत्यां प्रतिफलमनुद्दिश्य अविरतश्रद्धया स्वजीवितरक्षणं कुर्वत्यां तस्यामुत्तमस्त्रियां ईषदपि कठिनां वाचं वक्तुमकृतमनाः सः मनाक् मन्थरीभूय क्षणमात्रं मौनी स्थितः ततः परं "कतिष्वपि लक्षेषु रूप्येषु आगतेषु, यस्मिन्नपि प्रासादे आगते, देवलोकात् साक्षाद् रम्भायामपि मम पत्नीभवितुमिच्छन्त्यां किं मे मनः अन्यथाभूय तेषु स्पृहां कुर्यात् ? पतिव्रताशिरोमणिं मम मेनकां दृष्टवती चक्षुषी किमन्यां काञ्चन कन्यां पश्येताम् ? मत्प्राणानां प्राणभूतां दुर्लभगुणां तामुत्तमां कन्यां स्पृष्टवन्तौ आश्लिष्टवन्तौ च करौ कथमन्यां स्त्रियं स्पृशेताम् ? पुनर्विवाह इति वार्तैव दयया मयि न भाषणीया । त्वद्वचनमाक्षिप्य ब्रवीमीति मा स्म कुप्यः । इयन्ति दिनानि नक्तन्दिवं क्षणमप्यनपसृत्य मया सह स्थित्वा मम प्राणभिक्षां दत्त्वा उपकृतवत्या दैवभूतायास्तव मनसो रुजा यथा स्यात् तथा भाषणं ममानुचितम् । महान्तं प्रयासं कृत्वा त्वया रक्षितं जीवितं क्षणेन हातुं मया क्रियमाणा मतिः नूनं तव व्यथां जनयेत् । इतः परमहं सुखी भविष्यामीति मत्वा त्वं मां रक्षितवत्यासीः । मदीयायां मेनकायां विनष्टायां इतः कृत्स्नमायुः किल अविश्रान्तवेदनाभाजनेन मया भवितव्यम् । तथा वेदनानुभवात् वरं जीवितपरित्याग एव ।

अहमद्यावधि अस्मिन् लोके स्थितासु कन्यासु मेनकायामेकस्यां अनुरागमकार्षम् । अन्याः स्त्रियः मनसाऽपि न स्मृतवानस्मि । सा यथा स्वकीयं पातिव्रत्यं रक्षितुं जीवितमत्यजत् तथा मया तस्या वियोगेन ननु जीवितं त्यक्तव्यम् । तया मयि कृतस्य प्रेम्णः अयं लोकोऽपि किं सदृशो भवेत् ? मम दैवं हि सा बभूव । तद्वत् किं मयि या कापि प्रेमाणं कुर्यात् ? न कदाचित्" इति । तदाकर्ण्य धात्री स्मितं कृत्वा "तथा चेत् यद्भवन्तः अद्यावधि वदन्त आसन् 'त्वं मयि गाढं स्निह्यसि । त्वां विना क्षणमपि स्थातुं न शक्नोमि' इति तत्सर्वं किं मिथ्यैव ? मयि चेत् तावान् अनुरागो भवतां भवति, मां विहाय मर्तुं किं भवन्तश्चिन्तयेयुः ? किं वा तथा करणं न्याय्यम् ? अहमपि एतावन्ति दिनानि भवद्भिः संस्तवमकार्षम् । भवदीयान् उत्तमान् गुणान् निर्व्याजां प्रीतिं च पश्यन्त्या मम मनसि च कोऽप्यनुराग उद्भूतोऽस्ति । शान्ते भवतां व्याधौ कथं भवद्भ्यो वियुज्य गच्छेयमिति चिन्ता शोकश्च कतिपयानि दिनानि मां व्यथयन्तौ स्तः । बहुभ्यो वर्षेभ्यः पूर्वं वियुक्तौ पश्चात्परस्परप्रत्यभिज्ञानेन समागतौ सुहृदाविव यदा आवां परस्परं दृष्टवन्तौ तदाप्रभृति उभयोरपि चित्ते प्रणयः अनुरागश्च प्रस्रवन्नेव आस्ते । अतीतानि एकद्वानि दिनानि या मे मनसः स्थितिः तामहं सावधानं पर्यैक्षिषि । सा विपरीता प्रतिभाति । तां प्रकाशयितुं एतदवधि लज्जमाना अभूवम् । इदानीं भवद्गृहिणी दिवं गतेत्यवगमनानन्तरं मम हृदयं प्रकाशयितुं जातधैर्याऽस्मि । आदेशे सति वक्ष्यामि" इति हर्षचङ्क्रमवता मुखेन सविनयमवदत् । तच्छ्रुतवान् वराहस्वामी अतीव विभ्रान्तः ईषन्मन्थरीभूतः 'आशयं ते प्रकाशय' इति व्याहरत् । तदाकर्ण्य श्वेता तरुणी तस्य मुखमभिप्रेक्षमाणा 'अद्यापि किं मदीयमाशयं भवन्तो न ज्ञातवन्तः ? स किं मम वाचैव आविष्करणीयः ? यन्मया अभ्यर्थनीयं तद्धि भवन्त एवाभिहितवन्तः । मेनकायाः पश्चात् मय्येव भवतां प्रेमप्रसर इति, मया वियोगो भवतामसह्य इति च किल भवन्तोऽवोचन् । तथा सति तस्याः स्थाने मामभ्युपगन्तुमर्हथेति किं मया मुक्तकण्ठमपि प्रार्थना कार्या ? तद्भाग्यं प्राप्तुं मत्तो वरा का भविष्यति । मेनकामनु मदपेक्षया भवत्सु गाढतरानुरागा अन्या काचन नैव स्यादिति निश्चितमेतत् । आपत्काले

मां सहायीकर्तुमङ्गीकृतवन्तो भवन्तः सन्तोषकालेऽपि मां सहायीकुर्वन्तीति न्याय्यं ह्येतत् ।" इति ।

अतर्कितां तस्या वाचं श्रुतवतो वराहस्वामिनो मनः आकुलीबभूव । अतिमात्रविस्मितः स्वकर्णाभ्यां यच्छ्रुतं तत् किं वास्तवमेवेति समशेत । 'सा किं जातु गणिका स्यात्' इति 'चारित्रशालिनीति स्वकृता मतिः किमयथार्था' इति चाचिन्तयत् । यद्यपि तस्य चित्ते कोप उदियाय तथापि तस्यां कृतेन प्रेम्णा तं तिरस्कृत्य "किं नाम त्वमपि मां उपहसितुं प्रवृत्ताऽसि ? मम प्राणापायदशायां रक्षणेन कृतमहोपकारा उत्तमशीला त्वमेव चेत् मां उपहासवाचा आयासयितुमिच्छसि नूनमयं मे कष्टः कालः । इतः कष्टतरः कालो नैव मे भविष्यति" इत्यतिविषण्ण उवाच ।

तदाकर्णितवती सा स्व 'साहसं' सर्वमुपयुज्य "परिहासवाचमहं ब्रवीमीति किं मनितवन्तः स्थ ? न तथा मन्तव्यम् । यदहं ब्रवीमि तत् सत्यम् । आ जन्मनः अद्य यावत् भवत्स्वेव केवलं अहं अनुरक्ताऽस्मि । सुबहुष्वपि प्रभुषु मां परिणेतुं अभिलषितवत्सु, न तान् मनसाऽप्यचिन्तयम् । भवत्स्वेव मे सकलोऽनुरागोऽजनि । परं तु श्वेताऽहं कथं भवद्भिः परिणेतुं शक्येति पर्यालोचना भवेत् । अयमाक्षेपः न दुर्निरसः । मम पिता महत्युद्योगे वर्तते । अहमेका तस्य पुत्री । अस्ति तस्य लक्षशो धनम् । तावदपि स्व भवत एव आगमिष्यति । सः पुरुषकारो भूत्वा महान्तं प्राड्विवाकोद्योगं भवतां सम्पादयिष्यति । भवद्विषये महतीं वञ्चनां कृतवत्योः सोदर्योर्मुखं इतः परं न द्रक्ष्यामीति भवन्त एव प्रतिज्ञामकुर्वन् । ते विना अन्ये बन्धवो भवतां न सन्तीति च भवन्तः उक्तवन्तः स्थ । सद्यः क्रैस्तवमतं प्रविष्टा भवत । सपदि युष्मानहं परिणेष्यामि । इन्द्रभोगे युष्मान् स्थापयिष्यामि । मनुष्यस्य किमपरमपेक्षितम् ? भूरि वित्तम, उन्नत उद्योगः, वासाय रमणीयः प्रासादः, अविप्रयुक्ता स्वर्गभोगदायिनी अन्तरङ्गानुरागभरिता कान्ता, एतदतिरिक्तं किमन्यत् सुखं भवन्तो लप्स्यन्ते ? मद्विवाहेन इदं सर्वं भवतां एकेन क्षणेन सेत्स्यति । अपरिमितेन ऐश्वर्येण आवाभ्यां रतिमन्मथाभ्यामिव सकलविधभोगानुभवैः कालो नेतुं शक्यः । 'तथाऽस्तु' इत्येकां वाचमुक्त्वा सिद्धान्तभूतोऽयं

निर्णय इतीदं एकचुम्बितमुद्रादानेन स्थिरीकुरुत" इत्यभिधाय लज्जया अवननाम। तदा तस्या ललनामणेः सौन्दर्यं सहस्रगुणमभिवृद्धं प्राकाशत। तस्या वदने यौवनकला जज्वाल। वराहस्वामिनो मनः विसंस्थुलमासीत्। आवर्जकैर्मनोहरैः तस्या वचनैः कात्स्न्र्येन वशीकृतः सः किमुत्तरं वाच्यमित्यजानन् कञ्चन कालं मौनमाश्रयत्। पुनः सा कीरवाणी तमवलोक्य "मयि कोप इव भवताम्। "आशा न लज्जां वेत्ति" इत्याभाणकः। तथाऽहं धृष्टा स्वाशयं प्रकाशितवत्यभूवम्। मम जीवनं विनाशो वा भवतां हस्ते वर्तते। यदि भवन्तो मां न प्रतिग्रहीष्यन्ति भवत्पादच्छायायामेव जीवितं परित्यक्ष्यामि, न तु भवद्भिर्विना क्षणमात्रमपि जीविष्यामि" इत्यवादीत्। तदाकर्णितवतो वराहस्वामिनो मनः परिभ्रान्तमभवत्। वाक् अस्खलत्। नेत्रयोरश्रु उदगच्छत्। "ललनामणे, मम मनसा अनुभूयमानां व्यथां किमिति कथयेयम्? भाग्यहीने मयि अनुरागं कृत्वा यन्मेनका मृता तत् किं नालम्? मयि आन्तरं प्रेम अभिवृष्य अमृतसञ्जीवनीवत् प्राप्तया महोपकारिण्या त्वयाऽपि नु मत्कृते जीवितत्यागः कार्यः? इयमपि ईश्वरपरीक्षेव। अत्यन्तदुर्लभा पत्नी मया लब्धा। तया सह सुखं जीवितुं न मे सुकृतमासीत्। तत्फलतया कति नाम वेदना अनुभवन् अद्यापि परितप्ये। मन्निमित्तं तस्या अपि दुःसहा विपदः समापतन्। अन्ततः सा स्वप्राणानेव मम कृते अर्पयामास। प्राणोत्क्रमणं विना इदं महद्व्यसनं किं मे मनसोऽपक्रामेत्। सुदुर्लभकान्ताविनाशदुःखे, शठप्रकृती द्वे दुष्टरण्डे यन्मे सोदरीत्वेन प्राप्ते तद्दुःखे च मन्मनः क्रकचवत् छिन्दति, मम रुधिरमयाश्रुपातसमये विवाहान्तरं मे किं भवतु? इतः परं मम आयुष्काले एकस्मिन् क्षणेऽपि किं मे मनः सन्तोषं नाम किमप्यनुभविष्यति? त्वं तु महाभाग्यशालिनी दृश्यसे। त्वदुच्छ्रायानुगुणं कदाऽप्यप्राप्तदुःखं भाग्यवन्तं च उत्तमं पुरुषं लब्ध्वा सम्पूर्णसुखशालिनी भवितुमर्हसि। इयमेव मदीया प्रार्थना। त्वयि मे जाता प्रीतिः शिशोर्मातरि यादृशी तादृश्येव। नैव त्वन्यादृशीमाशां त्वय्यहं कृतवानस्मि। मम दशा भिन्नस्य दुग्धस्येव वर्तते। इतःपरं न कदाप्यहं सुखी भविष्यामि। कुबेरैश्वर्ये स्थापितस्यापि मे मनः न हर्षं प्राप्स्यति। अद्य ऊर्ध्वलोके देवभावेन विराजमाना

with fear within the hollow of a tree meditating all the while on nothing but the glories of the spring in full-blossom. 26

चारुत्वे बहुकुक्कुरो विवदते व्यालम्बिनो वालधेः
प्रत्यारौति च रासभः प्रहसितुं रुन्धे पदं जम्बुकः।
इत्यप्रौढसटो मृगाधिपशिशुः क्षुद्रैर्वने धर्षितो
दूरे भीतिपलायितां मृगवधूं दृष्ट्वाऽऽत्मनो लज्जते ॥ २७ ॥

The dog enters into a hot debate with him (the lion-cub) on the point of a straight hanging tail being considered a thing of beauty. The donkey ridicules his roar by mimicking it. And the jackal crosses his path in fun. Thus insulted by the lowliest of the beasts in the forest the lion cub with the mane scracely grown on his shoulders feels ashamed within himself on seeing the female deer fleeing with fright at the sight of him from a distance. 27

अस्त्यद्रीन्द्रसभे स मन्दरगिरिर्मन्थाय देवैर्वृतो
मज्जन्तं च तमुद्दधार कमठीभूतः स्वयं माधवः।
किंतु प्राप्तसुधाफला दिविपदः कुत्रापि वेगोज्झितं
गुर्वायासपरिश्लथं तमवदन्नाश्वासमात्रं वचः ॥ २८ ॥

True, that in the distinguished assembly of the kings of mountains the Devas chose to request the Mandara to serve them as the churning rod, and true, that when he sank under water, Vishnu Himself bore him up as a tortoise on His back. But when the fruit of the labour (nectar) had been obtained, the Devas left him (the Mandara) hurriedly where he lay broken down by terrible fatigue, and did not turn back even to utter a word of comfort to him. 28

रे दुर्जात कदध्वपांसुपटल व्यर्थं हि चूडामणेः
कान्तिं धूसरयन्निजव्यतिकरैरीर्ष्याकुलः क्लिश्यसे ।
सीमन्तेषु वहन्ति तं मृगदृशः प्रीत्या कुतोऽप्युद्धृतं
पान्थैरङ्घ्रिविचूर्णितस्य भवतो दैन्यं परं दुस्तरम् ॥ २९ ॥

Oh ! ill-born dust of the nasty by-path ! in vain you are straining your envious self trying to soil the lustre of the precious gem by your contact. The deer-eyed damsels will pick up the gem with delight in whatsoever place they chance to find it and adorn the parting of their hair with it. But you are for ever doomed to the wretchedness of being trampled under the feet of wayfarers ! 29

ऋक्षाणां पटलैः कियद्विलसितं कालं कियन्तं च वा
खद्योतैः क्वचनापि कोणमिलितैर्विस्फूर्जितं वा कियत् ।
आपीयूषकरावमर्शकलनात् श्यामा पुनर्नाजहात्
स्तोकेनापि च कन्दलद्घनतमोन्यामीलनक्लिष्टताम् ॥ ३० ॥

How much and how long have the groups of stars twinkled in the heavens; and how strenously have the fireflies crowding in a corner tried to emit lustre around ! But night, did not shed to any the slightest extent her sorrowful mien of being enveloped in dense darkness growing denser with ever hour, until she felt the soothing touch of the nectar rays of the moon. 30

तिष्ठन्त्युन्मथितत्वचो विटपिनः कण्डूयमानस्य ते
हेलामन्थरगामिनस्तु शिथिलाः सीदन्ति पाथस्तटाः ।
क्षोभं यात्यभिगृह्णति त्वयि जलं जम्बालशेषं सरः
कान्तारे विततेऽपि वारणपते नाराधनं ते क्षमम् ॥ ३१ ॥

The trees stand shorn of their barks if you but rub against them. The banks of lakes subside if you but tread over them with your majestic and measured paces. The waters of the lake get stirred up and become miry if you but attempt to drink from it. Oh king of elephants! even in the wide forest, to entertain you is insupportable.

यद्वृष्टं मकरालये मरुतले शृङ्गेषु वा भूभृतां
तेनैवास्तु कथं भवान् स्तुतिपदं तप्तात्मनां प्राणिनाम् ।
स्फारे चेद्यशसि स्पृहा शमय भोः कान्तारलग्नं दवं
संशोषस्फुटितानि जीवय पुनः क्षेत्राणि वा वारिद ॥ ३२ ॥

How do you, oh cloud! expect to be adored by the thirsty souls on earth, for the showers you have discharged upon the ocean or over the desert or on hill-tops? If you court extensive fame, quench the forest fires or resuscitate the fields gaping with fissures all over due to the insufferable heat. 32

अस्तं यावदुपैति वासरमणिः प्राणाधिको नायकः
सन्तापप्रसरादियं गुणवती पाथोजिनी मुह्यति ।
तावत्येव जनैः कियानवगुणस्तस्यां समुद्भाव्यते
चन्द्रे वैरमदातृता मधुलिहामीर्ष्येति वा कैरवे ॥ ३३ ॥

No sooner than the resplendent jewel of day, her lord dearer to her than her life, vanished out of sight, the lotus-lake well known for her faultless character, fell into a swoon overwhelmed by sorrow. When such was what really had happened, lo! how much men have speculated trying to attribute wrong motives to her— some calling it enmity towards the moon; others accusing her of niggardliness towards the bees which seek her honey; and others again suggesting jealousy on her part towards the blossoming night-lily. 33

वातैरेव तु वर्तनं वनभुवि स्वैरो निवासग्रहो
निर्मुच्यापि निजत्वचः फणिपतेस्त्यागस्तथाऽन्यादृशः।
खेला मण्डलबन्धविस्तृतफणाटोपैर्दृशोरुत्सवो
नो चेत्प्राणहरं मुखे विषमसौ कस्यास्तु नो वल्लभः॥ ३४॥

He lives on nothing but the air; he takes his free abode in the forests; his liberality is unequalled as he gives up his skin peeling it off. It is a feast to the eyes to witness him playing with his outspread hood over the beautiful coils of his body. If only his mouth does not contain the deadly poison, who shall not cherish him as the most loveable companion? 34

रन्ध्राण्याविशति प्रयाति कुटिलं किं च द्विजिह्वो भव-
त्युद्दामं गरलं बिभर्ति तदपि च्छन्नः सितैः कञ्चुकैः।
नित्यं गूढपदोऽनिलाशन इति प्रख्यापयन् स्वं व्रतं
संरुन्धे परभोगमेष भुवने निःशङ्कमाशीविषः॥ ३५॥

The one with poison fangs (cobra) enters into holes; (takes advantage of opportunities to play mischief) moves along crookedly; (with cunning); has two tongues; (palters with the truth) and carries with it the terrible poison; (harbours malevolence): but still, concealing itself in white over-skins (apparently good character), always hiding his feet (secretly active), he proclaims the great austerity he practises by living merely on draughts of air, and, without the slightest compunction cuts off the happiness of others living on earth. 35

सद्वृत्तः पनसः खरैरपि बहिः पर्यावृतः कण्टकै-
रन्तः स्वादुरिति प्रयात्युपवनेष्वारोपणे योग्यताम्।
प्रायेणाम्लकटुः कथं बदर हे शूकैः समन्तावृतः
किं चान्तः कृमिदुर्भगस्त्वमगमस्तत्पार्श्व एव स्थितिम्॥ ३६॥

# उद्यानपत्रिका ॥

“अन्या वाचो विमुञ्चथ”

वेदाध्वहारं विक्रोशद्वेधःस्वैरविमर्द्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २३] कलि { ५०५१ विकृति { कर्कट सिंह } साधारण सं ११
शास्त्रानुबन्ध सं १२
आहत्य सं १२

## वर्षपूर्तिः ॥

अनया सञ्चिकया अस्याः पत्रिकायाः त्रयोविंशस्य वर्षस्य पूर्तिर्भवति । क वयं परमदुर्गताः क चेदं संस्कृतपत्रिकायाः कस्याश्चित् त्रयोविंशतिवत्सरकालं प्रकाशनं नाम महत् कर्म । अथापि यदिदं वृत्तं तत् केवलं सर्वेश्वरस्य कृपया । स सर्वेश्वरः येषां हृदयमाविश्य मूल्यप्रेषणं पोषकपदोचितमुपकारं चाकारयत् तानपि वयमद्य कृतज्ञतानुसन्धाननिरन्तरेण चेतसा धारयामः ।

कालवैषम्येण सम्प्रति सर्वेषां वस्तूनां मूल्यं बहुगुणं वृद्धमिति सर्वे जानन्ति । महत्यपि अर्थसङ्कटे प्रथमकल्पम् अल्पं पत्रिकामूल्यं ईषदप्यवर्धयन्त एव आस्म — यथाकथञ्चित् संस्कृतपत्रिकेयं प्रचारप्रचयं लभतामित्यनेनोद्देशेन । इतः परं तु अस्याः कृते कर्तव्यो व्ययः सर्वथाऽस्माकं दुर्भरो भाति । तस्मात् नवीनवर्षारम्भात् प्रभृति अनिच्छयाऽपि पत्रिकाया मूल्यं वर्धयितुं निर्बद्धाः स्मः ।

न परं संस्कृतभाषायाः परिपालनं प्रचारणं च अपि तु सर्वलोकयोगक्षेमसाधनतया यत् संस्कृतमयग्रन्थजातप्रतिपाद्यं तत्र सर्वेषां जनानां परिपूर्णस्य विवेकस्य सम्पादनं च अस्माकं प्रधानोद्देश्यम् । तस्मात् विशेषतो वयमिदानीं पुनरपि संस्कृतपण्डितेषु प्रार्थनां कुर्महे येन येन प्रकारेण अस्मदीयेऽस्मिन् प्रयत्ने अन्वेतुम् उपकर्तुं च शक्यते तेन तेन प्रकारेण तथा कर्तव्यमिति ।

# संस्कृतग्रन्थजातम् ॥

—— ०✻० ——

## (वैदिककाण्डः)

अङ्गिभूताः ऋग्वेदः, सामवेदः, यजुर्वेदः अथर्ववेदः, इतीमे चत्वारो वेदाः। शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषं, कल्पः, इतीमानि षडङ्गानि। पुराणं धर्मशास्त्रं न्यायः मीमांसा इतीमानि चत्वारि उपाङ्गानि। इत्येवं चतुर्दश विद्यास्थानानि संस्कृतमयानि परिगणितानि। आयुर्वेदः धनुर्वेदः गान्धर्ववेदः अर्थशास्त्रं इति इमे चत्वारः उपवेदत्वेन प्रसिद्धाः विद्यास्थानविशेषाः। इदं चतुष्टयं पूर्वैस्सह संयोज्य अष्टादश विद्यास्थानानि इति व्यवहरन्ति। आस्तिकमार्गानुयायिषु एषु विद्यास्थानेषु स्थितेषु बौद्धजैनसमयानुसारिणः बहवो ग्रन्थाः संस्कृतमया विद्यन्ते।

'अनधीयाना व्रात्या भवन्ति' इत्येवमादिप्रमाणपरवशाः प्राञ्चः यद्यपि चिरात् वेदतदुपयुक्तविद्यान्तरपरिचये तत्पराः बभूवुः। तथापि कालक्रमेण तादृशी काचन दशा समजायत यत्र वेदाध्ययने प्रायः औदासीन्यमासीत्। तदर्थज्ञानानुष्ठानयोः श्रद्धा जह्रास। केवलं न्यायव्याकरणयोः उत्तरोत्तरं प्रादुर्भूतेषु नवीनेषु ग्रन्थेषु वादमात्रोपयुक्ततया परिचयसम्पादने आदरो बभूव। एवं अभिनवेषु केषुचन ग्रन्थेषु प्रदर्शितसंरम्भाः द्विवेभ्यः शतकेभ्यः प्राक्तनाः एतद्देशीयाः पण्डिताः स्वस्वाधीतशास्त्रसम्बन्धीन्यपि सूत्रभाष्यादिरूपाणि आकरनिबन्धनानि अतीव उपेक्षाञ्चक्रिरे।

स्वाधीतानामपि ग्रन्थानां कर्तॄन् प्रायो नाजानन्। दूरे तज्जीवितपरिज्ञानम्। अस्मिन् देशे एवंविधायां स्थितौ, केनचिद्व्याजेन इहागत्य राज्यं लब्ध्वा जातप्रतिष्ठाः पाश्चात्याः क्रमेण संस्कृतमपि परिचेतुमारभ्य सामान्यतस्तत्तद्विद्यास्थानप्रतिपाद्यमर्थमवगन्तुं प्रयतमानाः सर्वमस्मदीयं ग्रन्थजातं तत्र पौर्वापर्यं तेषां कर्तॄन् तत्कालदेशादिकं सर्वं संकलय्य प्रकाशयितुं यत्नमकार्षुः। तत्कारणं यदिदानीं संस्कृतग्रन्थजातचरितमिति कश्चन विषयः अस्माकमध्येयतया प्रसक्तः।

प्राञ्चः अस्मद्देशीया विद्वांसः, अवश्यमध्येयतया परिगृहीते विद्यास्थाने यः अत्यन्तं प्राचीनो ग्रन्थः तत आरभ्य यः अत्यन्तमर्वाचीनस्तदवधि सर्वं ग्रन्थजातं अक्षरशः गुरुमुखादधीत्य विमृश्य निष्कृष्टमर्थं बुद्धौ धारयामासुः। तेन अर्थवशादेव ग्रन्थानां पौर्वापर्यं तेषां सुज्ञान-

मासीत् । अधीत्य धारणीयस्यैव ग्रन्थस्य अर्थस्य च अतिबहुत्वात् कर्तृजीवितादिविषये यत्नं वोढुं तेषामशक्यमासीत् । अपि च विशिष्य कालदेशादिपरिज्ञानं यथा राजकीयव्यवहारेष्वावश्यकं न तथा विद्यासम्प्रदाये। अस्मद्देशीयानां प्राचां राज्ञां आवासस्थानप्रभृतिकं तथा विलुप्तं यथा अर्वाचीने काले तत्प्रत्यभिज्ञानं कथमपि न सुलभम् । एवं विद्यासम्प्रदायाद् वा राज्यव्यवहारतो वा ग्रन्थकारदेशकालादेर्दुर्ज्ञानत्वात् वयमिदानीं प्रायः चरित्रदरिद्रा भवाम इति पाश्चात्यैरुद्भाव्यमानां न्यूनतां सत्यं वयं समाधातुं न शक्नुमः। अथापि तु तैरेव प्रदर्शितां दिशमनुरुध्य आन्तरैः बाह्यैश्च शिलाशासनादिभिः प्रमाणैः कथञ्चिदुपलब्धैः चरित्रप्रक्रिया काचित् कल्प्यते। तदनुसारेण अत्र पूर्वं निर्दिष्टानां विद्यास्थानानां विमर्शः क्रमेण क्रियते ।

## वेदः।

वेद इत्याख्या अथर्वसंहितादिषु वैदिकग्रन्थेष्वेव उपलभ्यते । ज्ञानार्थात् विदधातोः अच्प्रत्ययं घञ्प्रत्ययं वा कृत्वा इदं पदं निष्पादयन्ति। वेदनस्य ज्ञानस्य साधनं उपाय इति तदर्थः । तदिदं वेदनं प्रमाणान्तराविज्ञातविषयं वेदितव्यम्। "प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता" इति श्लोकेन अयमभिप्रायः प्रकाश्यते । वेदस्य नामान्तरं श्रुतिरिति । 'श्रु श्रवणे' इति धातोः कर्मणि क्तिन्प्रत्यये एतन्निष्पत्तिः । कः पुनरस्य पदस्यार्थः ? वेदान्तिन आहुः— 'श्रूयते नित्यम् इति श्रुतिः । अनेन अपौरुषेयत्वात् निर्दोषत्वं विवक्षितम्' इति। पौरुषेया ग्रन्थाः पुरुषैस्तत्करणानन्तरमेव श्रूयन्ते, न तु तत्पूर्वम्। तदा तेषां अभावात्। न तथा वैदिका ग्रन्थाः। यथा इदानीं शिष्याः गुरोर्मुखात् वेदानधीयते तथैव चिरात्पूर्वमपि। तेन न कश्चित् पुरुषः पूर्वमभूतानां तेषां, महाभारतरामायणादीनां व्यासवाल्मीक्यादिवत् रघुवंशादीनां कालिदासादिवच्च, स्वयं स्वातन्त्र्येण उच्चारयिता । तस्मात् सर्वदा श्रूयत इति श्रुतिर्वेदः।

एवं श्रुतिशब्दस्य योऽर्थ उक्तः तमेव निमित्तीकृत्य अनुश्रवशब्दोऽपि वेदे प्रवृत्तः। 'दृष्टवदानुश्रविकः' इति सांख्यकारिका। तत्र वाचस्पतिमिश्र आह- 'गुरुपाठादनुश्रूयत इति अनुश्रवो वेदः। एतदुक्तं भवति— श्रूयत एव परं न केनापि क्रियत इति । तत्रभवः आनुश्रविकः' इति । अन्यथापि तु श्रुतिपदार्थो भवितुमर्हतीति भाति। मीमांसका अङ्गत्वे प्रमाण-

भूतां श्रुतिं लक्षयन्त आहुः– 'निरपेक्षो रवः श्रुतिः' इति। यः शब्दः श्रवणमात्रेण इतरनिरपेक्षमर्थप्रतीतिं जनयति स शब्दः श्रुतिरिति तदर्थः। एवं कृत्वा पदानां वाचकस्वरूपा या शक्तिः सापि श्रुतिरिति व्यवहर्तुं शक्यते। एतादृशं श्रुतिशब्दस्य प्रवृत्तिनिमित्तं वेदे सर्वथा संगतं भवति। स हि इतरानपेक्ष स्वार्थनिश्चयं जनयति। न ह्यार्याः वेदादर्थं प्रतीत्य तस्य प्रामाण्याय अन्यद्गवेषयन्ति। चक्षुस्स्थानीयो हि तेषां वेदः। यथा चक्षुषा दृष्टस्यार्थस्य प्रामाण्यं प्रतिष्ठितं भवति तथा वेदेन। तेन श्रवणमात्रेण दृढप्रत्ययजनको वेदः युक्तं यत् श्रुतिरित्यभिधीयते। श्रुतिप्रतियोगिनी च स्मृतिः। सा हि न श्रवणमात्रेण वेदवत् प्रतिष्ठितां प्रतीतिं जनयति, किं तु मूलभूतवेदानुमानद्वारा। तस्मात् युक्तमेतत् यत् परतन्त्रप्रमाणभूतस्मृतिप्रतियोगित्वमनुसन्धाय क्रियमाणस्य श्रुतिव्यवहारस्य अनन्यापेक्षत्वात्मकस्वातन्त्र्यशालि प्रमाणत्वं प्रवृत्तिनिमित्तमिति।

आम्नायः, आगमः, निगमः, इतीमान्यपि वेदनामानि। आम्नायते पारम्पर्येण, इत्याम्नाय इति अमरव्याख्यायां क्षीरस्वामी। एवं शिष्याचार्यपरम्परया नियमागमनादेव आगमः। "रक्षोहागमलघ्वसन्देहाः प्रयोजनं' इति महाभाष्ये। 'आगमपदेन श्रुतिः' इति तत्र नागेशः। निगम्यते निश्चीयते धर्मो येन स निगमः। एवं बहुधा आख्यायमानः अयं वेदः ऋक्सामयजुरथर्वात्मना चतुर्धा भिन्नत इति प्रसिद्धम्। वेदभाष्यकारेण तत्रभवता सायणेन यजुर्वेदभाष्यारम्भे "आनुपूर्व्या कर्मणां स्वरूपं यजुर्वेदे समाम्नातम्। तत्र मन्त्रविशेषापेक्षायां अपेक्षितयाज्यानुवाक्यादयः ऋग्वेदे समाम्नायन्ते। स्तोत्राणि तु सामवेदे'। तथा सति भित्तिस्थानीयो यजुर्वेदः चित्रस्थानीयावितरौ। तस्मात् कर्मसु यजुर्वेदस्यैव प्राधान्यम्" इत्युक्तम्। ऋग्वेदभाष्यारम्भे पुनः "अत्र केचिदाहुः– 'ऋग्वेदस्य प्राथम्येन सर्वत्राम्नातत्वात् अभ्यर्हितं पूर्वं इति न्यायेन अभ्यर्हितत्वात् तद्व्याख्यानं आदौ युक्तम्। प्राथम्यं च पुरुषसूक्ते विस्पष्टं 'ऋचः सामानि' इति। न केवलं ऋचां पाठप्राथम्येन अभ्यर्हितत्वं किं तु यज्ञाङ्गदार्ढ्यहेतुत्वादपि। तथा च तैत्तिरीया आमनन्ति 'यत् ऋचा तत् दृढम्' इति। तथा च सर्ववेदगतानि ब्राह्मणानि स्वाभिहितेष्वर्थेषु विश्वासदार्ढ्याय ऋचमेवोदाहरन्ति तदेतदृचाऽभ्युक्तमिति। मन्त्रकाण्डेष्वपि यजुर्वेदगतेषु तत्र तत्र अध्वर्युणा प्रयोज्या ऋचो बहव आम्नाताः। साम्नां तु सर्वेषां ऋगाश्रितत्वं प्रसिद्धम्। आथर्वणिकैरपि स्वकीयसंहितायां ऋच एव बाहु-

त्येन अधीयन्ते। अतः अन्यैः सर्वैर्वेदैरादृतत्वात् अभ्यर्हितत्वम्। तस्मात् ऋग्वेदस्य अभ्यर्हितस्य आदौ व्याख्यानमुचितम्'—इति। तान् प्रत्येतदुच्यते। अस्त्वेवं सर्ववेदाध्ययनतत्पारायणब्रह्मयज्ञजपादौ ऋग्वेदस्यैव प्राथम्यम्। अर्थज्ञानस्य तु यज्ञानुष्ठानार्थत्वात् तत्र तु यजुर्वेदस्यैव प्रधानत्वात्, तद्व्याख्यानमेव आदौ युक्तम्" इति।

एवं यद्यपि यज्ञाङ्गानुष्ठानापेक्षया व्याख्यानकरणे प्राथम्यं यजुर्वेदस्य, तथापि सर्ववेदाध्ययनादौ उक्तैर्हेतुभिः ऋग्वेदस्यैव प्राथम्यं भाष्यकारोऽनुमन्यत इति स्पष्टम्। एषांवेदानां कालतः पौर्वापर्ये दृढाध्यवसायाः पाश्चात्याः विमर्शे ऋग्वेदस्यैव प्राथम्यं ददति।

एकैको वेदः मन्त्रो ब्राह्मणमिति द्वेधा विभज्यते। एवं द्विभागस्य ग्रन्थसमुदायस्य वेद इत्याख्या। ऋक् साम यजुः इतीमानि तु पदानि न भागद्वयात्मकतत्तद्वेदवाचीनि। अपि तु मन्त्रमात्रप्रतिपादकानि। ऋग्वेद इत्यस्य 'ऋङ्मन्त्रप्रचुरो वेद' इत्यर्थः। तत्र मन्त्रब्राह्मणयोर्मध्ये मन्त्रस्य प्राथम्यम्। तदुक्तं भाष्यकृता — 'यद्यपि मन्त्रब्राह्मणात्मको वेदः। तथापि ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वात् मन्त्रा एव आदौ समाम्नाताः। ते च त्रिविधाः ऋचः, सामानि, यजूंषि, इति। तेन ऋग्वेदीयो मन्त्रभागः प्रथममस्माभिरुपादेयो भवति।

---

# माण्डूक्योपनिषत्॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

—o❀o—

अस्याः चत्वारः खण्डाः। तत्र प्रथमे खण्डे समस्तप्रणवप्रतिपाद्योऽक्षरनामा ब्रह्मादिषु नियामकतया स्थित आत्मा चतुष्पाद्भ्यधीयत। द्वितीये प्रथमद्वितीयतृतीयपादानां स्थानानि व्यापारं रूपाणि भोग्यं विश्वतैजसप्राज्ञरूपाणि नामानि चाख्याय उक्तार्थदार्ढ्याय 'अत्रैते श्लोका भवन्ति' इति प्रक्रम्य नवानुष्टुप्छ्लोकाः चतुर्थपादं सव्यापारमभिधाय 'अत्रैते श्लोका भवन्ति' इत्युपक्रम्य नवानुष्टुप्छ्लोकाश्चापठ्यन्त। तृतीये पूर्वोक्तानां जागरितस्वप्नसुषुप्तस्थानानां विश्वतैजसप्राज्ञानां प्रणवस्य

प्रथमद्वितीयतृतीयमात्राभूतैः अकारोकारमकारैर्वाच्यत्वमुदित्वा 'अत्रैते श्लोका भवन्ति' इत्यारभ्य पञ्चानुष्टुप्छ्लोका उदाह्रियन्त। चतुर्थे चतुर्थपादस्य प्रणवैकदेशनादप्रतिपाद्यत्वं गदित्वा 'अत्रैते श्लोका भवन्ति' इति भणित्वा षडनुष्टुप्छ्लोका न्यदर्श्यन्त। इयमुपनिषत् श्रीरङ्गरामानुजमुनिश्रीकूरनारायणमुनिविरचितभाष्याभ्यामुपेता सप्तत्युत्तराष्टादशशततमे(१८७०)आङ्गलवत्सरे समपुद्यत। एतदन्ते इदं वाक्यद्वयं दृश्यते। "अत्र श्रीवत्साङ्कमिश्रमुनिभिरत्रैते श्लोका भवन्तीति वाक्यश्रवणात् 'बहिःप्रज्ञो विभुर्विश्वः' इत्यादयः 'स मुनिर्नेतरोजनः' इत्यन्ता एकोनत्रिंशच्छ्लोका माण्डूक्योपनिषत्त्वेन व्याख्याताः। रङ्गरामानुजमुनिभिस्तु शङ्करभाष्याद्यनुरोधेन गौडपादीया इति मत्वा न व्याख्याताः" इति। आभ्यां वाक्याभ्याम् एकोनत्रिंशच्छ्लोकाः उपनिषद्वा न वेति संशयः प्रादुर्भवति।

ब्रह्मविद्याभिधानायामेतदाङ्गलहायन(१९५०)प्रारम्भमासत्रय (January, February, March) सञ्चिकायां 'माण्डूक्यकारिका' इति शीर्षकस्याधस्तात् कानिचित् द्रामिडवाक्यानि लक्ष्यन्ते। तत्रत्यकतिपयवाक्यार्थानुवादकानि संस्कृतवाक्यान्येवम्,— 'गौडपादीयो माण्डूक्यकारिकाह्वयो ग्रन्थः प्रकरणचतुष्टयात्मना व्यभज्यत। प्रथमभागस्यागमप्रकरणमिति नामधेयम्। तत्र, विश्वतैजसप्राज्ञतुरीयस्वरूपाणां विविच्यज्ञानं समस्ततया व्यस्ततया च प्रणवस्योपासनमित्ययमुपनिषदुक्तो विषयो विस्तरेण निरूपितोऽस्ति। एतत् वेदान्तार्थमात्रप्रधानतया आगमप्रकरणमिति व्यवह्रियते। इदं वेद एवान्तर्भूतमिति माध्वा वैष्णवाश्च मन्यन्त इत्येतत् यदि परिशीलयेम तदा कारिकोत्कर्षः क इति वदेम।' इति। अनेन ग्रन्थेन, एकोनत्रिंशच्छ्लोका गौडपादीयकारिका एव न तु माण्डूक्योपनिषदन्तर्गता इत्येतल्लेखकनिर्णयः स्पष्टमवगम्यते। अयं निर्णयो निर्णेतृमतप्रवर्तकश्रीशङ्कराचार्यविरचितश्रीविष्णुसहस्रनामभाष्येण विरुध्यते। तद्भाष्ये हि विश्वशब्दव्याख्याने 'ओमित्येतदक्षरमिदं सर्वम्' इत्युपक्रम्य

'प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः।
अपूर्वोऽनन्तरो बाह्यो न परः प्रणवोऽव्ययः॥

सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्॥

प्रणवं हीश्वरं विद्यात् सर्वस्य हृदि संस्थितम्।
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति॥

अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमश्शिवः।
ओङ्कारो विदितो येन स मुनिर्नेतरो जनः॥'

इत्यन्ता माण्डूक्योपनिषत्' इति वाक्यमुपलभ्यते। अनेन वाक्येन, तैत्तिरीयोपनिषदि 'तदप्येष श्लोको भवति' इति प्रक्रम्य पठितानां वाक्यानामिव 'अत्रैते श्लोका भवन्ति' इत्यारभ्योदाहृतानामेकोनत्रिंशच्छ्लोकानां मन्त्रत्वं निर्धार्य ओमित्येतदादिद्वादशवाक्यनिर्विशेषं तेषु माण्डूक्योपनिषत्त्वमभ्युपगम्य च श्रीकूरनारायणमुनिभिस्तेषां व्याख्यानं दत्तहस्तावलम्बं भवति। अमात्र इत्यादि चतुर्थखण्डारम्भवाक्यान्तस्य 'य एवं वेद' इत्यस्य द्विरुक्तिरुक्तविधोपासनोपदेशावधारणार्थेति, अमात्र इत्यादि चरमश्लोकान्तस्य 'स मुनिर्नेतरो जनः' इत्यस्य द्विरुक्तिरुक्तसर्वप्रमेयावधारणार्था उपनिषत्समाप्त्यर्था चेति चैतेषामाशयः। तृतीयखण्डस्थस्य 'अत्रैते श्लोका भवन्ति' इत्यस्य शाङ्करमाण्डूक्योपनिषद्भाष्ये 'अत्रैते श्लोका मन्त्रा भवन्ति' इति विवरणं विलोक्यते। अतो माण्डूक्योपनिषद्भाष्यश्रीविष्णुसहस्रनामभाष्ययोर्मिथो न विरोधः।

आद्यस्य तुरीयस्य च 'अत्रैते श्लोका भवन्ति' इत्यस्य व्याख्यानभाष्यमुपादाय शाङ्करमाण्डूक्योपनिषद्भाष्यविवरणकारेणानन्दगिरिणा 'आचार्यैर्माण्डूक्योपनिषदं पठित्वा तद्व्याख्यानश्लोकावतारणमत्रेत्यादिना कृतम्। तदत्रेत्यनूद्य भाष्यकारो व्याकरोति।' इति, 'यथापूर्वमाचार्येण श्रुत्यर्थप्रकाशकाश्श्लोकाः प्रणीताः तथोत्तरेऽपि श्लोकाः श्रुत्युक्तेऽर्थे एवं भवन्तीत्याह।' इति च भाषितत्वात् अर्वाचीनानामेकोनत्रिंशच्छ्लोकेषु गौडपादकारिकात्वप्रतीतिरुदभवदिति केचन सूरय आशेरते। शाङ्करभाष्यादिनिखिलमतान्तरग्रन्थविदः श्रीरङ्गरामानुजमुनयः एकोनत्रिंशच्छ्लोकानां माण्डूक्योपनिषदन्तर्भावं जानाना अपि स्वकीयेन माण्डूक्योपनिषद्द्वादशवाक्यव्याख्यानेन ते श्लोका गतार्था इति बुद्ध्या वा, ते निगदव्याख्याता इति धिया वा तान्नव्याचक्षतेति शक्यं वक्तुम्। अत्रेदं तत्त्वम्—प्रथममागमप्रकरणं सर्वमपि माण्डूक्योपनिषदेव। तत्र गौडपादीयं पदमेकमपि नास्ति। वैतथ्याद्वैतालातशान्तिप्रकरणानि त्रीणि गौडपादीयानि स्युः। आगमप्रकरणं वेद एवान्तर्भूतमिति माध्वा वैष्णवाश्च मन्यन्त इति परेषां लेखनं तु स्वमतप्रवर्तकाचार्यभाष्याननुगुणमिति। शिष्टमुपरिष्टात्।

# धर्मघोषणा ॥

"धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।"

जगतः, जनानां, स्वस्वमर्यादायां धारणात् ततः सुखजननाच्च धर्मः धर्मपदवाच्यो भवति । स रक्षितोऽस्मान् रक्षति। हतोऽस्मान् हन्ति । अद्य वयं सर्वप्रकारेण हन्यामहे । अनर्था दिने दिने सङ्ख्यया तीव्रतायां च वर्धन्ते । कदा एषामन्तो भविष्यतीति न जानीमः ।

पाश्चात्यप्रक्रियायां मग्ना जनाः— नेतारश्च नेतव्याश्च । सा वासना तथा रूढमूला यथा सुमहत्स्वपि सङ्कटेषु अनुभूयमानेषु अस्मत्पूर्वपुरुषैरनुसृतो योगक्षेममार्गः कः शान्तिसंरक्षणोपायः कः सर्वसौहार्दसम्पादनसरणिः का, इति चिन्तयितुं नैव मतिरुदेति ।

सैका बुद्धिः प्राक्तनैर्या प्रदिष्टा सैको मार्गः प्राक्तनैर्योऽनुशिष्टः ।
लोपात् तस्यास्तस्य चैतेऽद्यनर्थाः बुद्धिं मार्गं तां च तञ्चाद्रियध्वम् ॥

"उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत"

अव्युत्पन्नाः अव्यपदेश्याश्च केचित् वयमिदमल्पास्थिरमिति ततोऽन्यत् अनन्तस्थिरफलमस्तीत्याहुः । केवलं उक्तिमात्रसिद्धं तत् यदन्यदस्तीत्युच्यते । न पुनर्युक्तियुक्तं दृष्टं वा भूयसां लौकिकानामुक्तिम-विमृश्यैव तैस्तथोच्यते । अमृश्यवचनमिदमिति निरूपयामि इहैवार्चा-त्मनि भगवति काम एव पुरुषार्थः । नान्यदस्ति देशान्तरेऽनुभाव्यम् । तत् शृणुत । 'आदित्यमण्डलं भित्वा प्रकृतेः परस्तात् देशविशेषे ब्रह्म प्राप्नोति, न च पुनरावर्तते' इति वदन्ति । आदित्यस्य सप्ताश्वो रथः इति च । किमिदं संभाव्यते ? मेघमण्डले कथमश्वानां गतिः अश्वाः सप्त । एकमेव चक्रं रथस्य । उष्णैः भूयोभिः किरणैः परिपूर्णो हि विवस्वान् । तस्य दर्शनमेव तावत् न सम्भाव्यम् । कुतः समीपगमनम् । कुतस्तरां तन्मण्डलभेदनम् । अपि चापर्याप्तामृतमर्चारूपमत्रैव किल दृश्यते । अमुत्र किं तत् अपर्याप्तामृतमन्यत् । कोऽयं तदनुभवो नाम ।

---

அதினின்றும் வாரா தொழிவதொன் றுண்டே
அதுநிற்க ஏரார் முயல்விட்டுக் காக்கைப்பின் போவதே; [4]

ஏரா ரிளமுலையீ ரென்றனக் குற்றதுதான் !
காரார் குழலெடுத்துக் கட்டி. [5]

ततः पुनरावृत्तिर्नास्ति इति वदन्ति । नरकिणामस्ति, नाकिनामस्ति, मोक्षिणां तु नास्ति इति किमेतत् ।

स्यादेतत् । सर्वमिदं संभाव्यमस्तु, मास्तु वा स्थलचरं मांसमेदुरं शशं विहाय गगनचरवायसानुसरणमेतत् यत् सर्वसुलभं सकलफलप्रदं इहस्थमर्चारूपमपहाय परत्र परविग्रहानुभवनं नाम । अयि प्रिय सख्यः युवदशानुरूपदृश्यावयवसौन्दर्याः इहेदृशदिव्यदेहसौन्दर्यसम्पत्तिफलं भवतीनां अत्रार्चावतारेषु नित्यकैङ्कर्यं किल इह इदानीं एतद्देह एव लभ्य-मिदम् । अमुत्र तदानीं देहान्तरे लभ्यं तत् । अनिश्चितं च । महदन्तरं उभयोरनयोरनुभवयोः । अथ च मत्स्वरूपानुरूपमिति स्वीकृतं किमपि शृणुत कदाचिदहं कन्दुकप्रहारविहारोद्युक्ताभवम् । तदा चिकुराः श्लथाः मा भूवन्निति नीलमेघमेचकान् अमुष्मियांश्चिकुरप्रकरान् कथञ्चि-देकीकृत्य गृहीत्वा शिरस्यबध्नाम् ।

கதிர்முலையை வாரார வீக்கி மணிமே கலைதிருத்தி
ஆரா ரயில்வேற்க ணஞ்சனத்தின் நீறணிந்து
சீரார் செழும்பந்து கொண்டடியா நின்றேன்நான்
நீரார் கமலம்போல் செங்கண்மா லென்றொருவன்
பாரோர்க ளெல்லாம் மகிழப் பறைகறங்க
சீரார் குடமிரண் டேந்தி. [6]

पीनोज्ज्वलौ पयोधरौ कञ्चुकेन दृढमभान्त्सम्। मणिमयीं मेखलामुदरे। सौन्दर्यसौक्ष्म्यसम्पन्ने धनुरायते अक्षिणी अञ्जनचूर्णैरलमकरवम्। इत्थमहं मदीयकरस्पर्शसुभगं कन्दुकमादायाधरोत्तरं ताडयन्त्यासम्। यदि तदा चिकुराः श्लथाः भवेयुः। यदि वा कुचौ दृश्यसौन्दर्यौ स्याताम्। मेखलाऽभावेन नीवी च श्लथबन्धा भवेत्। नेत्रयोः सहजसौन्दर्यं चाञ्जनावृतं न स्यात्। तदा मयि मग्नहृदयः सः दयितः मत्प्रसादं सादरमपेक्षमाणः मद्विधेयश्च कृतो भवेत्, येनाहमुपेक्षिता तदात्वे साम्प्रतं परिभूये। सहजगात्रसौन्दर्यगोपनफलं किलेदम्—

व्यावल्गत्कुचभारमाकुलकचं व्यालोलहारावलि-
प्रेङ्खत्कुण्डलशोभिगण्डयुगलं प्रस्वेदिवक्त्राम्बुजम्।
शश्वद्दत्तकरप्रहारमधिकश्वासं रसादेतया
यस्मात्कन्दुकसादरं सुभगया संसेव्यसे तत्कृती॥

इति कन्दुकदशां स्वयमपेक्षमाणः कामीहृदयं निवर्तयितुमपारयन् मम तदैव वशंगतो भवेन्नतु। तदानीं गम्भीराम्भस्समुद्भूतपुण्डरीकनिभेक्षणः पुरुषोत्तमः कश्चित् भूमिष्ठेषु सर्वेषु उत्तमाधमविभागवर्जं हृष्यत्सु, मुखरिते च वादित्रे कुम्भद्वयं हस्तयोरादाय नर्तनं कर्तुमारेभे। हन्त! तदीयदिव्यकरस्पर्शधन्यं तदेव कुम्भद्वयं श्रीमत्। मदीयं तु कुचकुम्भयुग्मं सावद्यमिव।

---

செழுந்தெருவே ஆரா ரெனச்சொல்லி யாடு மதுகண்டு
ஏரா ரிளமுலையா ரென்னையரு மெல்லாரும்
வாராயோ வென்றார்க்குச் சென்றேனென் வல்வினையால்
காரார் மணிநிறமும் கைவளையும் காணேன்நான்
ஆரானும் சொல்லிற்றும் கொள்ளேன். [7]

विशाला विहारवीधी। प्रेक्षकान् अभिमुखयितुं 'कः कोऽत्र भोः' इति घुष्यन् नर्तनमारेभे। तं दृष्ट्वाप्यविकृतघनकुचाः मम मातरः अन्याश्च सर्वाः मां एह्येहि' इति त्वरयामासुः। तद्वाक्यादहमपि तत्रागच्छम्। अद्यत्वे मयानुभूयमानं महत्तरं दुरितमेव तत्र गमने निमित्तम्। दुःख-हेतुर्हि दुरितमित्युदीर्यते। नृत्यतः दिव्यपुरुषस्य तस्य दर्शनमात्रेण लीनं मम दिव्यं रूपम्। गळितानि हस्तयोर्वलयानि। आश्वासयन्तीनां प्रिय-हितान् आलापानपि नाश्रौषम्।

---

அறிவழிந்து தீரா வுடம்பொடு பேதுறுவேன் கண்டிரங்கி
ஏரார் கிளிக்கிளவி யெம்மனைதான் வந்தென்னை
சீரார் செழும்புழுதிக் காப்பிட்டு. [8]

विलीनं चैतन्यम्। शरीरं पुनरच्छेद्यमदाह्यं चात्मवदेव सुस्थिरमासीत्। निश्चेतनां मामालोक्य निर्वेदं गता मम जननी। मम हृदयतोदो माभूदिति शुकातिशायि श्राव्यं व्याहरन्ती सा स्वयमेवागत्य श्रीमद्भिः भक्ताङ्घ्रि-रेणुभिः स्वरूपानुरूपां रक्षां चकार।

---

செங்குறிஞ்சித் தாரார் நறுமாலைச் சாத்தற்கு
தான் பின்னும் நேரா தனவொன்று நேர்ந்தாள். [9]

अथ च 'नान्यं देवं नमस्कुर्यात् विष्णुपादाब्जसंश्रयः' इति निषेधमप्य-तिलङ्घ्य यः शास्ता नाम कश्चन देवः गिरिजकुसुममालालङ्कृतः तस्मा अकृतपूर्वं अञ्जलिबन्धमप्यकरोत्। 'काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः। क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा।' इति हि गीयते। ईदृशी मयि वात्सल्यकाष्ठा मम जनन्याः।

---

அதனாலும் தீராதென் சிந்தைநோய் தீராதென் பேதுறவு
வாராது மாமை யதுகண்டு மற்றாங்கே
ஆரானும் மூதறியு மம்மனைமார் சொல்லுவார்
பாரோர் சொலப்படும் கட்டுப் படுத்திரேல்
ஆரானும் மெய்ப்படுவ னென்றார். [10]

भक्षितेऽपि लशुने न शान्तो व्याधिरिति रीतिरासीत् देवतान्तरभजनेऽपि न शान्तो ममाधिः। मम प्रज्ञालोपोऽपि न निस्तीर्णः। नागतं लावण्यमपि।

दयितसमागमे हि समीहितं सम्पद्येत। मदीयां दशामिमां दृष्ट्वा आधिशमनोपायवेदिन्यो वृद्धाः स्त्रियः काश्चिदेवमाहुः। अस्ति किल देवन्ती*-द्वारा दैवावेशहेतुः कोऽपि कर्मकलापः। ईदृशीं चिकित्सां भूमिष्ठाः सर्वेऽपि श्लाघन्ते। तमिमं कर्मकलापमनुतिष्ठन्तु भवत्यः। युष्माकं कन्यकायाः व्याधिहेतुः देवो वा मानुषो वा यो वा को वा स्यात् स इदंतया निर्णीयेत। इत्यवोचन्। [* தைவாவேசம் பெறும் ஓர் பெண்]

---

அதுகேட்டுக் காரார் குழல்கொண்டை கட்டுவிச்சி கட்டேறி
சீரார் சுளகில் சிலநெல் பிடித்தெறியா
வேரா விதிர்விதிரா மெய்சிலிராக் கைமோவா
பேரா யிரமுடையா னென்றாள். [11]

तासां तद्वचनमाकर्ण्य मेघमेचकचिकुरबन्धाञ्चिता दैवज्ञा काचित् स्वयमेवागत्य दैवाविष्टा बभूव। आचार्यो हि दयालुः शिष्यरुचिमात्रमपेक्ष्य स्वयमेव तत्त्वोपदेशाय त्वरते। शिष्यहृदयस्थं तमो यावत् न नश्यति, तावत् तन्मूलभूतं निजायश एव चिकुररूपेण शिरस्स्थितं मन्यते च। तथैवेयमपि। दिव्यशूर्पे कतिचन व्रीहिकणान् गृहीत्वा मुष्टिना विकरति स्म। स्विन्ना शिथिलावयवा, पुलकितगात्री च बभूव। तदानीन्तनभावनावशादाविष्टस्य भगवतः तुळसीपरिमलमिलितं निजहस्तमजिघ्रत्। अथ चाधिनिदानं वर्णयितुमारेभे। देवो नाम सहस्रवान् इत्यवादीदादौ।

பேர்த்தேயும் காரார் திருமேனி காட்டினாள்
கையதுவும் சீரார் வலம்புரியே யென்றாள். [12]

अथ च दिव्यरूपं मेघश्यामं श्रमहरमभिनीयादर्शयत्। हस्ते श्रीमत्पाञ्चजन्य इत्यवोचत्।

---

திருத்துழாய் தாரார் நறுமாலை கட்டுரைத்தாள் கட்டுரையா
நீரேது மஞ்சேல்மின் நும்மகளை நோய்செய்தான்
ஆரானுமல்ல னறிந்தே னவனைநான்
கூரார்வேற் கண்ணீர் நுமக்கறியக் கூறுகேனே
ஆராலிவ் வைய மடியளப் புண்டதுதான்
ஆரா லிலங்கை பொடிபொடியா வீழ்ந்தது
மற் றாராலே கன்மாரி காத்ததுதான் [13]

# काव्यपुरुषोत्पत्तिः ॥

(Pandit K. S. Ramaswami Sastri, Baroda.)

—— o✽o ——

(अनुवृत्ता)

विधातृनिर्देशवशेन देवी सुतानुरागं सहसा विजित्य ।
प्रचक्रमे ब्रह्मपुरं प्रयातुं सुतं विनिक्षिप्य कवीश्वरेषु ॥ ३७ ॥

विज्ञाय मातुर्गमने प्रवृत्तिं काव्योऽनुगन्तुं हठमाततान ।
विधातुराज्ञाविरहात्तु देवी न्यवर्तयत् तं वचनैर्मनोज्ञैः ॥ ३८ ॥

मातुर्वियोगेन भृशं रुषार्तः काव्यः कुमारः प्रययौ यथेच्छम् ।
गौरीसुतश्चाप्यपरः कुमारो भृशं रुरोद स्वसुहृद्वियोगात् ॥ ३९ ॥

निध्याय गौरी सुतयोर्हिताय प्रेमानुबन्धेन वशे विधातुम् ।
साहित्यविद्याख्यवधूं सुरूपां ससर्ज काव्यस्य मनोऽपहर्तुम् ॥ ४० ॥

ताञ्चादिशत्ते पतिरेष काव्यो रुषा यथेच्छं क्रमते विदिक्षु ।
स्त्रीणां हि धर्मः पतिवर्त्मयानं बालेऽनुगच्छाथ निवर्तयैनम् ॥ ४१ ॥

प्रेम्णा समं नास्ति जनस्य हृद्यं देवा अपि प्रेमवशा भवन्ति ।
प्रेम्णैव तिर्यञ्चि वशं प्रयान्ति प्रेम्णो बलेनैव हि लोकयात्रा ॥ ४२ ॥

ज्यायान् रसः प्रेमसमुद्भवो यः शृङ्गारनाम्ना भरते प्रसिद्धः ।
आनन्दरूपो रसतां प्रपन्नो जीवः परब्रह्मपदं प्रयाति ॥ ४३ ॥

स्त्रीषु प्रसक्ताः पुरुषा निबद्धाः प्रेमानुबन्धेन सदा रमन्ते ।
माया हि मूलं परमस्य सृष्टौ या कामनारूपतया प्रपन्ना ॥ ४४ ॥

उमा निगद्यैवमथादिशत्सा मुनींश्च शब्दार्थविदोऽनुगन्तुम् ।
साहित्यकन्यास्तवनं विधातुं वृत्तिप्रवृत्तीश्च तथानुकर्तुम् ॥ ४५ ॥

या च स्तुतिर्देशविदेशभिन्ना काव्यात्मतां यास्यति रम्यरूपा ।
साहित्यकन्या मुनयश्च सर्वे तथेति वाचं प्रतिपेदिरेऽस्याः ॥ ४६ ॥

काव्यं पतिं प्रीणयितुं प्रवृत्ता साहित्यकन्याऽनुजगाम तूर्णम् ।
देशेषु वेषं परिवर्तयन्ती जनाश्च तद्रीतिवशा बभूवुः ॥ ४७ ॥

प्रागादिदिक्षु प्रचरन्तमेनं वेषादिना येन सुरम्यरूपा ।
संरञ्जनायानुययौ वधूः सा प्रवृत्तयस्ता वहुधा बभूवुः ॥ ४८ ॥

नृत्तादिकं यच्च चकार वाला वृत्तिं जनास्तां वहुमेनिरेऽस्याः ।
साहित्यविद्यारसिकाश्च लोकाः स्तुतीस्तयोश्चकुरनेकरूपाः ॥ ४९ ॥

वक्षोविनिक्षिप्तविचित्रहाराः सीमन्तरम्याः स्फुटवाहुमूलाः ।
दूर्वाप्रकाण्डेन समानदेहा गौडीयबाला रुचिरा बभूवुः ॥ ५० ॥

गौडाङ्गनावेषविभूषणाद्यैः वशं न यातं पतिदेवमेनम् ।
समासचित्रादिवचो ब्रुवाणं गौडीयरीतिं विजहौ विलोक्य ॥ ५१ ॥

वङ्गेभ्य उत्प्लुत्य पतिं प्रयान्तं पाञ्चलदेशेषु परिभ्रमन्तम ।
साहित्यकन्या परिवृत्तवेषा पाञ्चालमध्ये जगृहेऽथ वेषम् ॥ ५२ ॥

प्रवृत्तिमस्या मुनयोऽनुयाताः प्रशस्तवाक्यैरभितुष्टुवुस्ताम् ।
काव्यः पतिर्येन वधूं भजेत प्रेमानुवद्धेन हृदा सुरूपाम् ॥ ५३ ॥

ताटङ्कशोभारमणीयगण्डा नाभिस्पृशद्दोलिततारहाराः ।
आश्रोणिगुल्फावृतवस्त्रयुग्माः पाञ्चालवालाः परिवव्रुरेनम् ॥ ५४ ॥

---

पेक्सपियर्-कृतं

# यथाभिमतम् ॥

III. 2

[ प्रविशति रोसलिन्द् किमपि पत्रं लिखन्ती ]

रोसलिन्द्– "प्राच्याद् यावत् पश्चिमसिन्धुं
निरुपमरत्नं ननु रोसलिन्दा ।
वातारूढं तद्गुणवृन्दं
वहति समन्ताद्भुवि रोसलिन्दाम् ॥

सर्वं निपुणैः सुविहितवन्धं
चित्रं मलिनं ह्यभिरोसलिन्दम् ।
हृदि पदमितरद् वदनं विन्देत्
स्मरतः कान्तां किमु रोसलिन्दाम्" ॥

निकपोपलः— एवंविधैः प्रासैः अष्टौ वर्षाणि त्वामहं स्तुयां आहारसमयं निद्राकालं च वर्जयित्वा। साक्षादिमं आपणं गच्छन्तीनां दधिविक्रयिणीनां रीतिः*।

रोसलिन्द्— अपेहि, जड।

निकपोपलः— निदर्शनार्थमिदम्;

हरिणो हरिणीयोगानन्दं वाञ्छन्नन्विच्छतु रोसलिन्दाम्।
मार्जारी चेद् दयितसगन्धा नूनमियं च तथा रोसलिन्दा॥
लूत्वा सस्यं विदधति बन्धान् शकटैश्च वहन्त्युपरोसलिन्दम्।
मधुरं बीजं त्वगरुचिसान्द्रा तादृशबीजमियं रोसलिन्दा॥

एषा मिथ्या धाटी पद्यानाम्। कथमेतैस्त्वं आत्मानमायासयसि?

रोसलिन्द्—तूष्णीमास्स्व जड। कस्मिंश्चिद् वृक्षे इमान्यहमुपलब्धवत्यस्मि।

निकपोपलः— सत्यं स वृक्षः दुष्फलं फलति।

रोसलिन्द्—तमहं त्वया सन्धास्यामि; अथ च तं †मेड्लर्-अनेन सन्धास्यामि। ततः तदत्र पूर्वतमफलितं फलं भविष्यति। स त्वं अर्धपाकात् पूर्वमेव विशीर्णो भविष्यसि। स साक्षात् मेड्लर्-अस्य गुणः।

निकपोपलः— त्वमुक्तवत्यसि; किं निपुणं उत अन्यथा तदरण्यं ‡निर्णयतु।

---

* ग्रामवनिताः दधिविक्रयाय स्वग्रामात् नगरस्थं विक्रयस्थानं गच्छन्त्यः मार्गे विनोदार्थं स्वस्वविदिताः ग्राम्यगाथा गायन्ति। तत्रत्या या अर्थपुष्टिरहिता प्रासमात्रसारा रीतिः सैवेह दृश्यत इत्यभिप्रायः।

† रोस्(rose)जातीयः कश्चन वृक्ष इति वदन्ति।

‡ रोसलिन्द्-अस्याः कामोपहतचित्ततामजानन् तेन निस्सारगाथापठनव्यसनात् तां वारयितुं तीव्रमुद्युञ्जानश्च निकपः अपृष्ट एव पुनःपुनर्भापते तया निवार्यमाणोऽपि। एवमनेन क्रियमाणात् स्वश्लाघापरश्लोकानुवाचनरसविच्छेदात् अन्तः कुपिता सा तस्य आन्तश्रवणे अक्षमां सद्यः प्रतिवचनदानत्वरां च निन्दितुकामा मेड्लर्— साम्यसम्पादनमुपक्षिपति। तथापि पूर्ववदेव तद्धृदयानभिज्ञो निकपः तत्कृतः स्वोपालम्भः अनिपुणकृत्यमेवेति व्यञ्जयन् प्रौढमाह तदरण्यं निर्णयत्विति।

# प्रकृतिभेदः ॥

—०*०—

(1)

पुत्रः— ममेदं माभूत्, गच्छ । नाहमिदं भोक्ष्ये । सदा विदग्धं परिवेषयसि । किमहं पशुः येन लब्धं यत्किमपि भुञ्जीय ?

माता— किमहं कुर्याम् । 'फलाहार' दिनानि पदेपदे आपतन्ति । लवणपिष्टमिति चेत् सर्वदा कष्टः पाकः । तव वाचो बिभ्यती जाग्रत्येव अपाक्षम् । एवं विदग्धभूयिष्ठं तदभूत् । उचितमग्निं ज्वलयित्वा तैलमनल्पमासिच्य सावधानं पचामि । अथापि अन्ते एवं भवति । मम हस्तस्यायं विशेष इति भाति । भवतु अद्य कथञ्चिद् भुङ्क्ष्व । इतः परं लवणपिष्टमेवाहं न पक्ष्यामि ।

---

(2)

पुत्रः— कतिकृत्वोऽहमम्ब, त्वां वदामि 'विदग्धं मे देहि, विदग्धं मे देहि' इति । अशृण्वतीव तूष्णीमेव वर्तसे । विदितं हि ते 'विदग्धं मे रोचते' इति । लवणपिष्टपाकदिने विदग्धं लप्स्यत इति महतीमाशां कुर्वन्नस्मि । त्वं तु सर्वदा भग्नाशं मां करोषि ।

माता— सम्यक् शृणोमि यत् त्वं विदग्धमपेक्षसे । सम्यक् च मे विदितं यत् त्वं विदग्धप्रियः । किमहं कुर्याम् ? यत्नेनापि विदग्धं पक्तुं मया न शक्यते । कुम्भं चिरं चुल्ल्यां स्थापयामि । अग्निमतिज्वलयामि । अधिकं तैलं न सिञ्चामि । दर्व्या अवघट्टनमपि असकृत् न करोमि । तथापि अत्यल्पमपि विदग्धं न भवति । भवतु अद्य सहस्व । दिनान्तरे अन्यां काञ्चिदाहूय पाचयामि । यावदपेक्षं विदग्धं भुङ्क्ष्व ।

---

|| श्रीः ||

# उद्यानपत्रिका ||

त्रयोविंशवर्ष-

# विषयसूची ||

—o❀o—

# UDYANA PATRIKA

[XXIII Year]

# CONTENTS.


1 मेनका । 1, 25, 49, 73, 101

2 सुभाषितनीवी । 5 [Srinivasachariar]

3 व्याजोक्तिरत्नावली । 29, 53, 77, 105 [Y. Mahalinga Sastri]

4 संस्कृतप्रतिष्ठा । 9

5 स्यमन्तकोपाख्यानम् । 11 [Vidyalankara V. R. Srinivasa Tatacharya Siromani]

6 वाणिज्यम् । 15

7 यथाभिमतम् । 16, 43, 66, 93, 122

8 सञ्जल्पः । 20

9 प्रकृतिभेदः । 22, 46, 70, 98, 124

10 पुस्तकपरामर्शः । 25, 48, 72, 100

11 प्रतिबोधनम् । [in the wrapper]

12 भारतदेशः । 33

989
TIRUPATI.
१२६

उद्यानपत्रिका ।

13 कालिन्द्यादिकन्याविवाहः । 37 [Vidyalankara V. R. S. Tatacharya Siromani]

14 संस्कृतवाङ्मयम् । 40 [Pandit K. S. Ramaswami Sastri, Baroda]

15 सर्वानर्थपरिहारः । 57

16 राज्यभारः । 58

17 नरकवधः विवाहश्च । 61 [Vidyalankara V. R. S. Tatacharya Siromani]

18 काव्यपुरुषोत्पत्तिः । 65, 99, 121 [Pandit K. S. Ramaswami Sastri, Baroda]

19 अराजकम् । 81

20 लोकवार्ता । 83

21 गोवर्धनधारणम् । 85 [Vidyalankara V. R. S. Tatacharya Siromani]

22 शिरिय तिरुमडल् दिव्यप्रबन्धः [संस्कृतविवरणसमेतः] । 89, 117 [T. E. Viraraghavacharya Siromani]

23 गीर्वाणवाणीस्तवः । 96 [T. Ramachandra Sastri Siromani]

24 वर्षपूर्तिः । 109

25 संस्कृतग्रन्थजातम् [वैदिककाण्डः] । 110

26 माण्डूक्योपनिषत् । 113 [Vidyalankara V. R. S. Tatacharya Siromani]

27 धर्मघोषणा । 116

28 त्रयोविंशवर्षविषयसूची । 125

---

शास्त्रानुबन्धः ।

कुवलयानन्दः बुधरञ्जनीसमेतः । [293- 332]

---

VERIFIED 1989